Pilani Central Library
PILANI (Jaipur State)

Class No :- 580.8
Book No :- R144ST
Accession No :- 16554.

REQUEST

IT IS EARNESTLY DESIRED THAT THE BOOK BE HANDLED WITH CARE AND BE NOT MARKED, UNDERLINED OR DISFIGURED IN ANY OTHER WAY, OTHERWISE IT WILL HAVE TO BE REPLACED OR PAID FOR BY THE BORROWER IN THE INTEREST OF THE LIBRARY.

LIBRARIAN

# SYÂNANDÛRAPURAVARṆANAPRABANDHA

BY

HIS HIGHNESS

SWÂTI TIRUNÂL

SRÎ RÂMA VARMA KULASEKHARA PERUMAL

MAHARAJA OF TRAVANCORE

| | | |
|---|---|---|
| 988 M. E. / 1813 A. D. | TO | 1022 M. E. / 1847 A. D. |

WITH THE COMMENTARY SUNDARÎ

OF

SRÎ RAJARAJAVARMA KOIL TAMPURAN

EDITED BY

MAHÂMAHOPÂDHYÂYA

T. GAṆAPATI SÂSTRÎ

*Curator of the Department for the publication of Sanskrit Manuscripts, Trivandrum.*

PUBLISHED UNDER THE AUTHORITY OF THE GOVERNMENT OF HIS HIGHNESS THE MAHARAJAH OF TRAVANCORE.

TRIVANDRUM:

PRINTED BY THE SUPERINTENDENT, GOVERNMENT PRESS.

1920.

*(All Rights Reserved.)*

॥ श्रीः ॥

# स्यानन्दूरपुरवर्णनप्रबन्धः

९८८ तमादि १०२२ तमान्तकोलम्बाब्दजीविना
स्वातिना महामहिम्ना
श्रीरामवर्मकुलशेखरवञ्चिमहाराजेन
प्रणीतः

श्रीराजराजवर्मदेवप्रणीतया सुन्दर्याख्यया व्याख्यया समेतः

संस्कृतग्रन्थप्रकाशनकार्याध्यक्षेण
महामहोपाध्यायेन
त. गणपतिशास्त्रिणा
संशोधितः ।

स च
अनन्तशयने
महामहिमश्रीमूलकरामवर्मकुलशेखरमहाराजशासनेन
राजकीयमुद्रणयन्त्रालये तदध्यक्षेण
मुद्रयित्वा प्रकाशितः ।

कोलम्बाब्दाः १०९६, क्रैस्ताब्दाः १९२०.

# PREFACE.

The Syānandūrapuravarnanā Prabandha already mentioned in the introduction of the Bhaktimanjari published in 1904 as one of the works of His Highness the Svāti Srī Rāma Varma Kulasekhara Mahārāja, is now issued under command of His Highness the Maharaja, with the commentary of Srîmat Rajaraja Varma Koil Tampuran of Changanaseri, father of His Highness the present Maharaja.

A daily service of the God Padmanabha by way of reading (पारायण) this work ordered by the pioūs āuthor to be conducted in the temple is even now performed by a Brahmin family.

The edition of the text is based on a palm-leaf manuscript in Malayalam character, belonging to the palace. At the instance of the Palace Sarvadhikaryakār the manuscript was lent to me by Mr. Sankara Sastri, the reader of the work in the temple. Two manuscripts were consulted for the preparation of the commentary; one of them was obtained from the Palace Library and the other from the Anantapuram Kottaram, Haripad.

The present work, a sweet and simple Champukāvya, written by the author of the Bhaktimanjari, treats of the incarnation of the God Padmanābha and similar matters. The work consists of ten stabakas and the subjects dealt with respectively are the juvenile sport of the God, His divine appearance, description of the divine body from head to foot, description of the Kshetra, the holy tank, the festivals, the hunting ceremony, the Arat procession, the bathing in the sea and the Lakshadîpa festival.

An account of the life of the author given in the introduction of the Bhaktimanjari is here reproduced for the convenience of the readers. The author, who was born under the auspices of the star Swati in the month of Mesha, 988 M. E. (1813 A. D) was the son of Her Highness Lakshmi Ranee, the then sovereign of Travancore. As there was no male heir at the time in the royal line and as the right to sovereignty therefore accrued to the author while yet in the mother's womb, His Highness is generally spoken as गर्भश्रीमान् (Garbhasrīman). Losing his royal mother at the early age of two, the author was brought up by his aunt, Parvati Ranee, the then Regent and his father, the well-known Rajaraja Varma Valia Koil Tampuran, of Changanasseri; and under his wholesome training he grew into a noble prince of high attainments. His Highness' knowledge

of languages extended to Malayalam, Sanskrit, English, Mahratti, Telugu, Kanarese, Tamil and Hindustani. The Maharajah also acquired proficiency in music (सङ्गीत) and poetry (साहित्य). By association with the British Residents, his tutor Mr. Subba Rao who was afterwards to become his Dewan, and his father and other worthy elders, aided in no small degree by his natural genius, the author was able to aquire knowledge of a high order in the art of Government, and at his sixteenth year he assumed charge of the State from the Regent. Magnanimity of character, courage, generosity, determination of will, righteousness and sympathy, all these qualities revealed themselves in His Highness even in boyhood. There is no necessity to describe, as it can easily be imagined, how brightly the Maharajah with the extensive knowledge he possessed, must have made these qualities shine in him after he ascended the throne. Even now the magnanimous deeds of this sovereign are often ardently admired and praised by the people. The Maharajah did not survive his thirtyfourth year of age. It was after he assumed the responsibility of Government that the royal author composed his famous works. It is indeed a matter for admiration, that this great king, by dint of his genius, was able in spite of his short life, to acquire knowledge of various arts and to find opportunities, in the midst of the cares of the State which he governed so well, for the composition of many works which have acquired for him his literary fame.

The following are his works:—

1. Padmanābha Sataka.
2. Syānandūrapuravarnana Prabandha.
3. Ajāmilopakhyāna.
4. Kuchelopākhyāna.
5. Sangīta Kīrtana in Sanskrit, Telugu and other languages.
6. Utsava Varnana Prabandha.
7. Bhaktimanjari.

The commentary is elaborate and brings out clearly the meaning of the text bearing testimony to the commentators' knowledge of Vyākaraṇa and other subjects. The high order of his learning can also be inferred from the fact that he was the teacher of Kāvya, Nātaka, Alankāra and Vyākaraṇa to his nephew, the late Kerala Varma Valia Koil Tampuran C. S. I. the poet and scholar.

Trivandrum,
29th November 1920. } T. GANAPATI SÂSTRÎ.

# निवेदनम् ।

१९०४ तमे क्रैस्ताब्दे प्रकाशितायां भक्तिमञ्जर्या उपोद्घाते योऽस्माभिर्ग्रन्थः स्यानन्दूरपुरवर्णनप्रबन्ध इति नाम्ना निर्दिष्टः स्वातिश्रीरामवर्मकुलशेखरवञ्चिमहाराजेन प्रणीतः, स एष तत्रभागिनेयस्य साम्प्रतिकमहामहिमश्रीमूलकरामवर्मकिरीटपतिवञ्चिमहाराजस्य पित्रा श्रीमता (चङ्गनाशेरि) राजराजवर्मदेवेन प्रणीतया व्याख्यया समेतः श्रीमहाराजशासनादिदानीं मुद्रयित्वा प्रकाश्यते ।

एतत्प्रबन्धप्रत्यहपारायणलक्षणं श्रीपद्मनाभस्य किमपि समाराधनं परमभागवतेन कविना व्यवस्थापितमद्यापि पद्मनाभमन्दिरे तदेकवृत्तिना ब्राह्मणकुलेनानुष्ठीयते ।

अस्यादर्शो राजकीयस्तालपत्रात्मकः केरलीयलिपिरेतत्पारायणिकेन श्रीशङ्करशास्त्रिणा मह्यमुपकृतो राजकुलसर्वाधिकारिमहाशयस्य नियोगात् । व्याख्यायास्तु द्वावादर्शावासादितौ — तत्रैको राजकीयग्रन्थशालीयः, अपरस्तु अनन्तपुराख्यपर्पराजकुलस्वामिकः ।

भक्तिमञ्जरीसोदर्येऽस्मिन् सरलोदारचारुणि चम्पुकाव्ये श्रीपद्मनाभस्याविर्भावादिकं वर्ण्यते । अस्य स्तबकेषु दशसु क्रमेण श्रीपद्मनाभस्य बालक्रीडा, प्रत्यक्षदर्शनं, केशादिपादस्तुतिः, क्षेत्रवर्णनं, तीर्थमाहात्म्यम्, उत्सवप्रशंसा, मृगयावर्णनम्, अभिषेकयात्रा, तीर्थाभिषेकः, लक्षदीपश्चेत्येते विषयाः प्रतिपाद्यन्ते ।

एतत्कवेर्जीवितचरितं भक्तिमञ्जर्युपोद्घाते निवेदितमेवेह प्रतिपत्तिसौकर्यार्थमनुवदामः । तद्यथा — अस्य कविः ९८८ कोलम्बाब्दे (१८१३ क्रैस्तवर्षे) मेषमासि स्वातिनक्षत्रे वञ्चिमहाराज्ञ्या लक्ष्मीदेव्या प्रसूतः । यदायं गर्भे स्थितः, तदैव राज्यस्वामिपुरुषान्तराभावाद् वञ्चिराज्यस्वामित्वमस्योपनतमित्ययं 'गर्भश्रीमान्' इति व्यवहृत आसीत् । द्वितीये वयसि मात्रा वियुक्तश्चायं मातृष्वस्रा श्रीपार्वतीराज्ञ्या प्रतिनिधीभूय स्वराज्ये पाल्यमाने, तया स्वपित्रा च पर्पराजवंश्येन (चङ्गनाशेरि) श्रीराजराजवर्मदेवेन चिन्त्यमानसकलयोगक्षेमः शुक्लचन्द्र इव वर्धमानः क्रमेण कलापूर्णो बभूव । कैरली, गैर्वाणी, आङ्गली, माहाराष्ट्री, आन्ध्री, कार्णाटी, द्रामिली, हिन्दुस्थानी

इत्यासु भाषासु एष निपुण आसीत्; सङ्गीतसाहित्ययोश्चास्यासाधारणं पाण्डित्यमुपजातम्। एष सम्राट्पक्ष्याधिकारिणां, स्वमहामात्यीभविष्यतः स्वगुरोः श्रीसुब्बरायस्य, स्वगुरुजनस्य च संस्तवात् सहजप्रतिभोपस्कृताद् राज्यतन्त्रविज्ञानं सर्वातिशायि लेभे; षोडशे च वयसि स्वप्रतिनिधिसकाशाद् राज्यमङ्गीचकार। गाम्भीर्यं, धैर्यम्, औदार्यं, दयालुत्वम्, अप्रतिहतशासनत्वं, धार्मिकत्वमित्यादयो महागुणाः शिशुभावेऽप्यस्याभिव्यक्ता आसन्। तानयं सिंहासनारूढो बहुविधविज्ञानराशिश्च सन् कियदिवाशोभयदिति वचनाद् वरमूहेनावगन्तुम्। अपदानं चास्य महानुभावतोचितमुच्चावचमद्यापि जानपदाः कथागोष्ठीषु वर्णयन्ति। अथायं वयसि चतुस्त्रिंशे स्वर्गमारुरोह। राज्यप्राप्तेश्च परतः साहित्यसङ्गीतयोर्बह्वीः कृतीरेष श्लाघनीयाः प्रणिनाय। विस्तीर्णा खल्वेषा भूमिराश्चर्यस्य — यदेष मेधावी जीवितकालेऽल्पीयसि बहुकलाभिज्ञो भूत्वा राज्ययोगक्षेमं सम्यक् चिन्तयन् बहुकाव्यकर्तृत्वख्यातेर्भाजनं बभूव। महाराजस्य कृतयश्च —

१. पद्मनाभशतकम्.

२. स्यानन्दूरपुरवर्णनप्रबन्धः.

३. अजामिलोपाख्यानम्.

४. कुचेलोपाख्यानम्.

५. सङ्गीतकीर्तनानि (संस्कृत अन्ध्रयादिभाषासु च).

६. उत्सववर्णनप्रबन्धः (संस्कृतकेरलभाषोभयरूपः).

७. भक्तिमञ्जरी.

इत्येता भवन्ति। इति।

व्याख्या तु विपुला मूलार्थविशदीकरणक्षमा प्रणेतुर्व्याकरणादिपरिज्ञानं व्यक्तं गमयति। स खल्वतीतस्यातीतवञ्चिमहाराज्ञीपतेर्विद्वद्वरस्य सुकवेः केरलवर्मदेवस्यात्मभागिनेयस्य काव्यनाटकालङ्कारव्याकरणेष्वध्यापकोऽभवदित्यतोऽपि शक्यम् ऊहितुं तस्य पाण्डित्यम्।

अनन्तशयनम्
१-१२-१९२०

त. गणपतिशास्त्री.

॥ श्रीः ॥

स्वातिश्रीरामवर्मकुलशेखरवञ्चिमहाराजप्रणीतः

# स्यानन्दूरपुरवर्णनप्रबन्धः

श्रीराजराजवर्मदेवप्रणीतया सुन्दर्याख्यया व्याख्यया समेतः ।

---

लक्ष्मीं दद्यादजस्रं जलनिधितनयादृक्चकोरप्रसन्न-
ज्योत्स्नाभूताखिलोन्मादनचणविलसन्मन्दहासो नितान्तम् ।
वाणीं चात्मीयलोकोत्तरचरितसुधाकीर्तने तत्परां मे
श्रीमानाशीविषाधीश्वरकृतशयनः सत्वरं पद्मनाभः ॥ १ ॥

लक्ष्मीवक्षोजकुम्भद्वयरभसपरीरम्भमन्देतरान-
न्दोद्यद्रोमाञ्चपालीपरिवृतसुमनोहारिगण्डद्वयेऽपि ।
संचुम्बन्त्यां तु तस्यां द्विगुणितपरमानन्दसम्पूर्णचित्तः
स्यानन्दूरालयेशो दिशतु मम शिवं सत्वरं पद्मनाभः ॥ १ ॥

करबदरवदास्ते यद्दृशोर्योगिमुख्यै-
रतिकरणपदार्थः श्रीशुकाद्यैश्च मृग्यः ।
स हि गुणगणसिन्धुर्वञ्चिभूपालतातो
जयति नृपतिवर्यो राजराजाभिधानः ॥ २ ॥

तद्भागिनेयस्य च भागिनेयस्तथैव नाम्ना खलु राजराजः ।
विद्वज्जनानन्दनहेतुभूतां वञ्चीशचम्पूं विवृणोति मोदात् ॥ ३ ॥

विद्याजालमहोदधेः कविकुलश्रेणीशिरोलङ्कृते-
र्नानासद्गुणसञ्चयैकवसतेर्वञ्चिक्षमाधीशितुः ।
काव्यं तद् विबुधोपलभ्यविलसद्गूढार्थरत्नाकरं
लक्ष्मीनाथकृपातरीवरबलान्नूनं तरिष्याम्यहम् ॥ ४ ॥

G. P. T. 1762. 500. 23-1-20. B

श्रीवञ्चिभूपालकृतप्रबन्धगूढार्थविद्याविरहातुराणाम् ।
मोदाय कुर्वे खलु सुन्दरीं तां व्याख्यामलङ्कारमनोहराङ्गीम् ॥ ५ ॥

उदिता खलु राजराजनाम्नः सरसालङ्करणाविभूषिताङ्गी ।
अतिचारुपदा तु सुन्दरीयं रसिकानां वितनोतु मोदभारम् ॥ ६ ॥

अत्र तावन्निजचरणारविन्दवन्दिसकलजनपापजालतूलसमीरणायितस्य विष्णोः परमात्मनः श्रीपद्मनाभस्य एतत्स्यानन्दूरपुरकृतार्थीकरणप्रतिपादकीभूतां परममङ्गलां गाथां प्रबन्धरूपतया चिकीर्षुः सूरिवरनिकरशिरःकिरीटखचितहीरवरभूतः श्रीपद्मनाभचरणारविन्दामन्दतरभक्तिभारसन्तुष्टतत्कृपापूरावाप्तकविताकल्पलतोपन्नमहीरुहीभूतः श्रीमत्कुलशेखररामवर्मवञ्चिवसुन्धरापालकश्चिकीर्षितग्रन्थाविघ्नपरिसमाप्त्यादिसिद्धये इष्टदेवतानुस्मरणपूर्वकम् 'आशीर्नमस्क्रिया वस्तुनिर्देशो वापि तन्मुखम्' इति प्रबन्धमुखलक्षणानुसारेण प्रथमं लक्ष्मीवाणीप्रार्थनारूपामाशिषं प्रयुङ्क्ते — लक्ष्मीमिति । जलनिधितनयायाः दृशावेव चकोरौ दृक्चकोरौ तयोः प्रसन्नज्योत्स्नाभूतः अखिलोन्मादनचणः अखिलानां सर्वेषाम् उन्मादने अनात्मन्यात्माध्यासरूपे चित्तविभ्रमणे समर्थः । 'उन्मादश्चित्तविभ्रम' इत्यमरः । विलसन् शोभमानश्च यो मन्दहासः स यस्य स तथा । भगवन्मन्दहासस्य मायास्वरूपत्वाद् अखिलोन्मादनचण इत्युक्तम् । उक्तञ्च श्रीभागवते — 'हासो जनोन्मादकरी च माये'ति । श्रीमान् सर्वदापि वक्षःस्थले निषण्णया श्रिया विशिष्ट इत्यर्थः । आशीविषाधीश्वरे सर्पाधीश्वरे अनन्ते कृतं शयनं येन स तथा तादृशः । पद्मनाभः सकलप्रपञ्चविधातृविरिञ्चोत्पत्तिस्थानपद्महेतुभूतनाभित्वात् सकलजगत्कारणभूत इति भावः । मे मम । अजस्रमनवरतम् । 'नित्यानवरताजस्रामि'त्यमरः । लक्ष्मीं श्रियम् । दद्यात् दिशतु । सत्वरं तूर्णम् । 'सत्वरं चपलं तूर्णमि'त्यमरः । वाणीं वाचं च । अत्रापि दद्यादित्यनुषज्यते । पद्मनाभचरितकीर्तनस्यारब्धत्वेन वाण्या अविलम्बेनैवावश्यकत्वादत्र सत्वरशब्दप्रयोगः । कीदृशीं वाणीमित्यत्राह — आत्मीयेति । आत्मीया स्वकीया, लोकोत्तरा लोकोत्कृष्टा च, या चरितसुधा सुधासदृशचरितं, सुधा यथा रसनेन्द्रियस्यानन्दकरी तथा श्रोत्रेन्द्रियस्यानन्दकरमित्यर्थः, तस्य कीर्तने वर्णने । नितान्तम् अत्यन्तम् तत्परां सश्रद्धां, न तु योषिदादिदुर्विषयवर्णनपरामित्यर्थः । अत्र जलनिधीत्यादिविशेषणेन भगवतो मन्द-

अस्ति ध्वस्तसुपर्वनाथनगरश्रीगर्वभारं परं
दुग्धाम्भोनिधिकन्यकानवरतक्रीडार्थसौधायितम् ।
स्यानन्दूरमिति श्रुतं त्रिभुवने पुण्यस्थलं निस्तुलं
यत्रास्ते जगदीश्वरः स भगवान् श्रीपद्मनाभो हरिः ॥

---

हासवत्त्वोक्त्या समीचीनावसरवत्त्वसूचनेन प्रार्थितार्थप्रयत्नसिद्धिर्द्योत्यते । 'अवसरभणिता भणितिर्गुणगणरहितापि रोचते पुंसामि'त्युक्तत्वात् । श्रीमानिति विशेषणेन लक्ष्मीदानसौकर्यं प्रदर्शितम् । आशीविषेत्यादिविशेषणेनात्यन्तवाग्मिनोऽनन्तस्यापि भगवता अधःकृतत्वोक्त्या वाणीदानसौकर्यं च प्रकटितम् । अत्र लक्ष्मीवाण्योरेककालीनप्रार्थनाविषयत्वेन प्रस्तुतयोर्दानकर्मत्वरूपधर्मैक्यात् प्रस्तुततुल्ययोगितालङ्कारः । 'वर्ण्यानामितरेषां वा धर्मैक्यं तुल्ययोगिते'ति तल्लक्षणात् । श्रीमानिति विशेषणस्य लक्ष्मीदानसौकर्याभिप्रायगर्भत्वाद् आशीविषेत्यादिविशेषणस्य वाणीदानसौकर्याभिप्रायगर्भत्वाच्च परिकरालङ्कारः । 'अलङ्कारः परिकरः साभिप्राये विशेषणे' इति तल्लक्षणात् । दृक्चकोरेत्यत्रानुभयताद्रूप्यरूपकं, चरितसुधेत्यत्रोपमा चेति तेषां संसृष्टिः । स्रग्धरानामकं वृत्तम् । 'म्रभ्नैर्यानां त्रयेण त्रिमुनियतियुता स्रग्धरा कीर्तितेयमि'ति तल्लक्षणात् ॥ १ ॥

अथ कथानायकं श्रीपद्मनाभं कतिभिश्चित् श्लोकैर्वर्णयिष्यन् तदुपोद्घातत्वेन तदधिष्ठानं प्रथमं निर्दिशति — अस्तीति । ध्वस्तो विनाशितः, सुपर्वनाथनगरस्य देवेन्द्रपुरस्य श्रिया कान्त्या यो गर्वभारः, स येन तत् तथा । परम् उत्कृष्टम् । दुग्धाम्भोनिधिकन्यकायाः श्रीभगवत्याः अनवरतम् अजस्रं या क्रीडा तदर्थं यत् सौधं तद्वदाचरितं तथाभूतमित्यर्थः । स्यानन्दूरमिति, त्रिभुवने त्रिलोके । श्रुतं प्रसिद्धम् । निस्तुलं निरुपमम् । तत् पुण्यस्थलमस्ति । निस्तुलमित्यस्य ध्वस्तसुपर्वनाथनगरश्रीगर्वभारमित्यस्य च समर्थनीयार्थत्वात् समर्थयते — यत्रेत्यादिना । जगतां लोकानामीश्वरः स्वामी । भगवान् ऐश्वर्यादिषट्कपरिपूर्णः । हरिः निजचरणारविन्दसेवकसकलजनपापहर्ता । सः वक्ष्यमाणसकलगुणविशिष्टः श्रीपद्मनाभः । यत्र स्यानन्दूरपुराह्वयपुण्यस्थले । आस्ते

**सोऽयं स्वीयपदारविन्दयुगलध्यानैकसक्तात्मनां**
**नृणां काममकामितानपि दिशन् भोगानिहान्ते पुनः ।**
**सच्चिन्मोदमयीं निवृत्तिरहितां मुक्तिं ददाति स्वयं**
**श्रीमानत्र परां किमर्थ्यमपरं लोके शुभं जन्तुभिः ॥ ३ ॥**
**यत्कान्तिप्रचुरामृतौघलहरीमास्वाद्य दृग्भ्यां गता-**
**स्तृप्तिं नैव विरिञ्चपञ्चशरजिच्छक्रादयोऽद्यापि हि ।**

---

तिष्ठति । अत्र काव्यलिङ्गालङ्कारः । 'समर्थनीयस्यार्थस्य काव्यलिङ्गं समर्थनमि'ति तल्लक्षणात् । सौधायितमित्यत्रोपमा चेति तयोः संसृष्टिः ॥ २ ॥

**सोऽयमिति** । श्रीमान् लक्ष्मीविशिष्टः । सः पूर्वोक्तस्यानन्दूरपुराह्वयपुण्यस्थलस्थितः । अयं श्रीपद्मनाभः । इह स्यानन्दूरपुरे । अत्र अस्मिन्नेव जन्मनि । स्वीयमात्मीयं यत् पदारविन्दयुगलं पादपद्मयुग्मं तस्य ध्याने एकत्र सक्त आसक्त आत्मा अन्तःकरणं येषां ते तथा तादृशानाम् । नृणां नराणाम् । अकामितानपि *अनिच्छितानपि । भोगान् सुखानि । निकामम् अधिकं । दिशन् सन् । पुनः अन्ते तेषां भोगावसानकाल इत्यर्थः । सच्चिन्मोदमयीं सन्मयीं सत्स्वरूपां कालत्रयेऽपि अबाधितामित्यर्थः, चिन्मयीं शुद्धचैतन्यस्वरूपां, मोदमयीं परमानन्दस्वरूपाम् । निवृत्तिरहितां निवृत्त्या पुनरावृत्त्या रहितां वर्जिताम् । पराम् उत्कृष्टां, धर्मार्थकाममोक्षाख्यचतुर्विधपुरुषार्थेषु मध्ये परमपुरुषार्थभूतामित्यर्थः । मुक्तिं मोक्षम् । स्वयं तत्कृतयाचनां विनैवेत्यर्थः । ददाति दिशति । लोके भुवने । जन्तुभिः शरीरिभिः । अपरमन्यत् , भोगापवर्गाभ्यामिति शेषः । किं शुभं मङ्गलम् । अर्थ्यं प्रार्थनीयम् , अस्तीति शेषः । सर्वैरप्यर्थनीययोः भोगापवर्गयोरर्थनां विनैव सिद्धत्वे तदतिरिक्तार्थनीयवस्त्वभावेन भगवत्पादारविन्दसेवका यावदर्थनीयवस्तुसम्पन्ना भवन्त्येवेति भावः ॥ ३ ॥

**यदिति** । विरिञ्चः ब्रह्मा, पञ्चशरजित् परमेश्वरः, शक्र इन्द्रः, एते आदयः प्रथमा येषां ते तथा, देवा इति शेषः । दृग्भ्यां नयनाभ्यां । यस्य श्रीपद्मनाभस्य कान्तिमयः शोभामयः यः प्रचुरामृतौघः अधिकपीयूषसमूहः तस्य

---

* अनिच्छितान् अनीप्सितान् । अनिच्छाशब्दात् तारकादित्वाद् इतच्प्रत्ययः ।

सोऽयं दर्पककोटिसुन्दरवपुः श्रीपद्मनाभो विभा-
त्यस्मद्दृक्पथगोचरो भुवि ततो धन्या वयं सर्वथा ॥ ४ ॥
लोके यस्य नरस्य हन्त रसनाप्रान्ते जगन्मङ्गलं
स्यानन्दूरपतेर्लसत्यविरतं नामाखिलानन्ददम् ।
तेनैवास्वादिता सुधा जलनिधेर्जातं त्वमर्त्याः किम-
प्यश्नन्तो मुदमाप्नुवन्ति हि सुधाभ्रान्त्यैव हन्तानिशम् ॥

या लहरी प्रवाहः ताम् । आस्वाद्य पीत्वा । अद्यापि, तृप्तिं तर्पणम् । न गता एव न प्राप्ता एव । दर्पककोटिवत् कामकोटिवत् सुन्दरं वपुः शरीरं यस्य सः तथा । सः विरिञ्चादिदेवानामप्यतृप्तिसम्पादककान्तिविशिष्ट इत्यर्थः । अयं श्रीपद्मनाभः । भुवि भूमौ । अस्माकं दृक्पथस्य दृष्टिमार्गस्य गोचरः विषयीभूतः । विभाति शोभते । हि यस्मात् । ततः तस्माद्धेतोः । वयं सर्वथा सर्वप्रकारेणापि । धन्याः सुकृतिनः । 'सुकृती पुण्यवान् धन्य' इत्यमरः । अत्रास्वादनरूपकारणसत्त्वेऽपि तृप्तिरूपकार्यानुत्पत्त्युक्त्या विशेषोक्तिरलङ्कारः । 'कार्याजनिर्विशेषोक्तिः सति पुष्कलकारणे' इति तल्लक्षणात् । कान्तिप्रचुरामृतौघेत्यत्र रूपकं चेति तयोरङ्गाङ्गिभावेन सङ्करः । दर्पककोटिसुन्दरवपुरित्यत्रोपमा च ॥ ४ ॥

लोक इति । जगतां लोकानां मङ्गलं शुभावहमित्यर्थः । अखिलान् समस्तानानन्दान् ददातीत्यखिलानन्ददम् । स्यानन्दूरपतेः श्रीपद्मनाभस्य । नाम, लोके भुवने । यस्य, नरस्य मानुषस्य । रसनाप्रान्ते जिह्वाग्रे । अविरतम् अजस्रम् । लसति शोभते । यः सर्वदा श्रीपद्मनाभनाम जपतीत्यर्थः । तेनैव श्रीपद्मनाभनामलसनस्थानभूतजिह्वाग्रेण नरेणैव, नत्वन्येनेत्यर्थः । सुधा अमृतम् । आस्वदिता पीता । ननु देवानामेवामृतान्धस्त्वप्रसिद्धौ कथं तेनैवेत्युक्तिः सङ्गच्छत इत्यत आह — जलनिधेरिति । अमर्त्याः पुनः, जलनिधेः समुद्राद्, लळयोरभेदात् जळनिधेरिति च । अत्र श्लिष्टजलनिधिशब्दप्रयोगाद् वक्ष्यमाणतदुद्भूतवस्तुनोऽत्यन्तापकृष्टत्वं सूच्यते । जातम् उद्भूतम् । किमपि यत्किञ्चिद् वस्तु । (विशेषं!) सुधाभ्रान्त्यैव पीयूषभ्रमेणैव, न तु परमार्थत इत्यर्थः । अश्नन्तः भक्षयन्तः सन्तः । अनिशम् अजस्रम् । मुदं वयं खल्वमृतान्धस इत्येतादृशं सन्तोषम् । आप्नुवन्ति ।

जाया यस्य जगत्पतेर्भगवती सम्पत्स्वरूपा गृहं
त्रैलोक्यं तनयौ विरिञ्चमदनौ भृत्याः सुरेन्द्रादयः ।
दिव्यज्ञानसमेतनारदमुखा यस्येशितुर्वन्दिनो
माहात्म्यं खलु तस्य वक्तुममितं को वा पटुः स्याद् भुवि ॥

अम्भोधिः खलु भङ्गवान् हिमकरो दोषाकरो भास्करः
कामं तापितलोकराशिरनिशं पाशी जडात्मा स्फुटम् ।

हन्त कष्टम् । तान् प्रति जुगुप्सोक्तिरियम् । अत्र भगवन्नाम्नि सुधात्वारोपार्थं सुधायां सुधात्वापह्नवस्य भ्रान्तिपदेनाविष्करणात् पर्यस्तापह्नुतिरलङ्कारः । 'अन्यत्र तस्यारोपार्थः पर्यस्तापह्नुतिस्तु सः' इति तल्लक्षणात् । जगन्मङ्गलकरे नाम्नि मङ्गलत्वारोपाद्धेत्वलङ्कारश्च । 'हेतुहेतुमतोरैक्यं हेतुं केचित् प्रचक्षते' इति तल्लक्षणात् ॥ ५ ॥

जायेति । जगत्पतेः लोकनाथस्य । यस्य श्रीपद्मनाभस्य । जाया भार्या । सम्पत्स्वरूपा भगवती श्रीभगवतीत्यर्थः । गृहं भवनं । त्रैलोक्यम् । सर्वत्रापि यस्येत्यनुषज्यते । तनयौ पुत्रौ । विरिञ्चमदनौ कमलासनकामदेवौ । भृत्याः किङ्कराः । सुरेन्द्रादयः देवेन्द्रप्रमुखाः । दिव्यज्ञानेनातीतानागतस्थूलसूक्ष्मव्यवहितविप्रकृष्टादिसकलविषयज्ञानेनेत्यर्थः समेताः युक्ताः नारदमुखाः श्रीनारदप्रभृतयः, मुनय इति शेषः । ईशितुरीश्वरस्य । यस्य श्रीपद्मनाभस्य । वन्दिनः स्तुतिपाठकाः । तस्य उक्तसकलगुणविशिष्टस्य । श्रीपद्मनाभस्येत्यर्थः । अमितम् अनल्पं । माहात्म्यं वक्तुम्, भुवि भूमौ । को वा, पटुः समर्थः । स्यात्, न कोऽपीत्यर्थः । एतेन विनयप्रदर्शनं कृतम् ॥ ६ ॥

अम्भोधिरिति । अम्भोधिः समुद्रः खलु । भङ्गवान् तरङ्गवान् । 'भङ्गस्तरङ्ग ऊर्मिर्वा स्त्रियां वीचि'रित्यमरः । नाशवानिति च । हिमकरः चन्द्रः । दोषाकरो रात्रिकरः, दोषाणामाकर उत्पत्तिस्थानमिति च । भास्कर आदित्यः । काममत्यधिकम् । तापितो लोकराशिः भुवनसमूहो येन तादृशः । पाशी वरुणः । अनिशम् अजस्रम् । स्फुटं व्यक्तम् । जडात्मा सलिलस्वरूपः वरुणशरीरस्य जल-

यक्षेशस्तु कुबेर इत्यलमहो साक्षाद् यथार्थाह्वय-
स्तद् ब्रूमो वयमब्जनाभसमतां केनेह लोकत्रये ॥ ७ ॥

कुर्वाते चरणौ किलास्य जगतीभर्तुः सुरक्तावपी-
हासक्तान् परमात्मनि प्रतिमुहुर्भक्तान् विरक्तानलम् ।
तत्रस्थो नखचन्द्रमा बत तमो योगीन्द्रचेतोगतं
कृत्स्नं च ग्रसतीत्यतीव तदिदं चित्रं सदा भाति मे ॥ ८ ॥

---

मयत्वात् । अज्ञस्वरूप इति च । यक्षेशः वैश्रवणस्तु । अलम् अधिकम् । कुबेरः कुत्सितकलेबरः । इति एवम् । साक्षात् प्रत्यक्षेण । यथार्थाह्वयः अन्वर्थसंज्ञः । नामश्रवणमात्र एव स्फुटदूषण इति भावः । यथार्थाह्वय इति सर्वत्र योज्यम् । तत् तस्माद्धेतोः । अहो इति सम्बोधनम् । हे जना इत्यर्थः । वयम् इहास्मिन् लोकत्रये । केन, अब्जनाभसमतां श्रीपद्मनाभसाम्यम् । ब्रूमः वदामः, न केनापीत्यर्थः ॥ ७ ॥

कुर्वाते इति । जगतीभर्तुः जगन्नाथस्य । अस्य श्रीपद्मनाभस्य । चरणौ पादौ । सुरक्तावपि सुतरां रक्तवर्णावपि । इह अस्मिन् लोके । परमात्मनि ईश्वरे । प्रतिमुहुः निरन्तरम् । आसक्तान् तत्परान् । भक्तान्, अलम् अधिकम् । विरक्तान् विगतरक्तवर्णान् विगतविषयादिस्नेहानिति च । कुर्वाते कुरुतः । तत्रस्थः चरणस्थित इत्यर्थः । नखचन्द्रमाः नखचन्द्रः । योगीन्द्राणां योगिश्रेष्ठानां चेतोगतं हृदयस्थितम् । तमः राहुम् अज्ञानमिति च । कृत्स्नं सर्वम् । ग्रसति निगिरतीत्यर्थः । विनाशयतीति च । इति एवम् । तत् पूर्वोक्तविरक्तीकरणम् इदं तमोग्रसनं च । मे मम । सदा अतीव चित्रम् अद्भुतम् । भाति प्रतीयते । सुरक्तः कथं विरक्तीकरोति, राहोश्चन्द्रग्रसनसामर्थ्यवत्त्वेऽपि चन्द्रस्य राहुग्रसनसामर्थ्यं कथं वा सम्भवतीति च सर्वदापि विस्मययुक्तो भवामीत्यर्थः । सुरक्तावपि विरक्तान् कुर्वाते इत्यादौ विरोधाभासालङ्कारः । 'आभासत्वे विरोधस्य विरोधाभास इष्यते' इति तल्लक्षणात् । नखचन्द्रमा इत्यत्र रूपकं चेति तयोः संसृष्टिः ॥ ८ ॥

अम्भोधिः खलु गोष्पदस्य समतां धत्ते कृपापेक्षया
यस्याशेषचराचरात्मकजगत्सम्पूर्णसत्त्वात्मनः ।
सोऽयं दीनजनावनैकनिरतः श्रीपद्मनाभो हरि-
र्लभ्यः स्यात् कथमत्र भाग्यरहितस्याहो जनस्यावनौ ॥९॥

आरामं गुणसञ्चयस्य सदनं मुख्यं सदाश्रेयसः
कारुण्यस्य तथाकरो निरवधेराधेर्हि सिद्धौषधम् ।
घोराघौघदवाग्निसञ्चयघनः संसारमेघानिलः
साक्षान्मूलधनं सतां विजयते श्रीपद्मनाभः प्रभुः ॥ १० ॥

अम्भोधिरिति । अम्भोधिः समुद्रः खलु । अशेषं समस्तं चराचरात्मकं स्थावरजङ्गमस्वरूपं यज्जगत् तत्र सम्पूर्णं यत् सत्त्वं सत्ता तत् आत्मनि यस्य स तथा । सकलजगत्स्वपि भगवत्सत्तातिरिक्तायाः सत्ताया अभावादिति भावः । अथवा अशेषचराचरात्मकजगत्सम्पूर्णः सत्त्वात्मा सत्त्वगुणप्रधानश्च यस्तादृशस्येत्यर्थः । यस्य श्रीपद्मनाभस्य । कृपापेक्षया दयामपेक्ष्येत्यर्थः । गोष्पदस्य गोष्पदपरिमितस्थानस्येत्यर्थः । समतां तौल्यम् । धत्ते दधाति । दीनजनानामवने पालने एकत्र निरत आसक्तः । हरिः । सः स्वकृपापेक्षया गोष्पदीभूतवारिधिः । अयं श्रीपद्मनाभः । अत्र अस्याम् । अवनौ भूमौ । भाग्यरहितस्य भाग्यहीनस्य जनस्य । कथं लभ्यः लब्धुं शक्यः स्यात्, न कथमपीत्यर्थः ॥ ९ ॥

आराममिति । गुणसञ्चयस्य गुणगणस्य । आरामम् आसमन्तात् रमन्तेऽस्मिन्निति व्युत्पत्त्या विहारस्थानभूतमित्यर्थः । सदातनस्य नित्यस्य श्रेयसः सदाश्रेयसः मोक्षस्येत्यर्थः । मुख्यं श्रेष्ठम् । सदनं गृहम् आवासस्थानभूतमित्यर्थः । तथा कारुण्यस्य दयायाः । आकर उत्पत्तिस्थानभूतः । निरवधेः अपारस्य । आधेः दुःखस्य । सिद्धौषधम् । घोरः यः अघौघः पापसञ्चयः तद्रूपस्य दवाग्निसञ्चयस्य वनवह्निसमूहस्य घनः मेघः । संसार एव मेघस्तस्यानिलः वायुः । मेघानिलौ यथा दवाग्निमेघौ नाशयतः तथायमघौघसंसारौ नाशयतीति भावः । सतां सज्जनानाम् । मूलधनं मूलद्रव्यम् । 'नीवी परिपणो मूलधनमि'त्यमरः । यथा लौकि-

श्रुत्योघोद्धरणोऽथ मन्दरधरो भूदाररूपो घन-
स्तम्भान्तोद्गतनारसिंहसुमहावर्ष्मा वटुर्भार्गवः ।
रक्षोनायककण्ठकृन्तनचणः श्रीरामचन्द्रस्तथा
सीरी नन्दसुतोऽथ कल्किरनिशं जीयादनन्तो हरिः ॥ ११ ॥

तस्य तु लोकत्रयेशस्य विश्वजगत्कारणभूतस्य भगवतः परमात्मनो वासुदेवस्यैतस्यानन्दूरपुरकृतार्थीकरणहेतुभूता परममङ्गलतरां गाथां वक्ष्यामि ॥ १ ॥

---

कानां मूलद्रव्यमतीवासक्तिविषयस्तथा सतामतीवासक्तिविषय इति भावः । प्रभुः नाथः श्रीपद्मनाभः । विजयते सर्वोत्कर्षेण वर्तत इत्यर्थः । अत्र रूपकालङ्कारः ॥ १० ॥

श्रुत्योघेति । श्रुत्योघस्य वेदसमूहस्य उद्धरणः उद्धर्ता । अथ मन्दरधरः मन्दरपर्वतधारी । भूदाररूपः वराहस्वरूपः । घनः दृढः यः स्तम्भः तदन्तर्भागाद् उद्गतमुद्भूतं नारसिंहं नरसिंहसम्बन्धि सुमहदतिघोरं च यद् वर्ष्म शरीरं तद् यस्य स तथा । वटुः वामनः । भार्गवः परशुरामः । रक्षोनायकस्य रावणस्य कण्ठकृन्तने कण्ठच्छेदने समर्थः । श्रीरामचन्द्रः । तथा, सीरी बलभद्ररामः । नन्दसुतः श्रीकृष्णः । अथ कल्किः, अनन्तः अनन्तस्वरूपः । हरिः श्रीपद्मनाभः । अनिशम् अजस्रम् । जीयात् सर्वोत्कर्षेण वर्ततामित्यर्थः । एतेन मत्स्याद्यवतारदशकमप्युक्तम् । अत्र रत्नावल्यलङ्कारः । 'क्रमिकं प्रकृतार्थानां न्यासं रत्नावलिं विदुरि'ति तल्लक्षणात् ॥ ११ ॥

अथ वक्ष्यमाणकथानिष्ठपरममङ्गलात्मकत्वादिप्रकटनेन श्रोतृणामौत्सुक्यसम्पादनपूर्वकं चिकीर्षितं प्रतिजानीते— तस्य त्वित्यादिना । लोकत्रयेशस्य अधोलोकमध्यमलोकोपरिलोकरूपलोकत्रयाधिपतेः । विश्वेषां सर्वेषां, 'विश्वमशेषं कृत्स्नमि'त्यमरः, जगतां लोकानां कारणभूतस्य । परमात्मनः वासुदेवस्य । तस्य भगवतः श्रीपद्मनाभस्य । एतस्य स्यानन्दूरपुरस्य कृतार्थीकरणे स्वाधिष्ठानतासम्पादनेन सफलीकरणे हेतुभूतां कारणीभूतां तत्प्रतिपादिकामि-

आसीद् दिवाकर इति प्रथितो हि पूर्व-
मानर्तसीम्नि विगतैहिकवस्तुसङ्गः ।
श्रीपद्मनाभचरणार्पितचित्तवृत्ति-
र्योगीश्वरः स्वमहसा तु यथार्थसंज्ञः ॥ १२ ॥

स्नात्वा प्रगे स्वनियमान् विधिवद् विधाय
पूजां चकार स विभोर्गरुडध्वजस्य ।
भक्त्या परं मुकुलिताक्षिपुटस्तदेक-
ध्याने निमग्नहृदयस्त्विह धन्यधन्यः ॥ १३ ॥

---

त्यर्थः । परममङ्गलाम् अतीव मङ्गलकारिणीं गाथां वक्ष्यामि । परममङ्गलामि-त्यत्र हेत्वलङ्कारः । 'हेतुहेतुमतोरैक्यमि'त्यादितल्लक्षणात् ॥ १ ॥

अथ कथामारभते — आसीदिति । विगतः निवृत्तः ऐहिकवस्तुषु स्रक्-चन्दनवनितादिविषयेषु यः सङ्गः आसक्तिः स यस्मात् स तथा । श्रीपद्मना-भस्य चरणयोः पादारविन्दयोः अर्पिता विन्यस्ता चित्तवृत्तिः मनोव्यापारो येन स तथा । स्वमहसा स्वतेजसा । यथार्थसंज्ञः अन्वर्थसंज्ञः । आदित्यवदतितेज-स्वित्वात् तस्य दिवाकर इति संज्ञा युक्तैवेति भावः । दिवाकर इति प्रथितः प्रसिद्धः । योगीश्वरः संन्यासिश्रेष्ठः । पूर्वं पुरा । आनर्तसीम्नि आनर्तप्रदेशे । आसीत् । वसन्ततिलकं वृत्तम् । 'उक्तं वसन्ततिलकं तभजा जगौ ग' इति लक्षणात् ॥ १२ ॥

स्नात्वेति । इह अस्मिन् लोके । धन्यधन्यः धन्येष्वपि धन्यः, अतीव सुकृतीत्यर्थः । 'सुकृती पुण्यवान् धन्य' इत्यमरः । सः दिवाकरयतीश्वरस्तु । प्रगे प्रातःकाले । 'सायं साये प्रगे प्रातः' इत्यमरः । स्नात्वा, स्वनियमान् परब्रह्मविचारादिस्वनित्यकर्माणि । विधिवत् यथाविधि । विधाय कृत्वा । परम् अधिकया भक्त्या । मुकुलिताक्षिपुटः निमीलितनेत्रसम्पुटः । तस्य ग-रुडध्वजस्य एकस्यैव ध्याने केशादिपादपर्यन्तविषयकनिरन्तरस्मरणे । निम-ग्नहृदयः निमग्नचित्तो भूत्वा । गरुडध्वजस्य श्रीपद्मनाभस्य । पूजां चकार कृतवान् ॥ १३ ॥

एवं समर्चयति निश्चलभक्तिभारे
तस्मिन् यतौ निजकृपावसरप्रतीक्षे ।
आविर्बभूव पुरतोऽस्य हरिः कदाचिद्
भक्तोत्तमस्य धृतकोमलबालवेषः ॥ १४ ॥

ततः स तु यतीश्वरः प्रमदभारपर्याकुल-
स्तदाश्रुभरितेक्षणः पुलकसंवृताङ्गो भृशम् ।
विलोक्य जगदीश्वरं भुवनमोहनं श्रीपतिं
क्षणं हहह चित्रवत् सपदि चाभवन्निश्चलः ॥ १५ ॥

---

एवमिति । निश्चलः अचञ्चलः भक्तिभारः भक्त्यतिशयो यस्य तादृशे । निजायाः आत्मीयायाः कृपायाः अवसरम् आगमनसमयं प्रतीक्षते प्रतिपालयतीति निजकृपावसरप्रतीक्षः तादृशे । मम भगवत्करुणालाभः कदा वा सम्भवतीति विचार्य सर्वदापि भगवत्करुणागमनमेव प्रतिपालयतीत्यर्थः । तस्मिन् यतौ दिवाकरे । एवं भक्त्येत्यादिपूर्वश्लोकोक्तप्रकारेण । समर्चयति पूजयति सति । हरिः श्रीपद्मनाभः । धृतः अवलम्बितः कोमलबालवेषः मनोहरबालस्वरूपो येन तादृशः सन् । भक्तोत्तमस्य भक्ताग्रगण्यस्य । अस्य दिवाकरयतीश्वरस्य । पुरतः पुरोभागे । आविर्बभूव प्रत्यक्षीबभूव ॥ १४ ॥

तत इति । ततः भगवदाविर्भावानन्तरं तु । सः यतीश्वरः दिवाकरः । जगदीश्वरं जगन्नाथम् । भुवनानां लोकानां मोहनम् । श्रीपतिं श्रीपद्मनाभम् । विलोक्य चाक्षुषप्रत्यक्षविषयतयैवानुभूय । प्रमदभारेण सन्तोषातिशयेन पर्याकुलः ससम्भ्रमचित्तः । अत एव अश्रुणा आनन्दबाष्पेण भरिते पूरिते ईक्षणे नयने यस्य तादृशः । भृशम् अधिकम् । पुलकेन रोमाञ्चेन संवृताङ्गः समावृतशरीरः । चित्रवद् आलेख्यवत् । क्षणं क्षणकालम् । निश्चलः अचञ्चलश्च अभवत् । हहह आश्चर्यम् । 'हहहेत्यद्भुते खेद' इत्यमरः । अस्य भक्तिरतीवाश्चर्यकारिणीति भावः । चित्रवदित्यत्रोपमालङ्कारः । पृथ्वीवृत्तम् । 'जसौ जसयला वसुग्रहयतिश्च पृथ्वी गुरुः' इति तल्लक्षणात् ।' १५ ॥

कस्त्वं ब्रूहि किशोर! कस्तव पिता माता च वाञ्छा च के-
त्युक्तो भक्तपरायणः स्मितरुचा प्रोचे मुनिं मोहयन्।
नो जाने पितरौ विहर्तुमिह तु प्राप्तोऽस्मि किन्तु त्वया
यास्याम्येव कदापि यद्यवमतो नैवावमानं सहे॥ १६॥

---

अथ भगवन्तं प्रति तस्य पृच्छाप्रकारं दर्शयति — **कस्त्वमिति**। **भक्तपरायणः** भक्तपराधीनः। हरिरिति शेषः। **किशोर**! बाल!। **त्वं कः**। **तव पिता** जनकः **कः**। **माता च** जननी च, **वाञ्छा च** इच्छा च **का**। भवतीति शेषः। अत्रोभयत्रापि तवेत्यनुषज्यते। **ब्रूहि** वद। **इति** एवम्प्रकारेण। **उक्तः** पृष्टः सन्। **स्मितरुचा** मन्दहासकान्त्या। **मुनिं** दिवाकरयतीश्वरम्। **मोहयन्** सम्मोहयन् सन्, स्वस्मिन्नेवानुरक्तचित्तं कुर्वन्निति यावत्। **प्रोचे** उक्तवान्। कस्तव पिता माता चेति प्रश्नस्योत्तरं दर्शयति— **नो** इति। **पितरौ** मातापितरौ। 'मातापितरौ पितरावि'त्यमरः। 'पिता मात्रा' इत्येकशेषः। **नो जाने** नैवावगच्छामि। कस्त्वमिति जातिपरिप्रश्नः। मातापितृज्ञानाभावे जातिज्ञानस्याप्यसम्भवाद् अहं क इति न जाने इत्यर्थो द्योत्यते। अत एव कस्त्वमिति प्रश्नस्योत्तरान्तरं न दर्शितम्। वाञ्छा च केति प्रश्नस्योत्तरं दर्शयति— **विहर्तुमिति**। **इह तु** त्वत्सकाशे तु। **विहर्तुं** क्रीडितुम्। **प्राप्तोऽस्मि** आगतोऽस्मि। अत्र मदागमनस्य विहारार्थकत्वं विना अन्यार्थकत्वं नास्तीति भावः। **किन्तु** विशेषतस्तु। **त्वया कदापि** कस्मिन्नपि काले। **अवमतः** अवमानितः **यदि**। **यास्याम्येव** गच्छाम्येव। तत् कुत इत्यत्राह — **नैवेति**। **अवमानं**, **नैव सहे** नैव क्षमे। बाल्यादारभ्य सर्वत्र सञ्चरिष्णुत्वादज्ञातपितृमातृको विहारमात्रापेक्षयात्र भवत्सकाशमागतोऽवमानासहिष्णुरहं भवता कदापि नावमन्ये चेदत्रैव क्रीडन् सन् वसामि, अन्यथान्यत्र गमिष्यामीति तात्पर्यार्थः। अत्र यास्याम्येवेत्यस्य नैवावमानं सह इत्यनेन समर्थनाद् वाक्यार्थहेतुककाव्यलिङ्गालङ्कारः। शार्दूलविक्रीडितं वृत्तम्। 'सूर्याश्वैर्मसजस्तताः सगुरवः शार्दूलविक्रीडितमि'ति लक्षणात्॥ १६॥

निवस निवस बाल! स्वैरमत्रैव नित्यं
विहर विहर विश्वानन्दमूर्ते! यथेच्छम् ।
अयि शिशुरसि चापल्येऽपि कस्तेऽवमन्ते-
त्यथ सकुतुकमाश्लिष्याङ्कमारोपयत् सः ॥ १७ ॥
आनन्दभूरिभरगद्गदकण्ठ एष
स्तोतुं क्षणं नतु शशाक कृपाम्बुराशिम् ।

---

अथ दिवाकरस्य प्रत्युत्तरप्रकारं दर्शयति — निवसेति । सः दिवाकरयतीश्वरः । विश्वानन्दमूर्ते! सर्वानन्दकरस्वरूपिन्! । अयि हे । बाल! शिशो! । अत्रैव मत्सकाश एव, नत्वन्यत्रेत्यर्थः । स्वैरं स्वतन्त्रतया । नित्यमनवरतम् । निवस निवस तिष्ठ तिष्ठ । यथेच्छम् इच्छाप्रकारम् । विहर विहर क्रीड क्रीड । स्वविहारार्थमत्रागतोऽतिमनोहरमूर्तिस्त्वं यथेच्छं क्रीडन् सन् मत्सकाश एव स्वतन्त्रतयानवरतं वस, किमर्थं वा अन्यत्र गमिष्यसीति परमोऽर्थः । नन्ववमान आगतश्चेन्मानिना मया कथमत्र स्थीयत इत्याशङ्कामवमानस्यात्यन्तासम्भावितत्वप्रतिपादनेन परिहरति — शिशुरिति । त्वं शिशुर्बालः । असि भवसि । ते तव । चापल्येऽपि चपलकर्मण्यपि । कः कीदृशः पुरुषः । अवमन्ता अवमानकर्ता । भवेदिति शेषः । न कोऽपीत्यर्थः । इति एवंप्रकारेण । उक्त्वेति शेषः । सकुतुकं सकुतूहलं यथा भवति तथा । आश्लिष्य आलिङ्ग्य । अङ्कम् उत्सङ्गम् । आरोपयत् समध्यरोहयत् । बालैः स्वाभाविकचपलकर्मसु कृतेष्वपि न कोऽपि जनोऽवमानकर्ता भविष्यति । एवञ्च मया वा अवमानः क्रियते । अतो भवतः अवमानागमनशङ्कैव मास्त्विति वदन् वात्सल्याधिक्यात् समालिङ्ग्य तं बालकं स्वाङ्कतलमध्यारोपयदित्यर्थः । मालिनीवृत्तम् । 'ननमयययुतेयं मालिनी भोगिलोकैः' इति लक्षणात् ॥ १७ ॥

आनन्देति । एषः दिवाकरयतीश्वरः । आनन्दस्य सन्तोषस्य भूरिभरेण अधिकभारेण गद्गदः स्खलितः कण्ठः लक्षणया कण्ठध्वनिः यस्य स तादृशः सन् । कृपाम्बुराशिं दयापयोनिधिम् । निगमस्वरूपं वेदस्वरूपम् । तं, बालकमिति शेषः । स्तोतुं वर्णयितुम् । क्षणं क्षणकालम् । नतु शशाक नैव शक्तोऽभूत् । भूयः तदनन्तरम् । स दिवाकरयतीश्वरः । तस्य बालकस्य मुखाब्जे

भूयः स दत्तनयनः खलु तन्मुखाब्जे
तुष्टाव दिव्यनुतिभिर्निगमस्वरूपम् ॥ १८ ॥

ततः प्रभृति प्रतिदिनं तस्य तु धन्यतमस्य यतीश्वरस्य पूजावसरे वक्ष्यमाणातिमनोहररूपो विललास स भगवान् भक्तवत्सलः ॥ २ ॥

लोलम्बसञ्चयसितेतरकेशभार-
व्याबद्धकोमलशिखावलिपिञ्छजालः ।

---

वदनारविन्दे । दत्तनयनः विन्यस्तदृष्टिः सन् । दिव्यनुतिभिः उत्तमस्तोत्रैः । तुष्टाव स्तुतिं कृतवान् । आनन्दाधिक्येन स्खलितकण्ठतया यत्किञ्चिद् वक्तुमप्यशक्तः सन् क्षणकालं भगवन्तं नावर्णयत्, तदनन्तरं स्तोत्रमुख्यैः स्तुतिं कृतवानित्यर्थः ॥ १८ ॥

अथैतादृशबालकस्वरूपं तं भगवन्तं नवभिः श्लोकैर्वर्णयिष्यन्नाह—तत इति । भक्तवत्सलो भक्तवात्सल्यशाली । भगवान् ऐश्वर्यादिषट्कपरिपूर्णः । सः श्रीपद्मनाभः । ततःप्रभृति तस्मादारभ्य । प्रतिदिनं दिनेदिने । धन्यतमस्य अतीव सुकृतिनः । तस्य यतीश्वरस्य दिवाकरस्य । पूजावसरे पूजाकाले । वक्ष्यमाणातिमनोहरमूर्तिः लोलम्बेत्यादिवर्णयिष्यमाणात्यन्तसुन्दरस्वरूपः सन् । विललास विलासं कृतवान् ॥ २ ॥

अथ वर्णनमारभते — लोलम्बेति । 'एवंविधो भुवनमोहनमूर्तिरेष योगीश्वरस्य पुरतो विजहार देव' इति नवमश्लोके वक्ष्यमाणतया तत्रत्यदेवशब्दविशेषणानि लोलम्बेत्यादीन्येतानि सर्वाणि । लोलम्बसञ्चयवत् भ्रमरसमूहवत् सितेतरेण असितेन कृष्णवर्णेनेत्यर्थः केशभारेण केशसमूहेन व्याबद्धं सम्बद्धं यच्छिखावलानां मयूराणां पिञ्छजालं बर्हसमूहः तद् येन स तथा । 'शिखावलः शिखी केकी', 'शिखण्डस्तु पिञ्छबर्हे', 'जालं समूह आनाय' इति चामरः । केशं द्वेष्टीति केशद्विट् । असत्तोऽप्यधिकमनोहरताशाली अयं केशसमूहोऽस्मन्मनोहरताकीर्त्तिमपहरतीति मत्सराद् भगवत्केशसमूहं प्रति द्वेषं कुर्वाणस्येत्यर्थः । अस्य पिञ्छजालस्य । बन्धनं युक्तं न्याय्यम् । खल्वित्यवधारणे, न्याय्यमेवेत्यर्थः । इत्थम् एवंप्रकारिकाम् । मतिं ज्ञानम् । मुनेः दिवाकरयतीश्व-

केशद्विषोऽस्य खलु बन्धनमेव युक्त-
मित्थं मुनेर्मतिमिव स्वयमादधानः ॥ १९ ॥
लोलासितातिकुटिलालकसञ्चयेन
विष्वक्समावृतमनोहरवक्त्रभासा ।
निन्दन् प्रभातसमये मधुपानलोभ-
सम्प्राप्तषट्पदकुलावृतपुण्डरीकम् ॥ २० ॥
राजन्मनोहरनिटालविराजमान-
सद्वृत्तदिव्यरुचिचन्दनबिन्दुकान्त्या ।

---

रस्य । स्वयम् आत्मनैव । आदधानः कुर्वाण इवेत्युत्प्रेक्षा । सम्पादयन्निवेत्यर्थः ।

"विधाय वैरं सामर्षे नरोऽरौ य उदासते ।
प्रक्षिप्योदर्चिषं कक्षे शेरते तेऽभिमारुतम् ॥"
"पादाहतं यदुत्थाय मूर्धानमधिरोहति ।
स्वस्थादेवावमानेऽपि देहिनस्तद्वरं रजः ॥"

इत्यादिन्यायात् केशद्वेषिण्यस्मिन् पिञ्छजाले उदासीनितां विना केशेनैव बन्धनं न्याय्यतरमेवेत्येतादृशार्थबोधं मुनिहृदये कुर्वाण इत्यर्थः । लोलम्बसञ्चयासितेतरेत्यत्र वाचकलुप्तोपमालङ्कारः ॥ १९ ॥

लोलेति । लोलानां चञ्चलानाम् असितानाम् कृष्णवर्णानाम् अतिकुटिलानाम् अतिवक्राणां च अलकानां चूर्णाकारकेशविशेषाणाम्, 'अलकाश्चूर्णकुन्तला' इत्यमरः, सञ्चयेन समूहेन । विष्वक् परितः समावृतं परिवेष्टितं मनोहरं सुन्दरं च यद् वक्त्रं मुखं तस्य भासा कान्त्या । प्रभातसमये प्रातःकाले । मधुपानलोभेन मकरन्दपानेच्छया सम्प्राप्ताः सङ्गताः ये षट्पदाः भ्रमराः तेषां कुलेन समूहेन आवृतं परिवेष्टितं पुण्डरीकम् । निन्दन् तिरस्कुर्वन्, ततोऽप्यधिकमनोहरमुख इत्यर्थः । अत्र लोलेत्यादिसाधारणधर्मविशिष्टालकसञ्चयसमावृतभगवन्मुखस्य मकरन्दपानेच्छासमागतभ्रमरसमूहपरिवेष्टितप्रभातकालावच्छिन्नपुण्डरीकसादृश्यप्रतीतेरुपमालङ्कारः । 'यथाकथञ्चित् सादृश्यं यत्रोद्भूतं प्रतीयते । उपमा नाम सा ज्ञेये'त्युक्तत्वात् ॥ २० ॥

राजदिति । राजति शोभमाने मनोहरे सुन्दरे च निटाले निटिले,

सम्यक्तिरस्कृततरासितकान्तिकान्त-
जीमूतबृन्दचरपूर्णसुधामयूखः ॥ २१ ॥
चिल्लीलतायुगनिषूदितशम्बरारि-
लोकैकमोहनशरासनगर्वभारः ।
चिल्लीनतापसहृदम्बुजराजहंसः
कल्याणदिव्यगुणराशिरिहाघवैरी ॥ २२ ॥

---

ललाट इत्यर्थः, विराजमानस्य शोभमानस्य सद्वृत्तस्य समीचीनवर्तुलाकारस्य दिव्यरुचेः उत्तमकान्तेः चन्दनबिन्दोः चन्दनतिलकस्य कान्त्या शोभया । सम्यक् नितरां तिरस्कृततरः अधिकं तिरस्कृतः असितकान्त्या श्यामशोभया कान्ते मनोहरे जीमूतबृन्दे मेघसमूहे चरतीति जीमूतबृन्दचरः, नीलजीमूतबृन्दमध्यस्थित इति यावत्, यः पूर्णसुधामयूखः पूर्णचन्द्रः स येन तादृशः । अत्रापि भगवल्ललाटस्यातिनीलत्वात् तन्मध्यगतातिमनोहरवर्तुलाकारचन्दनतिलकस्य नीलमेघबृन्दमध्यस्थितपूर्णचन्द्रसारूप्यप्रतीतेरुपमा ॥ २१ ॥

चिल्लीति । चिल्लीलतयोः लताकारयोः चिल्ल्योः, उत्तमभ्रुवोरित्यर्थः, युगेन युग्मेन निषूदितः अपनोदितः शम्बरारेः कामस्य, 'शम्बरारिर्मनसिज' इत्यमरः, लोकानां जनानां 'लोकस्तु भुवने जने' इत्यमरः, एकं प्रधानं मोहनं मनोहरं यच्छरासनं धनुः तेन यो गर्वभारः गर्वाधिक्यं स येन तादृशः । अथवा चिल्लीलतायुगेन निषूदितः शम्बरारिलोकैकमोहनशरासनस्य गर्वभारो येन तादृशः । कामशरासनादप्यधिकमनोहरभ्रूयुग्मशालीत्यर्थः । इह अस्मिन् लोके । चिति ज्ञानस्वरूपपरब्रह्मात्मके स्वस्मिन्नित्यर्थः, लीनास्तत्परा ये तापसाः मुनयस्तेषां हृत्सु चित्तेष्वेवाम्बुजेषु पद्मेषु राजहंसः, पद्मेषु यथा हंसस्तिष्ठति तथा योगीश्वरहृदयेषु स्थित इत्यर्थः । योगीश्वरध्यानविषय इति तात्पर्यार्थः । कल्याणानां मङ्गलानां दिव्यानाम् उत्तमानां गुणानां राशिः समूहः । गुणगुणिनोरभेदोपचारादेवमुक्तिः । अघवैरी पापहारी, अथवा अघासुरनाशकर इत्यर्थः । चिल्लीनतापसहृदम्बुजराजहंस इत्यत्र रूपकालङ्कारः, कामधनुश्चिल्ल्योः सादृश्यप्रतीतेरुपमा चेति तयोः संसृष्टिः ॥ २२ ॥

आनीलनीलनलिनोपमनेत्रयुग्म-
सन्दृश्यमानकरुणावरुणाधिवासः ।
सराजमानतिलपुष्पसमानशोभ-
नासाग्रशोभितमनोज्ञमणिर्मुकुन्दः ॥ २३ ॥

बिम्बारुणातिमृदुलाधरपल्लवास्य-
किञ्चिद्विकासविशदोज्ज्वलदन्तकान्त्या ।
निष्पिष्टनिस्तुषतुषारकरप्रसर्प-
ज्ज्योत्स्नामदो भुवनमोहनमन्दहासः ॥ २४ ॥

**आनीलेति** । आनीलम् अधिकनीलवर्णं यत् नीलनलिनं नीलोत्पलं तदुपमे तत्सदृशे नेत्रयुग्मे नयनयुगले सन्दृश्यमानः सम्यगवलोक्यमानः करुणावरुणाधिवासः कृपासमुद्रो यस्य तादृशः । करुणार्द्रकटाक्षवानित्यर्थः । संराजमानं सम्यक् शोभमानं यत् तिलपुष्पं तत्समाना शोभा यस्यास्तादृश्या नासायाः नासिकायाः, 'घोणा नासा च नासिके'त्यमरः । अग्रे प्रान्तभागे शोभितः प्रकाशितः मनोज्ञमणिः मनोहररत्नं यस्य तादृशः । बालकनासिकाप्रान्तेषु रत्नधारणं तु देशविशेषसम्प्रदाय इति मन्तव्यम् । उक्तं च कर्णामृते 'नासाग्रे नवमौक्तिकमि'ति । मुक्तिं मोक्षं ददातीति मुकुन्दः ॥ २३ ॥

**बिम्बेति** । बिम्बवत् बिम्बफलवत् अरुणः रक्तवर्णः अतिमृदुलः अतिमार्दवशाली च यः अधरपल्लवः पल्लवसदृशाधरः स यस्य तत् बिम्बारुणातिमृदुलाधरपल्लवं तादृशस्य आस्यस्य मुखस्य किञ्चिद्विकासेन ईषद्धासेन विशदानां स्पष्टतया बहिः अवलोक्यमानानामित्यर्थः, उज्ज्वलानां दीप्राणां च दन्तानां रदनानां कान्त्या शोभया । निष्पिष्टः विनाशितः निस्तुषस्य निर्दोषस्य मेघावरणादिरहितस्येति यावत्, अत्र धान्यत्वग्वाचकस्यापि तुषशब्दस्य लक्षणया दोषमात्रार्थकत्वेन प्रयोगः, तुषारकरस्य चन्द्रस्य प्रसर्पन्त्या *व्यासया ज्योत्स्नया चन्द्रिकया यो मदो गर्वः स येन तादृशः । अतिस्वच्छचन्द्रिका-

* व्याप्तिमत्या प्रसरन्त्येत्यर्थः । व्याप्तिशब्दाद् अर्शआद्यचि व्याप्तशब्दः, ततः स्त्रीप्रत्यय इह द्रष्टव्यः ।

स्वच्छेन्द्रनीलमणिदर्पणतुल्यगण्ड-
डोलायमानमकराकृतिकुण्डलाभ्याम् ।
कान्तश्च कण्ठभुवि सन्ततलम्बमान-
शार्दूलदिव्यनखभूषणलोभनीयः ॥ २५ ॥

बाहुद्वयाञ्चितमनोहरकङ्कणौघः
श्रीवत्सकौस्तुभविराजितवत्सदेशः ।
चारूदरो विशदनाभिपुटो मनोज्ञ-
सत्किङ्किणीघणघणायितमध्यभागः ॥ २६ ॥

तिधवलकान्तिमानित्यभिप्रायः । भुवनानां लोकानां मोहन उन्मादकरः मन्द-हासो यस्य तादृशः । भगवन्मन्दहासस्य मायास्वरूपत्वादुन्मादकरत्वमि-त्यवधेयम् ॥ २४ ॥

स्वच्छेति । स्वच्छः निर्मलः यः इन्द्रनीलमणिदर्पणः इन्द्रनीलरत्नमया-दर्शः तत्तुल्ययोः गण्डयोः कपोलयोः डोलायमानाभ्यां डोलावदाचरद्भ्यां च-ञ्चलाभ्यामिति यावत्, मकराकृतिभ्यां मकरमत्स्याकाराभ्यां कुण्डलाभ्यां कर्णा-लङ्काराभ्याम् । कान्तः मनोहरः च । कण्ठभुवि कण्ठप्रदेशे । सन्ततं निरन्तरं लम्बमानं शार्दूलानां व्याघ्राणां दिव्या उत्तमा ये नखाः तैर्यद् भूषणमाभरणं तेन लोभनीयो मनोहरः । व्याघ्रनखविरचिताभरणविशेषविभूषितकण्ठप्रदेश इत्यर्थः ॥ २५ ॥

बाहुद्वयेति । बाहुद्वये भुजयुग्मे अञ्चितानां गतानां मनोहराणां च कङ्कणानां करभूषणानाम् ओघः समूहो यस्य तादृशः । श्रीवत्सेन श्रीव-त्साख्यलाञ्छनेन कौस्तुभेन कौस्तुभाख्यमणिना च विराजितः विलसितः यः वत्सदेशः वक्षःप्रदेशः, 'उरो वत्सं च वक्षश्चे'त्यमरः, स यस्य तादृशः । चा-रूदरः मनोज्ञकुक्षिप्रदेशः । विशदनाभिपुटः निर्मलनाभिप्रदेशः । मनोज्ञाभिः मनोहराभिः सतीभिरुत्तमाभिश्च किङ्किणीभिः, क्षुद्रघण्टिकाभिः, 'किङ्किणी क्षु-द्रघण्टिके'त्यमरः, घणघणायितो घणघणायमानः मध्यभागः मध्यप्रदेशो यस्य तादृशः । घणघणेत्याकारकशब्दविशिष्टातिमनोहरकिङ्किणीविभूषितमध्यप्रदेश इत्यर्थः ॥२६ ॥

पादान्तशोभिमणिनूपुरशिञ्जितेन
निर्धूतहंसकुलनायकरावगर्वः।
एवंविधो भुवनमोहनमूर्तिरेष
योगीश्वरस्य पुरतो विजहार देवः॥ २७॥

एवं जगन्मङ्गलरूपो निःशेषदुरितनिकृन्तनचतुरतराद्भुतानुपमेयसुपरिशुद्धनिजमाहात्म्यो वसुन्धराभारायितदुश्चरित्रतमघोरभुजबलदितिजातकुलमहाद्रिकुलिशो विस्तारितविश्वस्तनिजचरणसमस्तजननिस्तुलस्वस्त्ययनोऽस्तङ्गमितस-

---

पादान्तेति। पादान्तयोः पादावसित्योः, 'अन्तोऽभ्यवसितौ मृत्यौ स्वरूपे निश्चयेऽन्तिके' इत्यमरः, पदाग्रयोरित्यर्थः शोभिनोः, प्रकाशमानयोः मणिनूपुरयोः रत्नमयमञ्जीरयोः शिञ्जितेन शब्देन। 'भूषणानां तु शिञ्जितमि'त्यमरः। निर्धूतः विनाशितः हंसकुलनायकस्य हंसकुलश्रेष्ठस्य रावेण शब्देन यः गर्वः स येन तादृशः। हंसशब्दादप्यधिकमनोहरशब्दविशिष्टनूपुरालङ्कृतपादाग्रभाग इत्यर्थः। एवंविधः एवंप्रकारः, लोलम्बेत्याद्युक्तस्वरूपविशिष्ट इत्यर्थः। भुवनमोहनमूर्तिः जगन्मोहनस्वरूपः। एष देवः श्रीपद्मनाभः। योगीश्वरस्य संन्यासिश्रेष्ठस्य दिवाकरस्येत्यर्थः। पुरतः पुरोभागे। विजहार क्रीडां कृतवान्॥ २७॥

अथ भगवत्क्रीडाप्रकारान् वर्णयिष्यन्नाह—एवमिति। एवम् उक्तप्रकारेण। जगतां लोकानां मङ्गलं शुभावहं रूपम् आकृतिर्यस्य सः। निश्शेषाणाम् अशेषाणां दुरितानां दुष्कृतानां निकृन्तने छेदने निवारण इत्यर्थः, चतुरतरम् अतीव चतुरं दक्षं, 'दक्षे तु चतुरपेशलपटव' इत्यमरः, अद्भुतं विस्मयावहम् उपमेयं न भवतीत्यनुपमेयं किञ्चित्प्रतियोगिकसादृश्याननुयोगीत्यर्थः, सुपरिशुद्धं सुतरां परिशुद्धं निजमात्मीयं च यत् माहात्म्यं महात्मता तत् यस्य स तथा। वसुन्धरायाः भूम्याः भारायिताः भारीभूताः दुश्चरित्रतमाः अतीव दुष्टचरित्राः घोरभुजबलाः भयङ्करबाहुपराक्रमाश्च ये दितिजाताः दैत्याः तेषां कुलं समूह एव यः महाद्रिः महापर्वतः तस्य कुलिशम्। यथा

कलपापजालो दुरूहतमविमलनिगमान्तनिशान्तप्रदीपायितो दृश्यमानेऽस्मिन् सचराचरे भुवने सर्वजन्तुष्वन्तश्चैतन्यरूपेण विराजमानः सकलजगदात्मकः सच्चिदानन्दमयैकमूर्तिः स भगवान् वासुदेवो विदितभुवनतत्त्वोऽपि पुरः स्थितस्यास्य दिवाकरयतीश्वरस्य मनो रञ्जयितुं भक्तवात्सल्यान्नाटितपरमकोमल-

---

कुलिशं पर्वतानां छेदकारि तथा दैत्यसमूहस्य छेदकर इत्यर्थः। रूपकालङ्कारः। विस्तारितं विस्तारं प्रापितं विशालीकृतमित्यर्थः, विश्वस्तौ आश्रितजनसन्तापहरं भगवत्पादारविन्दयुगलमेव मम शरणमित्याकारकविश्वासविषयीकृतौ निजचरणौ आत्मीयपादौ यैः तादृशा ये समस्तजनाः तेषां भक्तानामिति यावत्, यत् निस्तुलस्वस्त्ययनं निरुपममङ्गलागमनमार्गः तद् येन स तथा। भक्तजनानामपरिमितमङ्गलप्रद इति तात्पर्यार्थः। अस्तंगमितं विनाशितं सकलानां पापजालं पापसमूहो येन। दुरूहतमम् अतीव दुरूहम् अधिकदुर्ज्ञेयमिति यावत्, विमलं निर्मलं च यन्निगमान्तं वेदान्तं तदेव यत् निशान्तं गृहं, 'निशान्तवस्त्यसदनभवनागारमन्दिरमि'त्यमरः, तत्प्रदीपायितः तत्प्रदीपवदाचरितः। दीपो यथा गृहान्तर्भागे शोभाकरस्तथा वेदान्त इत्यर्थः। वेदान्तशास्त्रमुख्यप्रतिपाद्य इति तात्पर्यार्थः। दृश्यमाने व्यक्तात्मक इत्यर्थः। सचराचरे स्थावरजङ्गमस्वरूपे। अस्मिन् भुवने लोके। सर्वजन्तुषु सकलप्राणिषु। अन्तः चैतन्यरूपेण चैतन्यात्मकतया। विराजमानः शोभमानः। सर्वप्राणिनामप्यन्तः चैतन्यात्मकतया अनुस्यूत इत्यर्थः। सर्वजन्तूनामपि भगवच्चैतन्यानतिरिक्तचैतन्यमेवेति भावः। सकलजगदात्मकः सकलजगत्स्वरूपः। सन्मयी सत्स्वरूपा कालत्रयेऽप्यबाधितेत्यर्थः, चिन्मयी ज्ञानस्वरूपा आनन्दमयी परमानन्दस्वरूपा एका अद्वितीया मूर्तिः शरीरं यस्य तादृशः। भगवान् सः, वासुदेवः श्रीपद्मनाभः। विदितं ज्ञातं भुवनस्य लोकस्य तत्त्वं स्वासिन्नध्यस्तत्वरूपपारमार्थ्यं येन तादृशोऽपि सर्वज्ञोऽपीत्यर्थः। अज्ञवद् भगवतश्चापल्यानुष्ठानं भक्तवात्सल्यादेवेति स्थापनायापिशब्दप्रयोगः। पुरः पुरोभागे। स्थितस्य वर्तमानस्य। अस्य दिवाकरयतीश्वरस्य। मनः रञ्जयितुं ह्लादयितुम्। भक्तवात्सल्यात् सेवकजनविषयकवात्सल्याद्धेतोः। नाटितमभिनीतं परमकोमलम् अतीव मनोहरं च

बाल्यचापल्यो दर्शनमात्रजातानन्दमयसुधापयोनिधिमज्जनं तं यतीश्वरं पुनरपि बहु तर्पयन्निव कञ्चित् कालं तत्रैव बहुधा विरराज ॥ ३ ।

अथ कदाचन निजचरणनलिनयुगलध्यानैकाग्रचित्ततया मुकुलीकृतनयनस्य सुकृतिकुलवतंसस्य तस्य मस्करीन्द्रस्य पृष्ठभागे पाणिजानुप्रचारः कथमपि शनैः सम्प्राप्य रसालसालकिसलयकोमलेनाङ्गुल्यग्रेण मन्दं संस्पृश्य किमिद-

---

यद् बाल्यचापल्यं शैशवकालीनचपलकर्म तद् येन स तथा तादृशः सन् । दर्शनमात्रेण आत्मविषयकप्रत्यक्षमात्रेण जातः सम्भूतो य आनन्दः स एव या सुधा अमृतं तद्रूपे पयोनिधौ समुद्रे यद् मज्जनं निमज्जनं तत् यस्य स तथा तादृशः, अमन्दतरानन्दमन्दिरायितहृदयारविन्दमिति यावत् । तं यतीश्वरं दिवाकरम् । पुनरपि भूयोऽपि । बहु अधिकम् । तर्पयन् तृप्तिं प्रापयन्निव । इवेति वाक्यालङ्कारे । कञ्चित् कालं, तत्रैव दिवाकरसमीप एव । बहुधा बहुप्रकारेण । विरराज शुशुभे ॥ ३ ॥

अथ भगवतो बाल्यचापल्यप्रकारमेव प्रपञ्चयति — **अथे**त्यादिना । अथ अनन्तरम् । कदाचन एकदा । स भगवानितिशेषः । निजम् आत्मीयं यच्चरणनलिनयुगलं पादारविन्दयुगं तस्य ध्याने एकाग्रमासक्तं चित्तं मनो यस्य सः तादृशतया । मुकुलीकृतनयनस्य निमीलितनेत्रस्य । सुकृतिकुलवतंसस्य पुण्यवत्समूहशिरोलङ्कारभूतस्य । अवतंस एव वतंसः । 'वष्टि भागुरिरल्लोपमवाप्योरुपसर्गयोरि'त्यनेन अल्लोपः । 'पुंस्युत्तंसावतंसौ द्वौ कर्णपूरेऽपि शेखर' इत्यमरः । मस्करीन्द्रस्य संन्यासिश्रेष्ठस्य । 'पाराशर्यपि मस्करी'त्यमरः । तस्य दिवाकरस्य । पृष्ठभागे, पाणिभ्यां जानुभ्यां च प्रचरति चङ्क्रमीतीति पाणिजानुप्रचारः तादृशः सन् । अनेन बाल्याधिक्यं सूचितम् । अत एव कथमपि कथञ्चिदपि गरीयसा यत्नेनेत्यर्थः । 'ज्ञातहेतुविवक्षायामप्यादिकथमन्तिमम् । कथमादिममप्यन्तं यत्नगौरवबाढयोरि'त्युत्पलमाला । शनैः मन्दं मन्दम् । सम्प्राप्य गत्वा । रसालसालस्य चूतवृक्षस्य, 'आम्रश्चूतो रसालोऽसौ', 'अनोकहः

मिति यतावुन्मील्य चक्षुषी दिक्षु विवृत्तवदने झटिति दूरतः पलायितो नाहं स्पृष्टवानिति भावयन् मुग्धतरं मन्दं किञ्चिज्जहास ॥ ४ ॥

भूयोऽपि तस्य निकटस्थितपात्रसंस्थं
तोयं प्रगृह्य बत निक्षिपति स्म मूर्ध्नि ।
स्वस्येह दर्शनवशादमृताभिषिक्त-
मन्तस्तथा बहिरपीव विधातुमेनम् ॥ २८ ॥

---

कुटः सालः' इति चामरः । किसलयवत् पल्लववत् कोमलेन मनोहरेण । अङ्गुल्यग्रेण अङ्गुलिप्रान्तभागेन । मन्दं यथा तथा । संस्पृश्य स्पृष्ट्वा, अर्थाद् दिवाकरम् । यतौ दिवाकरे । इदं पृष्ठभागे स्पृष्टं वस्तु । किं किं वा भवति । इति, विचार्येति शेषः । चक्षुषी नयने । उन्मील्य, दिक्षु पार्श्वभागदेशेषु । विवृत्तवदने तिर्यक्कृतवदने सति । झटिति वेगेन । दूरतः दूरदेशे । पलायितः विद्रुतः । अहं न स्पृष्टवानिति, भावयन् अभिनयंश्च सन् । मुग्धतरं सुन्दरतरं यथा तथा । 'मुग्धः सुन्दरमूढयो'रिति निघण्टुः । मन्दं किञ्चित् जहास किञ्चिन्मन्दहासं कृतवानित्यर्थः । एतदारभ्य केषुचिद् बालस्वभाववर्णनात् स्वभावोक्तिरलङ्कारः ॥ ४ ॥

भूयोऽपीति । अत्र सर्वत्रापि स भगवानिति योज्यम् । भूयोऽपि, तस्य दिवाकरस्य । निकटस्थिते समीपस्थिते पात्रे कमण्डल्वादौ संस्थं स्थितम् । तोयं जलम् । प्रगृह्य उपादाय । मूर्ध्नि शिरसि, अर्थाद् दिवाकरस्य । निक्षिपति स्म अभिषिक्तवान् । बत आश्चर्यम् । स्वस्यात्मनः । 'स्वो ज्ञातावात्मनि स्वं त्रिष्वात्मीये स्वोऽस्त्रियां धन' इत्यमरः । दर्शनवशाद्, अन्तः अन्तर्भागे । अमृताभिषिक्तं पीयूषपरिप्लुतं, दर्शनमात्रसञ्जातानन्दसुधापयोनिधिमज्जनमित्यर्थः । बहिरपि बहिर्भागेऽपि । तथा अमृताभिषिक्तम् । तत्रामृतेन जलेनाभिषिक्तमित्यर्थः । 'पयः कीलालममृतमि'त्यमरः । विधातुं कर्तुमिवेत्युत्प्रेक्षा । मद्दर्शनवशादन्तर्भागे अमृताभिषिक्तोऽसौ बहिर्भागेऽप्यमृताभिषिक्तः कर्तव्य इति निश्चित्येव जलेन तस्य मूर्ध्नि अभिषेकं कृतवानित्यर्थः ॥ २८ ॥

पुनस्तस्मिन् यतीश्वरे पूजार्थं तुलसीदलान्युद्धर्तुं पात्रे हस्तं निक्षिप्य तत्र तान्यविलोक्य विस्मित्य विस्मित्य क्रीडामानुषस्य भगवतो मायेति सुतरां सन्तुतोष ॥ ५ ॥

तदनु च यथापूर्वं तस्मिन्नेव पात्रे समग्रतया तान्येव तुलसीदलान्यालक्ष्य द्विगुणितविस्मयोऽभूत् स यतीश्वरः ॥ ६ ॥

पुनस्तदीयशिरसि निहितां मालां शनैरुद्धृत्य यदा जले निक्षिप्तवान्, तदा तस्मिन् यतौ हस्तेन स्वशिरस्यदृश्यत्वमितां स्रजं गवेषयति नाहं जानामीत्यभिनयन् यत्रकुत्रचिद् विलोक्य तूष्णीमेव तस्थौ ॥ ७ ॥

---

पुनरिति । पुनः तस्मिन् यतीश्वरे दिवाकरे । पूजार्थं तुलसीदलानि, उद्धर्तुम् उपादातुम् । पात्रे तुलसीदलभरितपात्रविशेषे । हस्तं, निक्षिप्तवति सति निवेशयति सति । तत्र पात्रे । तानि तुलसीदलानि । अविलोक्य अदृष्ट्वा । विस्मित्य विस्मित्य पुनःपुनर्विस्मित्य । क्रीडामानुषस्य ललितमानुषविग्रहस्य । भगवतः श्रीपद्मनाभस्य । माया इति, सुतराम् अतीव । सन्तुतोष सन्तुष्टोऽभूत् । पूजार्थं तुलसीदलसम्पूरिते मत्समीपनिवेशिते अस्मिन् पात्रे एतत्कालावच्छेदेनैव निश्शेषतस्तुलसीदलादर्शनं लीलामानुषस्यास्य भगवतो माययैवेति निश्चित्य एतादृशभगवत्सन्निधानलाभादहमतीव धन्य एवेति परमानन्दपरिपूर्णमानसोऽभवदिति तात्पर्यार्थः ॥ ५ ॥

तदन्विति । तदनु च अविलोकनानन्तरं च । सः, यतीश्वरः दिवाकरः । तस्मिन्नेव पूर्वं तुलसीदलरहिततया दृष्ट एव । पात्रे, तान्येव पूर्वमविलोकितान्येव । तुलसीदलानि, यथापूर्वं पूर्ववत् । समग्रतया सम्पूर्णतया । आलक्ष्य दृष्ट्वा । द्विगुणितविस्मयः द्विगुणीभूतविस्मयः । अभूत् । पूर्वं पात्रे तुलसीदलादर्शनानन्तरं यादृशविस्मयः सञ्जातः, तस्माद् द्विगुणीभूतविस्मयशाली अभवदित्यर्थः । अत्याश्चर्यवानभूदिति भावः ॥ ६ ॥

पुनरिति । पुनः, तदीयशिरसि दिवाकरीयोत्तमाङ्गे । निहितां निवेशितां मालाम् । शनैर्मन्दम् । उद्धृत्य उपादाय । यदा यस्मिन् काले । जले

कदाचित् तस्य तु भिक्षुवरस्य स्कन्धे करजाग्रेण किमपि निपीड्य तस्मिन् विवृत्तदृष्टौ नाहं पीडितवान् पिपीलिकेयमित्युक्त्वा तूष्णीं बभूव ॥ ८ ॥

कदाचित् सम्प्राप्तः पुनरपि स पश्चाद्भुवि मुनेः
करा‍भ्यां पाथोजस्मयहृतिपराभ्यामथ जवात् ।
पिधायैतन्नेत्रद्वयमिह सहासोऽतिमधुरं
मुदा पप्रच्छैनं वद पिहितवान् कस्तव दृशौ ॥ २९ ॥

---

समीपस्थितपात्रस्थिते तोये । निक्षिप्तवान् निवेशितवान् । तदा तस्मिन् काले । तस्मिन् यतौ दिवाकरे । स्वशिरसि आत्मीयोत्तमाङ्गे । अदृश्यत्वम् अप्रत्यक्षत्वम् । इतां प्राप्ताम् । स्रजं मालाम् । हस्तेन गवेषयति अन्वेषयति सति । 'अन्वेषणं गवेषणमि'त्यमरः । अहं न जानामीत्यभिनयन् भावयन् । यत्रकुत्रचिद् विलोक्य यत्रक्वचन देशान्तरे विलोकयन् । तूष्णीमेव, तस्थौ स्थितवान् । दिवाकरे मच्छिरसि निहिता माला कुत्र गतेति तामन्वेषयति सति भगवान् स्वद्रष्टृजनानां स्वस्मिन्मालोपादातृत्वशङ्कानुत्पादानुगुणभावनामभिनयन् सन् स्थितवानिति तत्त्वम् ॥ ७ ॥

कदाचिदिति । कदाचिद् एकदा । भिक्षुवरस्य संन्यासिश्रेष्ठस्य । 'भिक्षुः परिव्राट् कर्मन्दी'त्यमरः । तस्य दिवाकरस्य । स्कन्धे अंसे । 'स्कन्धो भुजशिरोंऽसोऽस्त्री'त्यमरः । करजाग्रेण नखाग्रेण । किमपि किञ्चित् । निपीड्य, तस्मिन् दिवाकरे । विवृत्तदृष्टौ तिर्यक्कृतलोचने सति । अहं न पीडितवान्, किन्तु इयं पिपीलिकेत्युक्त्वा । तूष्णीं बभूव मौनी बभूव ॥ ८ ॥

कदाचिदिति । सः भगवान् । पुनरपि भूयोऽपि । कदाचित्, मुनेः दिवाकरस्य । पश्चाद्भुवि पृष्ठभागे । सम्प्राप्तः सन्, अथ, पाथोजस्मयस्य तामरसगर्वस्य हृतौ हरणे पराभ्याम् आसक्ताभ्यां तामरसपुष्पादप्यतिमनोहराभ्यामिति यावत् । कराभ्याम्, एतस्य दिवाकरस्य । नेत्रद्वयं लोचनयुगलम् । जवाद् वेगेन । पिधाय आच्छाद्य । सहासः हाससहितः सन् । इह कः, तव दृशौ तव नयने । पिहितवान् आच्छादितवान् । इति मुदा सन्तोषेण हेतुना ।

अथो ग्रहीतुं स यतिर्यदा त्वमुं
प्रसारयामास करौ तदा ह्यसौ ।
प्रधाव्य दूरे स्वशिरः प्रकम्पयन्
जहास चोच्चैः कृतहस्ततालिकः ॥ ३० ॥

कदाचित् तस्य परमसुकृतिनो यतिवरस्य स्कन्धमधिरुह्य निजकराभ्यां तस्य शिरः समालम्ब्य कर्णे मन्दं किञ्चिज्जगाद ॥ ९ ॥

अथ स्वस्यैव निवेदनार्थं सन्निहितमन्नादि स्वयमेव गृहीत्वा भुञ्जानः परमानन्दभरितोऽभूत् ॥ १० ॥

---

अतिमधुरम् अतिमनोहरं यथा भवति तथा । एनं दिवाकरम् । पप्रच्छ पृष्टवान् । शिखरिणीवृत्तम् । 'रसै रुद्रैश्छिन्ना यमनसभलागः शिखरिणी'ति लक्षणात् ॥

अथो इति । अथो अनन्तरम् । 'मङ्गलानन्तरारम्भप्रश्नकार्त्स्न्येष्वथो अथे'त्यमरः । स यतिः दिवाकरः । अमुं भगवन्तम् । ग्रहीतुम् समालम्बितुम् । यदा तु यस्मिन् काले तु । करौ, प्रसारयामास प्रसारितवान् । तदा हि तस्मिन् काले हि । असौ भगवान् । दूरे, प्रधाव्य पलायनं कृत्वा । स्वशिरः आत्मीयमूर्धानम् । प्रकम्पयन् चालयन् । कृतहस्ततालिकः कृतहस्तताल एव च सन् । स्वार्थे ठक् । उच्चैः, जहास हसितवान् । आत्मग्रहणार्थकदिवाकरकरप्रसारणं दृष्ट्वा अहो तव मोहोऽयम्, अहं त्वद्ग्रहणकर्मीभूतो न भवेयमित्येतादृशान्तर्गतभावनासूचकशिरःकम्पनपूर्वकं हसितवानिति तात्पर्यार्थः । वंशस्थं वृत्तम् । 'जतौ तु वंशस्थमुदीरितं जरावि'ति तल्लक्षणात् ॥ ३० ॥

कदाचिदिति । कदाचित्, परमसुकृतिनः अतीव पुण्यशालिनः । यतिवरस्य संन्यासिश्रेष्ठस्य । तस्य दिवाकरस्य । स्कन्धम् अंसम् । अधिरुह्य आरुह्य । निजकराभ्याम् आत्मीयहस्ताभ्याम् । तस्य दिवाकरस्य । शिरः मूर्धानम् । समालम्ब्य संगृह्य । कर्णे, मन्दं, किञ्चित्, जगाद उक्तवान् ॥ ९ ॥

अथेति । अथ, स्वस्य आत्मनः । निवेदनार्थमेव न त्वन्यार्थम् । सन्निहितं सन्निधिमानीतम् । अन्नादि आदिशब्दात् पक्वादिनिवेद्यपदार्थानपि ।

अथ कदाचिदतिकोमलं गायन् गायन् अतिमृदुना चरणाम्बुजयुग्मेन सुमनोहरं नृत्यन् नृत्यन् यतिमानसं सुदृढमवशीचकार ॥ ११ ॥

घण्टां गृहीत्वा निजपूजनार्थां संवादयन्नस्य तु कर्णमूले ।
किमेतदित्याकुलमीक्षमाणे तस्मिन् सहासोऽथ पलायते स्म ॥

स्वयमेव आत्मनैव । गृहीत्वा, भुञ्जानः भक्षयन् सन् । परमानन्दभरितः परमानन्दसम्पूर्णः अभूत् ॥ १० ॥

अथेति । अथ कदाचिद्, अतिकोमलमतिमनोहरं यथा तथा । गायन् गायन् पुनः पुनः गायन् । अतिमृदुना अत्यन्तमार्दवशालिना । चरणाम्बुजयुग्मेन पादारविन्दयुगलेन । सुमनोहरम् अतिमनोहरम् यथा तथा । नृत्यन् नृत्यन् पुनः पुनर्नृत्यन् सन् । यतिमानसं दिवाकरहृदयम् । सुदृढम् अतीव । अवशीचकार अवशीकृतवान् व्यामोहयदित्यर्थः ॥ ११ ॥

घण्टामिति । निजपूजनमर्थः प्रयोजनं यस्यास्ताम् । 'अर्थोऽभिधेयरैवस्तुप्रयोजननिवृत्तिष्वि'त्यमरः । निजपूजनार्थं सन्निहितामिति यावत् । घण्टां गृहीत्वा, अस्य तु दिवाकरस्य । कर्णमूले कर्णसमीप इत्यर्थः । संवादयन् संघोषयन् । तस्मिन् दिवाकरे । एतत् शब्दोत्पत्तिनिमित्तम् । किम्, इति एवंप्रकारेण । मत्वेति शेषः । आकुलं यथा तथा, ईक्षमाणे सति, सहासः हाससहितः सन् । पलायते स्म विद्रुतवान् । इन्द्रवज्रोपेन्द्रवज्राभ्यामुपजातिर्वृत्तम् । 'स्यादिन्द्रवज्रा यदि तौ जगौ ग' इतीन्द्रवज्रालक्षणाद्, 'उपेन्द्रवज्रा जतजास्ततो गावि'त्युपेन्द्रवज्रालक्षणाद्, 'अनन्तरोदीरितलक्ष्मभाजौ पादौ यदीयावुपजातयस्ताः' इत्युपजातिलक्षणाच्च । नच पादाविति द्विवचननिर्देशेन पादद्वयसङ्करे सत्येवोपजातेरुक्तत्वात् कथमत्रैकपादसाङ्कर्ये उपजातिरिति वाच्यम् । एकपादसाङ्कर्येणापि महाकविप्रयोगदर्शनात् । तत्र पादाविति द्विवचननिर्देशस्याविवक्षायाः ग्रन्थकारैरेवोक्तत्वात् । अत एव 'यत्र द्वयोरप्यनयोस्तु पादा भवन्ती'ति श्रुतबोधिन्यामप्युक्तम् ॥ ३१ ॥

कदापि पात्रे निहितानि पुष्पा-
ण्यादाय मौलौ निदधे स्वकीये ।
दृष्टः श्रुतो वा किमु तुल्यभाग्यो
ह्यनेन संन्यासिवरेण भूमौ ॥ ३२ ॥

कदाचिदस्य परमभागवतस्याङ्कमधिरुह्य बाल्यवशादव्यक्तकलभाषणः परमकोमलसृक्वयुगलपतल्लालालोभनीयवदनारविन्दो विहरति स्म ॥ १२ ॥

कदाचित् तस्य तु यतीश्वरस्य योगपट्टानेकैकशो गृहीत्वा सस्मितं विलोक्य पात्रस्थिततोये निक्षिप्य निजकरा-

कदापीति । कदापि एकदा । पात्रे, निहितानि निक्षिप्तानि । पुष्पाणि, आदाय संगृह्य । स्वकीये आत्मीये भगवत्सम्बन्धिनि । मौलौ शिरसि । निदधे निक्षिप्तवान् । अथ भगवतो दिवाकरविषयकैतादृशकारुण्यं दिवाकरस्यैतादृशभाग्यं च विचार्य परमानन्दपरवशस्य परमकारुणिकस्य कवेर्वदनारविन्दात् सन्तोषाधिक्यसूचकानि कानिचिद् वाक्यानि निःसरन्ति—दृष्ट इति । संन्यासिवरेण संन्यासिश्रेष्ठेन । अनेन दिवाकरेण । तुल्यभाग्यः सदृशभागधेयः पुमान् । भूमौ, दृष्टः श्रुतो वा न दृष्टो न श्रुतश्चेत्यर्थः ॥ ३२ ॥

कदाचिदिति । कदाचित्, परमभागवतस्य भक्तोत्तमस्य । अस्य दिवाकरस्य । अङ्कम् उत्सङ्गम् । 'उत्सङ्गचिह्नयोरङ्क' इत्यमरः । आरुह्य, बाल्यवशात् शैशवेन हेतुना । अव्यक्तम् अस्फुटं कलं मनोहरं च भाषणं यस्य तादृशः । परमकोमलाद् अतिमनोहरात् सृक्वयुगलाद् ओष्ठप्रान्तभागयुग्मात् । 'प्रान्तावोष्ठस्य सृक्वणी' इत्यमरः । पतन्ती निःष्यन्दन्ती या लाला मुखोदरनिस्सृतजलं 'सृणिका स्यन्दिनी लाला' इत्यमरः । तया लोभनीयं मनोहरं वदनारविन्दं मुखाम्बुजं यस्य तादृशश्च सन् । विहरति स्म क्रीडितवान् ॥ १२ ॥

कदाचिदिति । यतीश्वरस्य संन्यासिश्रेष्ठस्य । तस्य दिवाकरस्य तु । योगपट्टान्, एकैकशः प्रत्येकं प्रत्येकम् । गृहीत्वा उपादाय । सस्मितं समन्द-

म्बुरुहेण तत्पात्रवदनं पिधाय भो यतीन्द्र! तव योगपट्टाः कुत्रेति सकुतूहलं पप्रच्छ ॥ १३ ॥

कदाचिन्निजनिवेदनार्थं सन्निहितफलादिभरितपात्रं स्वहस्तेनोद्धर्तुमपारयन्निव सप्तरात्रपर्यन्तं कराग्रधृतगोवर्धनाद्रिरपि श्रमेण दूरतः समाकर्षन् सामोदं बुभोज ॥ १४ ॥

तस्याथ धन्यचरितस्य मुनेः कदाचित्
स्थित्वा परं करतले स ननर्त देवः ।

हासम् । विलोक्य दिवाकरमुखमिति शेषः । पात्रस्थिततोये कमण्डल्वादिपूरितजले । निक्षिप्य निधाय । तत्पात्रवदनं तत्पात्रमुखम् । निजकराम्बुरुहेण आत्मीयपाणिपङ्कजेन । पिधाय आच्छाद्य । भो यतीश्वर! तव ते । योगपट्टाः कुत्र । इति एवम्प्रकारेण । 'इति हेतुप्रकरणप्रकारादिसमाप्तिष्वि'त्यमरः । सकुतूहलं सकौतुकं यथा तथा । पप्रच्छ पृष्टवान् ॥ १३ ॥

कदाचिदिति । निजनिवेदनार्थं निजनिवेदनप्रयोजनम् । सन्निहितं सन्निधिस्थितं फलादिभरितं फलादिपूरितं च पात्रम् । स्वहस्तेन, उद्धर्तुम् उत्क्षेप्तुम् । अपारयन् अशक्त इवेत्युत्प्रेक्षा । सप्तरात्रपर्यन्तं दिवससप्तकं यावदित्यर्थः । कराग्रे धृतः गोवर्धनाद्रिः गोवर्धनपर्वतो येन तादृशः सन्नपि । श्रमेण आयासेन । दूरतः विदूरे । समाकर्षन्, सामोदं सहर्षं 'आमोदो हर्षगन्धयोरि'ति विश्वः । बुभोज भुक्तवान् । अर्थात् तत्पात्रस्थितफलादिरेव कर्म । अत्र सप्तरात्रपर्यन्तं कराग्रधृतगोवर्धनाद्रिरपीत्यनेन तादृशशक्तिमत्त्वरूपकारणसत्त्वे सिद्धेऽपि पात्रोद्धारणरूपकार्याजन्युक्त्या विशेषोक्तिरलङ्कारः, 'कार्याजनिर्विशेषोक्तिः सति पुष्कलकारणे' इति तल्लक्षणात् ॥ १४ ॥

तस्येति । सः, देवः श्रीपद्मनाभः । कदाचिद्, धन्यचरितस्य, तस्य मुनेः दिवाकरस्य । करतले स्थित्वा, परं, ननर्त नृत्तं कृतवान् । विधिना ब्रह्मणा 'विधाता विश्वसृग्विधिरि'त्यमरः । शर्वेण परमेश्वरेण च लाल्यं ला-

यत्पादपद्मयुगलं विधिशर्वलाल्यं
हा हन्त लब्धममुना सकलार्तिहारि ॥ ३३ ॥

इति श्रीस्यानन्दूरपुरवर्णनप्रबन्धे बालक्रीडा नाम
प्रथमः स्तबकः ।

---

लयितुं योग्यं पूज्यमित्यर्थः । सकलार्तिहारि सकलपीडानाशकम् । यस्य श्रीपद्मनाभस्य पादपद्मयुगलं पादारविन्दयुग्मम् । अमुना दिवाकरेण । लब्धम् । हा हन्त आश्चर्यम् ॥ ३३ ॥

इति श्रीस्यानन्दूरपुरवर्णनप्रबन्धव्याख्यायां
प्रथमः स्तबकः ।
॥ श्रीपद्मनाभ एव गतिः ॥

# अथ द्वितीयः स्तबकः ।

एवमादिसुमनोहरबहुविधलीलानिरतस्य तस्य भगवतो वासुदेवस्य सान्निध्येनास्य तु यतीश्वरस्य बहुषु दिनेषु क्षणवद् व्यतीतेषु एकदा स एव भगवान् भक्तवत्सलो यथापूर्वं शनैश्शनैरेतत्सविधमुपसृत्य मध्ये सचकितं पृष्ठतो विलोक्य निभृतपदं गच्छन् विमलतुलसीदलार्चितेषु सालग्रामेष्वेकं निजकरपल्लवेन तुलसीदलान्यपसार्य गृह्णानः समन्दहासं विकचसरसीरुहकान्ते निजवदनान्तश्चिक्षेप ॥ १ ॥

एवमेभिर्भगवद्विहारप्रकारं वर्णयन्ननन्तरं वक्ष्यमाणकथाप्रतिपादननिदानं सालग्रामोपादानरूपं भगवद्विलासं वर्णयति — एवमित्यादिना । एवमादिषु अथेत्यादिना उक्तप्रकारासु सुमनोहरासु अतिरुचिरासु बहुविधासु अनेकप्रकारासु लीलासु विलासेषु निरतस्यासक्तस्य । वासुदेवस्य तस्य भगवतः श्रीपद्मनाभस्य । सान्निध्येन, यतीश्वरस्य संन्यासिश्रेष्ठस्य अस्य दिवाकरस्य । बहुषु दिनेषु, क्षणवद्, व्यतीतेषु अतिक्रान्तेषु सत्सु । एकदा कदाचित् । भक्तवत्सलः सः भगवान् पद्मनाभ एव । यथापूर्वं पूर्ववत् । मध्ये गमनमध्ये इत्यर्थः । सचकितं भयसम्भ्रमसहितं 'चकितं भयसम्भ्रम' इत्युक्तत्वात् । पृष्ठतः पृष्ठभागे । विलोक्य । निभृतपदं निःशब्दपदविन्यासं यथा तथा । गच्छन् चङ्क्रम्यमाणः सन् । शनैःशनैः मन्दंमन्दम् । एतस्य दिवाकरस्य सविधं समीपम् । उपसृत्य उपगम्य । विमलैः निर्मलैः तुलसीदलैः अर्चितेषु पूजितेषु । सालग्रामेषु, एकम् अन्यतमम् । निजकरपल्लवेन आत्मीयपाणिकिसलयेन । तुलसीदलानि, अपसार्य अपास्य । गृह्णानः उपाददानः । विकचं विकसितं यत् सरसीरुहं तामरसं तद्वत् कान्ते मनोहरे । निजवदनान्तः आत्मीयवदनान्तर्भागे । समन्दहासं यथा भवति तथा । चिक्षेप क्षिप्तवान् ॥ १ ॥

अथैतद् विलोक्य विमलनिगमान्तार्थतत्त्वबोधसञ्जातोपशमस्यापि तस्य यतीश्वरस्य हृदि भगवत्प्रेरणयैव किञ्चित्कोपः पदं चकार ॥ २ ॥

तदनु,

यावद्वामकरेण तापसवरः सोऽयं जगन्नायकं
याह्यारादिति संन्यवारयदमुं रोषाकुलः किञ्चन ।
तावत् सात्त्वतपुङ्गवः स भगवान् भक्तैकतानः क्षणा-
देवं वाचमुवाच तं यतिवरं वैमुख्ययुक्तं तदा ॥ १ ॥

---

अथेति । अथ अनन्तरम् । एतत् सालग्रामस्य मुखान्तःक्षेपम् । विलोक्य दृष्ट्वा । विमलं निर्मलं यन्निगमान्तं वेदान्तं तस्य योऽयमर्थः तस्य तत्त्वबोधेन परमार्थज्ञानेन सञ्जात उत्पन्नो य उपशमो मनोनिग्रहः स यस्य तादृशस्यापि । तस्य यतीश्वरस्य दिवाकरस्य । हृदि मनसि । भगवतः श्रीपद्मनाभस्य प्रेरणया नियोगेनैव । किञ्चित् कोपः, पदं स्थानम् । चकार कृतवान् । अतीवोपशान्तोऽपि दिवाकरः सालग्रामनिगरणरूपभगवत्क्रियादर्शनानन्तरं किञ्चित्कुपितोऽभूत्, तदपि भक्तानुग्रहैकनिरतस्य भगवतः प्रेरणयैवेति भावः । विलोकनाक्रियायाः कुपिधात्वर्थक्रियया समानकर्तृकत्वं बोध्यम् । 'इति मतिरुदयासीत् पक्षिणः प्रेक्ष्य भैमीमि'तिवत् ॥ २ ॥

तदनु तदनन्तरम् ॥

यावदिति । रोषेण कोपेन आकुलः परवशः । सोऽयं तापसवरः दिवाकरः । जगन्नायकं लोकनाथम् । अमुं बालकम् । आराद् दूरे, 'आराद् दूरसमीपयोरि'त्यमरः । याहि गच्छ । इति एवंप्रकारेण । उक्त्वेति शेषः । वामकरेण वामहस्तेन । यावद् यदा । किञ्चन, संन्यवारयत् संरुरोध । तावत् तदा । सात्त्वतपुङ्गवः सात्त्वतेषु यादवेषु सत्त्वगुणनिरतेषु वा पुङ्गवः श्रेष्ठः । 'पुङ्गवर्षभकुञ्जरा' इत्याद्यमरः । भक्तैकतानः भक्तैकतत्परः । 'एकतानोऽनन्यवृत्तिरि'त्यमरः । स भगवान् श्रीपद्मनाभः । तदा तत्काले । वैमुख्ययुक्तं विमुखतासहितम् । तं यतिवरं दिवाकरम् । वाचम् एवम् इत्थम्प्रकारेण क्षणादविलम्बेन उवाच उक्तवान् ॥ १ ॥

पुण्येन ते जन्मशतार्जितेन दृग्गोचरस्त्वामवदं तदैव ।
यावत् करोष्यप्रियमङ्ग! मे न स्थास्यामि तावत् सविधे तवेति ॥

यदप्रियं मे कृतवानासि त्वं यतीन्द्र ! सम्प्रत्यविचार्य तस्मात् ।
इतःपरं द्रक्ष्यसि मामनन्तसंज्ञे वने हीति वदंस्तिरोऽभूत् ॥

श्रुत्वा वाक्यमिदं तदा मुररिपोर्ज्ञात्वा तमीशं परं
शोकव्याकुलचित्तवृत्तिरवशश्चाश्रूणि मुञ्चन् क्षणात् ।

वचनप्रकारमेवाह — पुण्येनेति । अहं, जन्मशतैः भवसहस्रैः आर्जितेन सम्पादितेन । ते तव । पुण्येन सुकृतेन । दृग्गोचरः दृष्टिविषयीभूतः सन् । अङ्ग हे । त्वं, मे मम । अप्रियम् अहितम् । यावद् यदा । करोषि, तावत् तदा । तव सविधे समीपे । न स्थास्यामि न स्थितिं करिष्यामि । अथवा मे अप्रियं यावद् यावत्कालपर्यन्तं न करोषि, तावत् तावत्कालपर्यन्तं तव सविधे स्थास्यामीति योजना । इति एवम् । तदैव तस्मिन्काल एव । त्वाम्, अवदम् अवोचम् । 'किन्तु त्वया यास्याम्येव कदापि यद्यवमत' इत्यादिना पूर्वमेवोक्तत्वादिति भावः । इन्द्रवज्रा वृत्तम् ॥ २ ॥

यदिति । हे यतीद्र! दिवाकर! । त्वं, यद् यस्माद्धेतोः । सम्प्रति इदानीम् । अविचार्य पूर्वोक्तं 'किन्तु त्वया यास्याम्येवेत्यादिकं मद्वाक्यं विस्मृत्य । मे मम । अप्रियम् अनिष्टं वामहस्तनिवारणरूपमवमानमित्यर्थः । कृतवान् आसि, तस्माद्धेतोः, इतः परम् अस्मात् कालादनन्तरम् । माम् अनन्तसंज्ञे अनन्तनामके । वने कानने । हीत्यवधारणे । 'हि हेताववधारणे' इत्यमरः । द्रक्ष्यसि अवलोकयिष्यसि । इति वदन् सन् तिरोऽभूद् अन्तर्दधे ॥ ३ ॥

श्रुत्वेति । अथ अनन्तरम् । तदा सः, संयमिवरः दिवाकरः । मुररिपोः श्रीपद्मनाभस्य । इदं पूर्वोक्तम् । वाक्यं, श्रुत्वा । तं बालकं परम् ईशं श्रीपद्मनाभम् । ज्ञात्वा अवगम्य । क्षणात्, शोकेन दुःखेन व्याकुला दीना चित्तवृत्तिः मनोव्यापारो यस्य तादृशः । अवशः परवशः । अश्रूणि नेत्राम्बूनि मुञ्चन् चेति समुच्चये । सन्, क्षुधा परवशः दीनः, अर्भकः बालः, स्वाम् आत्मीयाम्

यद्वत् स्वां जननीं क्षुधा परवशस्त्वारादद्दृष्ट्वार्भक-
स्तद्वत् सोऽथ रुरोद संयमिवरः सम्मुक्तकण्ठं भृशम् ॥ ४ ॥

हे देवदेव! करुणालय! मामनन्य-
नाथं तु मा जहिहि तावकदासदासम् ।
आक्रोशदित्यलघुनष्टधृतिर्यतीन्द्रः
सम्यक् स्मरन् हृदि तदीयविचेष्टितानि ॥ ५ ॥

पादेनाभिहतापि गर्भनिलयस्थेनार्भकेणास्य किं
माता कुप्यति लोकनायक! हरे! विश्वैकमूलं भवान् ।
मन्देनेश! मयाविपक्वमतिना यद्यत् कृतं साम्प्रतं
तत् सर्वं कृपया क्षमस्व भगवन्नित्याद्यवोचन्मुनिः ॥

जननीं मातरम् । आरात् समीपे । 'आराद् दूरसमीपयोरि'त्यमरः । अदृष्ट्वा अविलोक्य । यद्वत्, यथा रोदितीति शेषः । तद्वत् तथा । संमुक्तकण्ठम् उन्मुक्तकण्ठध्वनि यथा तथा, उच्चैःस्वरमिति यावत् । भृशम् अधिकम् । रुरोद विललाप ॥ ४ ॥

रोदनप्रकारमेवाह — हे इति । तदीयानि बालकीयानि विचेष्टितानि व्यापारान् । हृदि मनसि । सम्यक् स्मरन् अलघु अनल्पं नष्टधृतिः नष्टधैर्यः, अत्यन्तमपगतधैर्य इत्यर्थः । यतीन्द्रः दिवाकरः । हे देवदेव! करुणालय! कृपालय! । नास्त्यन्यो नाथो यस्य सोऽनन्यनाथः तम् । त्वदेकशरणमित्यर्थः । तावका ये दासास्तेषामपि दासं भृत्यं मां मा जहिहि न त्यज इति आक्रोशत् ॥ ५ ॥

पादेनेति । मुनिः दिवाकरः । गर्भनिलयस्थेन गर्भपात्रस्थितेन । अर्भकेण बालकेन कर्त्रा । पादेन करणेन । अभिहता ताडितापि । अस्य अर्भकस्य माता, कुप्यति कोपं करोति किं, नैव कुप्यतीत्यर्थः । लोकनायक! जगन्नाथ! हरे! भवान्, विश्वेषां सर्वेषाम् एकं प्रधानं मूलं कारणं सकलजगदादिकारणमित्यर्थः, भवतीति शेषः । अनेन भगवतो मातृसमपोषकत्वमस्यार्भकसमपोष्यत्वं च प्रतिपादितम् । हे ईश! नाथ! भगवन्! मन्देन मूढेन ।

द्रष्टुं भूयो यतीन्द्रः श्रमसलिलकणैरावृतं तन्मुखाब्जं
स्निग्धं तं मन्दहासं निखिलभुवनसम्मोहनं कैटभारेः ।
श्रोतुं वा तानि तानि स्फुटमतिकुतुकी तस्य सम्भाषितानि
स्मृत्वा स्वेनापराधं कृतमहह परं नैव सेहे विषादम् ॥ ७ ॥

धिक्कुर्वन् निजचेष्टितं निरवमे तस्मिन्नवज्ञाकरं
कोऽहं कुत्र किल स्थितोऽस्मि धरणावित्यप्यजानन्नयम् ।

अविपक्वमतिना अशान्तबुद्धिना । मया, साम्प्रतम् इदानीम् । यद् यत् कृतं, तत् सर्वं, कृपया दयया । क्षमस्व, इत्यादि, अवोचद् उक्तवान् । माता कुप्यतीत्यत्र लोकोक्तिरलङ्कारः । 'लोकप्रवादानुकृतिर्लोकोक्तिरिति भण्यते' इति लक्षणात् ॥ ६ ॥

द्रष्टुमिति । श्रमसलिलकणैः स्वेदबिन्दुभिः । आवृतं परिवृतम् । * तस्य भगवतः मुखाब्जं वदनारविन्दम् । भूयः मुहुरपि । द्रष्टुमवलोकितुम् । स्निग्धं मसृणम् । निखिलानां भुवनानां सम्मोहनं विमोहकरम् । कैटभारेः श्रीपद्मनाभस्य । तं तादृशम् अनिर्वचनीयमित्यर्थः । मन्दहासं, द्रष्टुमित्यत्रापि योज्यम् । तस्य भगवतः तानि तानि अनिर्वचनीयमनोहराणि । सम्भाषितानि वचनानि । स्फुटं व्यक्तं श्रोतुम् । वाकारः समुच्चयार्थकः, श्रोतुं चेत्यर्थः । अतिकुतुकी अत्यन्तकौतुकशाली । यतीन्द्रः दिवाकरः । स्वेन आत्मना । कृतम् अपराधं स्मृत्वा, परमधिकम् । विषादं दुःखम् । नैव सेहे न सोढवानेव । अहहेति खेदे । 'अहहेत्यद्भुते खेदे' इत्यमरः ॥ ७ ॥

धिक्कुर्वन्निति । अयं संन्यासिनाथो दिवाकरः । निरवमे अनपकृष्टे सर्वोत्कृष्ट इत्यर्थः । तस्मिन् श्रीपद्मनाभे । अवज्ञाकरं निन्दाकरम् । निजचेष्टितम् आत्मीयव्यापारम् । धिक्कुर्वन् निराकुर्वन् । अत एव अहं कः, धरणौ भूमौ । कुत्र कस्मिन् देशे । स्थितश्चास्मि । इत्यपि एवमपि । अजानन् सन्, नासायां नासिकायां न्यस्ता निहिता कराङ्गुलिः अर्थात् तर्जनी येन तादृशः ।

---

* तद् मुखाब्जमिति व्यासः श्रेयान् । तदित्यस्य सुप्रसिद्धसौन्दर्यमित्यर्थः । कैटभारेरिति मुखाब्जमित्यत्रापि सम्बध्यते ।

नासान्यस्तकराङ्गुलिः परवशो रोमाञ्चिताङ्गो भृशं
सन्नः स्विन्नतनुश्च खिन्नहृदयः संन्यासिनाथोऽभवत् ॥ ८ ॥

तदनु यतीश्वरो जरया तात्कालिकेन शोकेन च नितरां विवशोऽपि हरिचरणनलिनभजनबद्धहृदयस्तदानीं तमेवान्वेष्टुं कृतनिश्चयस्तस्मात प्रदेशात् प्रतस्थे ॥ ३ ॥

अथ प्रस्थितः स तु भिक्षुकवरेण्यो दानवारिपदपङ्कजसन्निहितनिजचित्तवृत्तिर्विगलद्दानवारिवर्षुलकपोलविविध - मातङ्गघटासमाकुलानि कुत्रचिच्छस्त्रशास्त्रपारङ्गतानिस्त्रिंशविध्वस्तसमस्तारिपुमण्डलनिस्तुलमहारथसमावृतानि कुहचिद-

अयं च करुणरसस्यानुभावः । परवशः पराधीनः । रोमाञ्चिताङ्गः रोमाञ्चितशरीरः । भृशमधिकम् । स्विन्नतनुः स्वेदयुक्तशरीरः । रोमाञ्चादयः सात्त्विकभावाः । सन्न क्लान्तः । ग्लानिरत्र सञ्चारीभावः । खिन्नहृदयश्च अभवत् । खेदः स्थायी भावः ॥ ८ ॥

तदन्विति । तदनु तदनन्तरम् । हरेः श्रीपद्मनाभस्य चरणनलिनभजने पादारविन्दभजने बद्धहृदयः निहितचित्तः । यतीश्वरः दिवाकरः । जरया वृद्धतयेत्यर्थः । तात्कालिकेन तत्कालसम्भूतेन । शोकेन दुःखेन च, भगवत्तिरोधानसञ्जातविषादेनेति यावत् । नितराम अत्यन्तम् । विवशः परवशोऽपि । अनेन प्रस्थानाशक्तत्वमुक्तम् । तदानीं, त श्रीपद्मनाभमेव । अन्वेष्टुं, कृतनिश्चयः, तस्मात् प्रदेशात् आनर्तराज्यात् । प्रतस्थे प्रस्थितवान् ॥ ३ ॥

अथेति । अथ अनन्तरम् । दानवारेः श्रीपद्मनाभस्य पदपङ्कजयोः सन्निहिता सम्यङ्निवेशिता चित्तवृत्तिर्मनोव्यापारो येन तादृशः । प्रस्थित: प्रयातः । सः भिक्षुकवरेण्यः दिवाकरः तु । अस्य गद्यस्यान्ते मध्येमार्गमित्येकं पदं वर्तते । तदप्युपादाय पत्तनानि वनानि च मध्येमार्गं सन्ददर्शेति योजना तानि कीदृशानीत्याकाङ्क्षायां पत्तनविशेषणानि पूर्वमाह— विगलदित्यादिना । विगलतां विस्रवतां दानवारिणां मदजलानां, 'मदो दानमि'त्यमरः, वर्षुलाः

भ्रमण्डलजैत्राङ्ककरणनिपुणविमलमणिहर्म्यविलसितानि विविधमहोज्ज्वलानि बहूनि पत्तनानि क्वचन परस्परवैरसहितविविधभयानकसत्त्वनिवहदारुणारावोद्घोषितोपान्तानि तच्चकिंतकम्पमानचञ्चलाक्षपलायमाननानाप्रकारशशहरिणीमुखमृगवृन्दसमाश्रितोच्चैस्तरमहासालाधस्तलानि तदुपरिस्थितकलकण्ठशुकादिविविधपक्षिकुलरुतजोघुष्यमाणानि वनानि च सन्ददर्श मध्येमार्गम् ॥ ४ ॥

---

वर्षणशीलाः कपोलाः गण्डप्रदेशाः येषां तादृशानां विविधानां भद्रमन्दाद्यनेकविधानां च मातङ्गानां गजानां घटाभिः घटनाभिः, 'करिणां घटना घटा' इत्यमरः, समाकुलानि संकुलानि । कुत्रचित् क्वचन प्रदेशे । शस्त्रेषु शास्त्रेषु च पारंगताः पारदृश्वानः निस्त्रिंशैः खड्गैः करणैः विध्वस्तं विनाशितं समस्तारिपुमण्डलं सकलशत्रुसमूहो यैस्तादृशाः निस्तुलाः निरुपमाश्च ये महारथाः 'आत्मानं सारथिमि'त्यादिलक्षणयुक्ता राजानः तैः समावृतानि सम्यग् व्याप्तानि । कुहचित् कुत्रचित् । अभ्रमण्डलेन मेघसमूहेन जैत्राङ्ककरणे मल्लयुद्धविधाने निपुणाः समर्थाः अतीवोन्नता इति यावत् ये विमलमणिहर्म्याः निर्मलरत्नमयप्रासादाः तैर्विलसितानि शोभितानि । विविधैः महैः उत्सवैरुज्ज्वलानि दीप्राणि । बहूनि अनेकानि । पत्तनानि गृहाणि । अथ वनविशेषणान्याह — क्वचनेति । क्वचन कुत्रचित् । परस्परमन्योन्यं वैरसहितानि द्वेषयुक्तानि विविधानि नानाप्रकाराणि भयानकानि भयङ्कराणि च यानि सत्त्वानि जन्तवः सिंहगजादयः, 'सत्त्वोऽस्त्री जन्तुषु क्लीब' इत्यमरः, तेषां निवहस्य समूहस्य दारुणारावेण भीषणशब्देन उद्घोषितानि संघोषितानि उपान्तानि समीपप्रदेशा येषां तादृशानि । तस्माद् दारुणारावात् चकिताः भीताः अत एव कम्पमाना वेपथुमन्तः चञ्चलाक्षा विलोलदृशः पलायमाना विद्रवन्तः नानाप्रकारा अनेकविधाः शशहरिणीमुखाः शशमृगीप्रभृतयश्च ये मृगास्तेषां वृन्देन समूहेन समाश्रितानि अधिष्ठितानि उच्चैस्तराणाम् अत्युन्नतानां महासालानां महावृक्षाणाम् अधस्तलानि अधोभागप्रदेशा

तदानीमपि स यतीश्वरः क्लान्तोऽपि हरिनामामृतं गायन् गायन्नहर्निशं तमेवानुध्यायन् मार्गदैर्घ्यमपि नाजानीत ॥ ५ ॥

किञ्च, भगवद्दर्शनलोलुपतासञ्जातव्यामोहेन जडाभ्यस्तरुवल्लरीभ्योऽप्येतादृशीं पृच्छामकरोत् ॥ ६ ॥

हे कुन्द! हे चम्पक! हे रसाल!
हे मल्लिके! मालति! काननान्ते ।

येषु तादृशानि । तेषां महासालानाम् उपरि ऊर्ध्वभागे स्थिताः कलकण्ठशुकादयः कोकिलशुकप्रभृतयः विविधाश्च ये पक्षिणः तेषां कुलस्य समूहस्य रुतेन शब्देन, 'तिरश्चां वाशितं रुतमि'त्यमरः, जोघुष्यमाणानि अतीव घुष्यमाणानि । वनानि काननानि च । मध्येमार्गं मार्गस्य मध्ये । संददर्श दृष्टवान् ॥ ४ ॥

तदानीमिति । स यतीश्वरः दिवाकरः । तदानीमपि गमनवेलायामपि । क्लान्तोऽपि श्रान्तोऽपि । हरिनामामृतम् अमृतसदृशं हरिनाम । गायन् गायन् पुनःपुनर्गायन् । अहर्निशं दिवारात्रम् । तमेव श्रीपद्मनाभमेव । अनुध्यायन् सन्, मार्गदैर्घ्यमपि मार्गदीर्घतामपि । नाजानीत न ज्ञातवान् । अतिदूराध्वगमनेऽपि श्रमं न ज्ञातवानित्यर्थः । मार्गदैर्घ्यज्ञानं प्रति गमनक्लान्तिरूपकारणसत्त्वेऽपि तत्कार्यानुत्पत्त्या विशेषोक्तिः । मार्गदैर्घ्यमपीत्यपिशब्दाद् मार्गह्रस्वतायाः अतिसूक्ष्मत्वेन अज्ञानसम्भवेऽपि मार्गदैर्घ्याज्ञानात् तस्य भक्तिरतीवाश्चर्यकारिणीत्यर्थो द्योत्यते ॥ ५ ॥

किञ्चेति । किञ्च अपिच । भगवद्दर्शने श्रीपद्मनाभावलोकने या लोलुपता सश्रद्धता तया सञ्जातेन उत्पन्नेन व्यामोहेन भ्रमेण हेतुना । जडाभ्यः अचेतनाभ्यः तरुवल्लरीभ्यः । अपि अपिश्चेतनसमुच्चायकः । एतादृशीं वक्ष्यमाणप्रकारिकाम् । पृच्छां प्रश्नम् अकरोत् ॥ ६ ॥

हे कुन्देति । हे कुन्द! हेमल्लिकाविशेष! । 'माध्यं कुन्दमि'त्यमरः । हे चम्पक! हे साल! हे चूत! हे मल्लिके! हे मालति! हे जाते!

दृष्टो नु किं साधुजनाब्जभृङ्गो
युष्माभिराभीरवधूभुजङ्गः ॥ ६ ॥

पुनः क्वचिदच्छतमसितोपलसच्छायानि सुरभिलाने-कमणीचककिञ्जल्कसम्पर्कसंवासितानि हरिचरितानीव स-मस्तपङ्कक्षालननिपुणानि निरवद्यरसभरितानि सकलतापहा-रीणि पीयूषसदृशानि बहूनि सरांसि चावालोकत स मस्क-रीन्द्रः ॥ ७ ॥

नायं पिपासां क्षुधमङ्गतान्ति-
मन्तर्व्यजानात् कलयन् मुकुन्दम् ।

---

युष्माभिः, साधुजनाः सज्जना एव यान्यब्जानि पद्मानि तेषु भृङ्गः भ्रमरः। भृङ्गो यथा पद्मेषु तथा साधुजनेषु सादर इत्यर्थः । रूपकालङ्कारः। अत्र भृ-ङ्गत्वारोपात् काननान्तसञ्चारयोग्यत्वमेतेषां दर्शनसौकर्यं च द्योत्यते । आभीर-वधूभुजङ्गः गोपस्त्रीविटः श्रीपद्मनाभ इत्यर्थः । काननान्ते वनान्ते । दृष्टः किन्नु अवलोकितः किमित्यर्थः ॥ ६ ॥

पुनरिति । सः मस्करीन्द्रः यतिवरः । पुनः अनन्तरम् । क्वचित् कु-त्रचित् । अच्छतमो निर्मलतमो यः सितोपलः स्फटिकशिला तेन सच्छा-यानि सदृशानि, अनाविलानीति यावत् । सुरभिलानां सुरभीणाम् अनेकेषां मणीचकानां पद्मानां ये किञ्जल्काः केसराः तत्सम्पर्केण तत्सम्बन्धेन संवा-सितानि सुरभिकृतानि । हरिचरितानि श्रीपद्मनाभचरित्राणीव । समस्तानां स-र्वेषां पङ्कानां कर्दमानां पापानामिति च, 'पङ्कोऽस्त्री शादकर्दमौ', 'अस्त्री पङ्कं पु-मान् पाप्मा' इति चामरः, क्षालने शोधने निपुणानि समर्थानि । निःश्लेषसाधार-णधर्मकोपमालङ्कारः । निरवद्यो निर्दोषो यो रसः मधुररसः तेन भरितानि युक्तानि, निर्दोषजलपूर्णानीति वा । सकलतापहारीणि सर्वतापनिवारकाणि । पीयूषसदृशानि अमृततुल्यानि । बहूनि अनेकानि । सरांसि तटाकानि च । अवालोकत दृष्टवान् ॥ ७ ॥

एतादृशसरोदर्शनानन्तरमपि मुकुन्दासक्तत्वादस्य पिपासादिज्ञानं ना-भूदित्याह — नायमिति । मुकुन्दं श्रीपद्मनाभम् । कलयन् ध्यायन् । अयं

दिवाकरोष्मार्दितविग्रहोऽपि
दिवाकरो नो विरराम मार्गात् ॥ १० ॥

किञ्च, हृषीकेशान्वेषणसुनिश्चितचित्तो निखिलभुवनान्तर्गतसकलकलुषमयजीमूतप्रभञ्जनायितानि भगवन्नामधेयान्युच्चैस्तरामुच्चरन्नुच्चरन् दूरीकृतभीतिश्चचार ॥ ८ ॥

तत्र च दर्शनश्रवणाटनादिषु तमेव भगवन्तं मनसि भावयन् निखिलमपि जगत् तन्मयमेवापश्यत् ॥ ९ ॥

अथ विविधगैरिकमनश्शिलादिविचित्रितान् मत्ततरदन्तिवरदन्ताग्रसङ्घट्टितसानुप्रदेशाननेकप्रकारानोकहवृन्दम-

---

दिवाकरः । पिपासां पातुमिच्छाम् । क्षुधम् , अश्नातुमिति शरीरक्रमं च । अन्तः अन्तर्भागे मनसीत्यर्थः । न व्यजानात् न ज्ञातवान् । दिवाकरः यतीश्वरः । दिवाकरस्य सूर्यस्य ऊष्मणा तापेनार्दितः पीडितः विग्रहः शरीरं यस्य तादृशोऽपि । मार्गात् , नो विरराम नैव निवृत्तः ॥ १० ॥

किञ्चेति । किञ्च अपिच । हृषीकेशस्य श्रीपद्मनाभस्य अन्वेषणे सुनिश्चितं सुतरां निश्चितं चित्तं मनो यस्य तादृशः । अयमिति शेषः । निखिलानां, भुवनशब्देन भुवनस्थजना लक्ष्यन्ते, तेषाम् अन्तर्गतमात्मगतं सकलं समस्तं यत्कलुषं दुरितं तद्रूपस्य जीमूतस्य मेघस्य प्रभञ्जनायितानि प्रभञ्जनवदाचरितानि वायुर्यथा मेघस्यापनोदनकरस्तथा सकलपापापनोदकराणीत्यर्थः । भगवन्नामधेयानि, उच्चैस्तराम् अत्युच्चम् । उच्चरन्नुच्चरन् पुनःपुनर्जपन् । दूरीकृतभीतिः सन्त्यक्तभयः सन् । चचार ॥ ८ ॥

तत्रेति । तत्र च मार्गे च । दर्शनं यत्किञ्चित्पदार्थावलोकनं श्रवणं यत्किञ्चिच्छब्दाकर्णनम् अटनं चङ्क्रमणम् एतदादिषु । तं भगवन्तं श्रीपद्मनाभमेव । मनसि भावयन् ध्यायन् सन् । निखिलं समस्तमपि । जगत् लोकम् । तन्मयं श्रीपद्मनाभमयमेव । अपश्यत् दृष्टवान् ॥ ९ ॥

अथेति । अथानन्तरम् । विविधा नानाप्रकाराः, विचित्रा इत्यर्थः ये गैरिकमनश्शिलादयः धातुविशेषाः, 'धातुर्मनःशिलाद्यद्रेर्गैरिकं तु विशेषतः' इत्य-

यकवचावृतान् वाय्वम्बुपर्णमात्राशनविविधतापसावतंससंसेवितान् विशालबहुकन्दरान्तर्गतकुपितवीरपञ्चाननगणगर्जितनिर्जितघनतरघनाघनारावान् विमलतमनिर्झरपतनमनोहरशब्दमुखरान् परमोन्नतशिखरजालसंस्पृष्टाभ्रमण्डलान् की-

---

मरः । आदिशब्देन "सुवर्णरूप्यताम्राणि हरितालमनःशिलाः । गैरिकाञ्जनकासीसलोहसीसाः सहिङ्गुलाः । गन्धकोऽभ्रकमित्याद्या धातवो गिरिसम्भवाः ।" इत्युक्तधात्वन्तराण्यपि गृह्यन्ते । तैः विचित्रितान् सञ्जातनानावर्णान् । तारकादित्वादितच् । मत्ततराः अत्यन्तं मत्ताः ये दन्तिवराः गजश्रेष्ठाः तेषां दन्ताग्रैः दन्तप्रान्तभागैः संघट्टिताः संहताः सानुप्रदेशाः प्रस्थभागा येषां तादृशान् । 'स्नुः प्रस्थः सानुरस्त्रियामि'त्यमरः । अनेकप्रकारा नानाविधाः ये अनोकहाः वृक्षाः, 'अनोकहः कुटः साल' इत्यमरः, तेषां वृन्दमयेन समूहस्वरूपेण कवचेन तनुच्छेदन आवृतान् छन्नान् बहुप्रकारवृक्षसमूहपरिवृतानित्यर्थः । वायुः पवनः अम्बु जलं पर्णं पत्रम् एतन्मात्रमेव अशनं भक्षणं येषां ते तादृशाः विविधाः नानाप्रकाराश्च ये तापसावतंसाः ऋषिश्रेष्ठाः, तपसां नानाप्रकारत्वात् तापसानामपि नानाप्रकारत्वं, तैः संसेवितान् आश्रितानित्यर्थः । विशाला विस्तृता बह्वः अनेकाश्च ये कन्दराः गुहाः, 'दरी तु कन्दरो वा स्त्री' इत्यमरः, तेषामन्तर्गताः गर्भस्थिताः कुपिताः क्रुद्धाः वीराः शूराश्च ये पञ्चाननाः सिंहाः, 'सिंहो मृगेन्द्रः पञ्चास्य' इत्यमरः, तेषां गणस्य समूहस्य गर्जितेन नादेन करणेन निर्जिताः विजिताः घनतराः अतीव सान्द्राश्च, 'घनं निरन्तरं सान्द्रमि'त्यमरः, अत्युच्चा इत्यर्थः, ये घनाघनारावाः वार्षिकमेघशब्दाः, 'वार्षिकेऽब्दे घनाघन' इत्यमरः, ते यैस्तादृशान् । विमलतमस्यातीव निर्मलस्य निर्झरस्य वारिप्रपातस्य, 'वारिप्रपातो निर्झरो झर' इत्यमरः, पतने प्रवहणे यो मनोहरः शब्दः तेन मुखरान् शब्दायमानान् । परमोन्नतैः अत्युच्चैः शिखरजालैः शृङ्गसमूहैः करणैः, 'कूटोऽस्त्री शिखरं शृङ्गमि'त्यमरः, संस्पृष्टमभ्रमण्डलं मेघसमूहो यैस्तादृशान् । कीचकानां वेणुविशेषाणां, 'वेणवः कीचकास्ते स्युर्ये स्वनन्त्यनिलोद्धताः' इत्यमरः, अन्तर्गता अन्तर्भागे विद्यमानाः ये पवना वायवः तैर्जनितेन उत्पादितेन सुमनोहरेण च कूजनेन शब्देन करणेन संस्म-

चकान्तर्गतपवनजनितसुमनोहरकूजनसंस्मारितहरिमुरलीकोमलनिनदान् बहून् पर्वतान् ददर्श ॥ १० ॥

तत्र च श्रान्तोऽपि भगवद्दर्शनैकमनोरथात् सञ्चरन्नेतादृशवाक्यान्युवाच ॥ ११ ॥

अलमलमयि देवदेव! शौरे!
विवशतरोऽस्म्यहमद्य धावनेन ।
सकृदिममपराधमङ्ग! मे त्वं
परम! कृपाम्बुनिधे! क्षमस्व भूमन्! ॥ ११ ॥

शिशुरिह खलु ताडितोऽपि मात्रा
विलपति हे जननीति हि प्रकामम् ।

---

रितः सम्यक्स्मरणविषयं नीतः हरिमुरल्याः श्रीकृष्णसम्बन्धिनो वेणोः यः कोमलनिनदः मनोहरशब्दः स यैस्तादृशान् । स्मरणालङ्कारः । 'स्यात् स्मृतिभ्रान्तिसन्देहैस्तदङ्कालङ्कृतित्रयम्' इति तल्लक्षणात् । बहून् अनेकांश्च । पर्वतान्, ददर्श दृष्टवान् ॥ १० ॥

तत्रेति । तत्र च मार्गे च श्रान्तोऽपि, भगवद्दर्शने य एकः मुख्यः मनोरथः इच्छा तस्माद्धेतोः । सञ्चरन् सन्, एतादृशानि वक्ष्यमाणप्रकाराणि । वाक्यानि, उवाच उक्तवान् ॥ ११ ॥

वचनप्रकारमेवाह — अलमिति । अयि हे देवदेव! देवानामपि देव! शौरे! । अलमलं तिरोहितस्थितया अलमलमित्यर्थः । द्विर्भावेन आविर्भवने क्षणमपि विलम्बो न कार्य इति द्योत्यते । अहम् अद्य, धावनेन विद्रवणेन । विवशतरः अतीव विवशः । अस्मि । अङ्ग! हे! परम! उत्कृष्ट! । कृपाम्बुनिधे! दयासमुद्र! । भूमन्! परिपूर्ण! । त्वं, मे मम । इमम् अपराधं वामकरनिवारणरूपम् । सकृद् एकवारम् । क्षमस्व सहस्व । पुष्पिताग्रावृत्तम् । 'अयुजि नयुगरेफतो यकारो युजि च नजौ जरगाश्च पुष्पिताग्रे' इति लक्षणात् ॥ ११ ॥

शिशुरिति । शिशुः बालः । मात्रा जनन्या । ताडितः अपि, हे जननि! हे अम्ब! इति प्रकामं अधिकम् । विलपति रोदिति । हीति प्रसिद्धौ ।

विसृजसि यदि मां तथा विना त्वा-
मगतिरहं कतमं समाश्रयामि ॥ १२ ॥

शौरे! तावकवक्त्रकान्तिमिह तामम्भोजगर्वापहां
वाणीमप्यधरीकृतामृतझरीं तं मन्दहासं मधु।
तां नीलाम्बुदसन्निभां च वपुषः शोभां जगन्मोहिनीं
नित्यं संस्मरतो ममाद्य हृदयं त्वां द्रष्टुमुत्कण्ठते ॥ १३ ॥

यन्मायया विधिमुखास्त्रिदशाः समस्ताः
सम्मोहिता भुवननायक! तस्य तेऽहम्।

त्वं मां, विसृजसि यदि त्यजसि चेत्। तथा यथा शिशुः मातरं विना अगतिस्तथा त्वां विनेत्यर्थः। त्वां विना भवन्तम् ऋते। अगतिः निःशरणः। अहम्, इह खलु कतमं, समाश्रयामि सेवे। लोकोक्त्युपमयोः सङ्करः ॥ १२ ॥

शौरे इति। हे शौरे! इह अम्भोजानां तामरसानां गर्वापहां गर्वनाशिनीं ततोऽपि मनोहरामित्यर्थः। ताम् अनिर्वचनीयाम्। तावकवक्त्रकान्तिं भवदीयमुखशोभाम्। अधरीकृता निरस्ता अमृतझरी अमृतप्रवाहो यया तथोक्तां ततोऽपि मधुरामित्यर्थः। वाणीं वाचम्। तं मन्दहासं मन्दस्मितमेव। मधु मकरन्दम्। नीलाम्बुदसन्निभां नीलमेघसदृशीम्। जगन्मोहिनीं ताम् अनिर्वचनीयाम्। वपुषः, शोभाम् अङ्गकान्तिं च। नित्यम् अनवरतम्। संस्मरतः सम्यक् स्मरतः। मम, हृदयं चित्तम्। त्वां द्रष्टुम् अवलोकितुम्। उत्कण्ठते इच्छति। उत्कण्ठा नामेच्छाविशेषः, "सर्वेन्द्रियसुखास्वादो यत्रास्तीत्यभिमन्यते। तत्प्राप्तीच्छां ससङ्कल्पामुत्कण्ठां कवयो विदुः॥" इत्युक्तस्वरूपा ॥ १३ ॥

यन्माययेति। हे भुवननायक! लोकनाथ!। विधिमुखाः ब्रह्मप्रमुखाः। समस्ताः सकलाः। त्रिदशाः देवाः। यन्मायया यस्य तव मायया। सम्मोहिताः सम्यङ्मोहिताः। तस्य तादृशस्य। ते तव। मायां कलयितुं ज्ञातुम्।

मायां कथं कलयितुं प्रभवामि सद्य-
स्तस्मात् प्रसीद भगवन्निति याचना मे ॥ १४ ॥

शोको देहस्य तान्तिः परपुरुष! जरासम्भवा क्षुत्पिपासा
मोहश्चित्तस्य मान्द्यं सकलमिदमहो दर्शनेनेशितुस्ते।
दूरे यास्यत्यवश्यं मुरहर! तिमिराणीव सूर्योदये त-
च्छौरे! कृत्वा कृपां मय्यनवम! भगवन्! दर्शनं देहि पाहि ॥

विवशय न भवत्पदाब्जयुग्मं हृदि कलयन्तमतीव याचमानम्।
निरुपम! तव मायया निकामं पुरुकरुणावसते! विमोहितं माम् ॥

---

अहं कथं, प्रभवामि शक्तो भवामि। भगवन्! तस्मात् त्वं, सद्यः वेगेन, प्रसीद। मे मम याचना, इति एवंप्रकारा, भवतीति शेषः ॥ १४ ॥

शोक इति। हे परपुरुष! पुरुषोत्तम! मुरहर!। शोकः दुःखम्। देहस्य तान्तिः शरीरक्लमः। जरया हेतुना सम्भव उत्पत्तिर्यासां तथोक्ताः। जराहेतुकत्वं सर्वत्र द्रष्टव्यम्। क्षुत्पिपासाः, मोहः विसंज्ञता। चित्तस्य मनसः मान्द्यम्। इदम् उक्तशोकादिकं सर्वम्। ईशितुः ईश्वरस्य। ते तव। दर्शनेन अवलोकेन। सूर्योदये तिमिराणि अन्धकारा इव, यथा अन्धकाराः सूर्योदये दूरे यास्यन्ति तद्वदित्यर्थः। अवश्यं, दूरे यास्यति अपगमिष्यति। हे शौरे! अनवम! भगवन्!। तत् तस्माद्धेतोः। मयि कृपां कृत्वा दर्शनं देहि, अत एव पाहि रक्ष। भवद्दर्शने सति ममैतादृशव्यसनसमूहकथापि न सम्भविष्यति, अतस्तव कृपया तादृशभवद्दर्शनं दत्त्वा तन्निवार्य व्यसनसमूहमपोह्य रक्षेति भावः ॥ १५ ॥

विवशयेति। हे निरुपम! उपमारहित!। पुरुकरुणावसते! भूयिष्ठदयानिलय!। 'पुरुजं पुरु भूयिष्ठं', 'वसती रात्रिवेश्मनोः' इति चामरः। अतीव दयालो! इत्यर्थः। भवत्पदाब्जयुग्मं त्वच्चरणारविन्दयुगलम्। हृदि मनसि। कलयन्तं ध्यायन्तम्। अतीवात्यन्तम्। याचमानं प्रार्थयन्तम्। तव मायया निकामम् अधिकम्। विमोहितं मां न विवशय न विवशं कुरु ॥ १६ ॥

मग्नं शोकमये मां वरद! पयोधौ भवत्पदालम्बम् ।
साम्प्रतमुद्धर शौरे! गतिरिह का वै विना भवन्तं मे ॥ १७ ॥

नेत्रे त्वदीयतनुदर्शनतत्परे मे
कर्णौ च दिव्यमुरलीस्वनपानलोलौ ।
नासा त्वदङ्घ्रितुलसीदलवासनायां
पर्युत्सुका मम मनस्तव सच्चरित्रे ॥ १८ ॥

एवमतिकरुणं बहुधा याचमानः श्रान्तो मध्ये मध्ये किञ्चित् किञ्चिद् विश्रम्य भगवन्नामकीर्तनमयपीयूषास्वा-

---

मग्नमिति । हे वरद! शौरे! त्वं शोकमये दुःखस्वरूपे । पयोधौ समुद्रे । मग्नं, भवत्पदालम्बं तच्चरणाश्रयम् । मां, साम्प्रतमिदानीम् । उद्धर शोकाब्धेः पारं नयेत्यर्थः । भवन्तं विना भवन्तं ऋते । मे मम । इह अस्मिन् लोके । का वै, गतिः शरणम्, न कापीत्यर्थः । तस्माद् भवानेव शरणमिति सिद्धम् । गीतिर्वृत्तम् । "आर्याप्रथमदलोक्तं यदि कथमपि लक्षणं भवेदुभयोः । दलयोः कृतयतिशोभां तां गीतिं गीतवान् भुजङ्गेशः ॥" इति लक्षणात् ॥ १७ ॥

नेत्रे इति । मे मम । नेत्रे नयने । त्वदीयतनोः भवदीयशरीरस्य दर्शने अवलोकने तत्परे सश्रद्धे । कर्णौ, मे इत्यस्यात्राप्यनुषङ्गः । दिव्यः यः मुरलीस्वनः वेणुशब्दः तत्पाने तच्छ्रवणे लोलुपौ सश्रद्धौ च । अत्रोभयत्र भवत इति क्रिया योज्या । मम नासा नासिका । त्वदङ्घ्रितुलसीदलानां वासनायां सौरभ्ये । पर्युत्सुका सश्रद्धा । मनः, ममेत्यस्यात्राप्यनुषङ्गः । तव, सति निर्दोषे चरित्रे, पर्युत्सुकेत्यस्यात्रापि लिङ्गविपरिणामेन योजना । अत्रोभयत्रापि भवतीति योज्यम् ॥ १८ ॥

एवमिति । एवम् उक्तप्रकारेण । अतिकरुणम् अतीव सशोकम् । 'शोकः स्थायी भवेद् यत्र स रसः करुणो मतः' इति लक्षणात् । बहु याचमानः प्रार्थयमानः । श्रान्तः क्लान्तः सन् । मध्ये मध्ये किञ्चित्किञ्चिद्,

दनमात्रशमिततात्कालिकक्लमः पुनरपि सञ्चरन्नयं यत्रकुत्रचित् पतगोत्पतनेन चञ्चलान् महीरुहकिसलयादीन् निरीक्ष्य सर्वदा मनसि स्थितं भगवदागममाशङ्कमानः साधु विलोकयंस्तमदृष्ट्वा विवशः कञ्चित् कालमधोमुखस्तत्रैव तस्थौ ॥ १२ ॥

पुनरपि जगत्पावनानि भगवन्नामधेयान्युच्चैस्तरा जपन् जपन् परमकृपाम्बुनिधिं तमेव हृदि भावयन्नेतादृशवाक्यान्युवाचातिविवशो विगतधैर्यः ॥ १३ ॥

विश्रम्य श्रमपरिहारं कृत्वा । भगवन्नामकीर्तनमयस्य श्रीपद्मनाभनामजपस्वरूपस्य पीयूषस्यामृतस्य आस्वादनमात्रेण पानमात्रेण शमितः विनाशितः यः तात्कालिकक्लमः गमनेन तत्कालोत्पन्नश्रमः, न तु भगवद्दर्शनाभावसञ्जातश्रम इत्यर्थः । एतेन तस्याध्वश्रमापनयनं न तु शयनजलपानादिना, किन्तु भगवन्नामरूपामृतपानेनेति सिद्धम् । पुनरपि भूयोऽपि । सञ्चरन् गच्छन् । अयं दिवाकरः । यत्रकुत्रचित् पतगोत्पतनेन खगोड्डीनेन । चञ्चलान्, महीरुहकिसलयादीन् वृक्षपल्लवप्रमुखान् । निरीक्ष्य विलोक्य । सर्वदा मनसि स्थितं सार्वकालिकचिन्ताविषयीभूतमित्यर्थः । भगवदागमं श्रीपद्मनाभप्राप्तिम् । आशङ्कमानः संशयानः । साधु सम्यक् विलोकयन् । तं श्रीपद्मनाभम् । अदृष्ट्वा अनालोक्य । विवशः परवशः । अधोमुखश्च सन् । एतद् दुःखलक्षणम् । कञ्चित्कालम्, अत्यन्तसंयोगे द्वितीया । तत्रैव तत्प्रदेश एव । तस्थौ स्थितवान् ॥ १२ ॥

पुनरिति । पुनरपि, जगत्पावनानि जगच्छुद्धिकराणि । भगवन्नामधेयानि, उच्चैस्तराम् अत्युच्चम् । जपन् जपन् पुनः पुनर्जपन् । परमकृपाम्बुनिधिम् उत्कृष्टदयासमुद्रम् । तमेव श्रीपद्मनाभमेव । हृदि चित्ते । भावयन् ध्यायन् । अतिविवशः, विगतधैर्यः, अयमिति शेषः । एतादृशानि वक्ष्यमाणप्रकाराणि वाक्यानि । उवाच उक्तवान् ॥ १३ ॥

इतःपरं देव! भवद्वियोगं सोढुं न शक्तोऽस्मि हरे! मुकुन्द! ।
प्रसीद तस्मादमलं स्वकीयं रूपं परं दर्शयितुं हि मह्यम् ॥

चातको भुवि यथा पयोधरं याचते खलु पिपासयाकुलः ।
त्वां तथैव कुतुकी निरीक्षितुं प्रार्थयेऽहमचिरात् कृपां कुरु ॥

जलधिदुहितृचित्तचौर्यलोलं मुनिजनमानसपद्मिनीमरालम् ।
मुरहर! मम दर्शय त्वदीयं मदनमनोहरमद्भुतं स्वरूपम् ॥

---

इत इति । हे देव! मुकुन्द! हरे! अहम् इतःपरम् एतत्कालानन्तरम् । भवद्वियोगं भवद्विरहम् । सोढुं क्षन्तुं शक्तः न अस्मि । तस्मात् शक्त्यभावाद्धेतोः । अमलं निर्मलम् । परम् उत्कृष्टम् । स्वकीयम् आत्मीयम् । रूपम् आकारम् । दर्शयितुम् अवलोकयितुं । मह्यं प्रसीद रूपं दर्शयेत्यर्थः ॥ १९ ॥

चातक इति । चातको नाम पक्षिविशेषः । 'चातकः स्तोककः समावि'त्यमरः । पिपासया तृष्णया । आकुलः सन्, भुवि भूमौ । यथा पयोधरं मेघं याचते खलु, तथैव अहं त्वाम् अचिराद् वेगेन । निरीक्षितुं कुतुकी सन्, याचे प्रार्थये । कृपां दयां कुरु । चातकस्य यथा पयोधरकृतजलदानेनैव तृप्तिस्तथा मम भवद्दर्शनेनैव दुःखनिवृत्तिः न त्वन्यथा । अतः कृपया त्वद्दर्शनं दत्त्वा रक्षेति भावः । रथोद्धतावृत्तम् । 'रान्नराविह रथोद्धता लगावि'ति तल्लक्षणात् ॥ २० ॥

जलधीति । हे मुरहर! जलधिदुहितुः श्रीभगवत्याः । चित्तचौर्ये चित्तापहरणे लोलं सतृष्णम् । 'लोलश्चलसतृष्णयोरि'त्यमरः । लक्ष्मीमनोहरमित्यर्थः । मुनिजनानां महर्षिजनानां मानसानि मनांस्येव याः पद्मिन्यस्तासु मरालं हंसं, हंसो यथा पद्मिनीषु तथा मुनिजनमनःसु सदा स्थितमित्यर्थः । सार्वकालिकमुनिजनध्यानविषयमिति यावत् । मदनमनोहरं कामसुन्दरम् । अद्भुतम् आश्चर्यकरम् । त्वदीयं भवत्सम्बन्धि । स्वरूपं, मम, दर्शय दर्शनविषयं कुरु ॥ २१ ॥

विपिनेऽथ कण्टकसमावृते चरन्
विवशोऽहमीश्वर! जराकुलो भृशम् ।
करुणानिधे! तव मनोहरं वपु-
र्मम देव! दर्शय हरे! हरेः शुचम् ॥ २२ ॥

स्मितसंयुतेन विजितामृतेन ते
वचनेन तापमखिलं व्यपोहय ।
सरसीरुहाक्ष! सरसं दिश प्रभो!
मम नेत्रयोस्तव हि मूर्तिपारणाम् ॥ २३ ॥

चेतो मे भुवनैकनायक! शुचा व्याप्तं हरे! साम्प्रतं
बाष्पव्यापृतलोचनोऽहमवशो मार्गावलोकेऽप्यहो ।

---

विपिन इति । हे ईश्वर! जराकुलः, अहं, कण्टकैः सूच्यग्रैः । 'सूच्यग्रे क्षुद्रशत्रौ च रोमहर्षे च कण्टक' इत्यमरः । समावृते सम्यक् संकुले । अथ कृत्स्ने । 'मङ्गलानन्तरारम्भप्रश्नकार्त्स्न्येष्वथो अथ' इत्यमर । विपिने वने । चरन्, भृशमधिकम् । विवशः परवशः । अस्मीति शेषः । हे करुणानिधे! देव! हरे! श्रीपद्मनाभ! मनोहरं सुन्दरम् । तव वपुः शरीरम् । मम दर्शय, शुचं दुःखम् । हरेः अपहर, नाशयेत्यर्थः । मञ्जुभाषिणीवृत्तम् । 'सजसाजगौ भवति मञ्जुभाषिणी'ति लक्षणात् ॥ २२ ॥

स्मितेति । स्मितसंयुतेन मन्दहासयुक्तेन । विजितामृतेन अमृतादपि माधुर्ययुक्तेनेत्यर्थः । ते तव । वचनेन वाचा । अखिलं, तापं दुःखम् । व्यपोहय विनाशय । हे सरसीरुहाक्ष! प्रभो! मम नेत्रयोः तव, मूर्तिपारणां मूर्त्यैव शरीरेणैव पारणां भक्षणम् । सरसं, दिश देहि । तव मूर्तिं मद्दृष्टिगोचरं कुर्वित्यर्थः । अत्र मूर्तिपारणामित्युक्त्या यतिनेत्रयोः भगवद्दर्शनरूपोपवासक्षुधितत्वं व्यज्यते ॥ २३ ॥

चेत इति । हे भुवनैकनायक! हरे!, मे मम । चेतः मनः । साम्प्रतम् इदानीम् । शुचा दुःखेन । व्याप्तम् आकुलं, भवतीति शेषः । बाष्पेणाश्रुणा व्यापृते छन्ने लोचने नयने यस्य तथोक्तः । अहं, मार्गावलोके अध्व-

देहं चेह जराक्षुदादिभिरलं संव्याकुलं यत् ततः
शौरे! त्वत्करुणां विनाद्य भगवन्! पश्यामि नान्यां गतिम्॥

अथ स यतीश्वरस्त्वेवमतिविवशतरमभ्यर्थयमानः पुनरपि पूर्वोक्तप्रकारानेकान् पत्तनवनसरित्पर्वतानुल्लङ्घ्याऽतिदूरमध्वानं गच्छन् येषुकेषुचिच्छायातरुमूलेषु कश्चित् कालं विश्रम्य विश्रम्य पुनरपि चरन्नार्तहृदयस्तनुभूततनुव्याप्तघर्मजलकणो भगवत्पादलक्ष्मैव लक्ष्यं हृदि निधाय क्षुत्तृडादिभिरतिव्याकुलोऽपि मनःस्थितहरिनिरीक्षणमहोत्सवकुतूहलविस्मारितदृश्यमानसकलवस्तुप्रेमातिरेकोऽतिमहता कालेन भगवदुदीरितं सुविमलतापसगणसंसेवितं तदनन्तवनमवाप ॥ १४ ॥

---

दर्शनेऽपि । अवशः परवशः । अशक्त इत्यर्थः । अस्मीति शेषः । अहो इति खेदे । देहं शरीरं च । इह जराक्षुदादिभिः जरया क्षुधा पिपासादयोऽप्यादिशब्दाद् गृह्यन्ते । अलम् अधिकम् । संव्याकुलं क्षीणम् । भवतीति शेषः । यत् यस्माद्धेतोः, ततस्तस्माद्धेतोः, हे भगवन्! शौरे, अहम् अद्य त्वत्करुणां विना अन्यां गतिं शरणं न पश्यामि । त्वत्करुणैव शरणमित्यर्थः ॥ २४ ॥

अथेति । अथ अनन्तरम् । स यतीश्वरः दिवाकरः । एवम् उक्तप्रकारेण । अतिविवशतरम् अतिशयेनाधिकदैन्ययुक्त यथा तथा । अभ्यर्थयमानः याचमानः । पुनरपि भूयोऽपि । पूर्वोक्तप्रकारान् 'विगलद्घानवारि' त्यादिना पूर्वमुक्तविधानित्यर्थः । अनेकान् बहून् । पत्तनसरित्पर्वतान् उल्लङ्घ्य अतिक्रम्य । अतिदूरम् अध्वानं मार्गम् । गच्छन्, येषुकेषुचित् छायाप्रचुरास्तरवः छायातरवः, शाकपार्थिवादित्वात् समासः, तेषां मूलेषु अधोभागेषु कश्चित् कालं विश्रम्य विश्रम्य, क्षुत्तृडादिभिः आकुलः क्षीणः अपि । मनसि स्थितं हरिनिरीक्षणं श्रीपद्मनाभावलोकनमेव यो महोत्सवः तत्र यत् कुतूहलं कौतुकं तेन विस्मारितो दृश्यमानसकलवस्तुषु यः प्रेमातिरेकः स्नेहातिशयः स यस्य तथोक्तः । आर्तहृदयः तनुभूतायां कृशीभूतायां तनौ शरीरे व्याप्ताः घर्मजल-

तत्र चायं सञ्चरन् सुमहतः कस्यचिन्मधूकमहीरुहस्य कोटरान्तर्निलीनं तं भगवन्तमवलोक्य तद्विलोकनकुतूहलेन यदा तन्निकटमगात्, तदा स तरुश्छिन्नपातं* पपात ॥ १३ ॥

अथ तदानीं विस्मितोऽयं यतीन्द्रः कथमसौ महीरुहः सुगरीयान् पतित इति विलोकयन् मत्स्यतीर्थनिहितमूर्धानं

---

कणाः स्वेदबिन्दवो यस्य तादृशः । भगवत्पादलक्ष्मैव श्रीपद्मनाभपादचिह्नमेव । हृदि मनसि । लक्ष्यं निधाय, पुनरपि चरन् सन्, अतिमहता कालेन, भगवदुदीरितं भगवदुक्तम् । 'अनन्तसंज्ञे वने ही'त्यनेन पूर्वमुक्तमित्यर्थः । सुविमलानामतीव निर्मलचित्तानां तापसानां गणेन समूहेन संसेवितं समाश्रितमित्यर्थः । तत् प्रसिद्धम् । अनन्तवनम् अनन्तसंज्ञं वनम् । अवाप प्राप्तवान् ॥ १२ ॥

तत्रेति । तत्र च अनन्तवने च । सञ्चरन् अयं दिवाकरः । सुमहतः अत्युन्नतस्य । कस्यचिद् एकस्य । मधूकमहीरुहस्य मधूकाख्यवृक्षस्य । 'मधूके तु गुडपुष्पमधुद्रुमावि'त्यमरः । कोटरान्तः कोटरान्तर्भागे । कोटरो नाम वृक्षगर्तः । 'निष्कुहः कोटरं वा ना' इत्यमरः । निलीनम् अन्तर्धाय स्थितमित्यर्थः । तं बालवेषधारिणम् । भगवन्तं श्रीपद्मनाभम् । विलोक्य दृष्ट्वा । तस्य श्रीपद्मनाभस्य विलोकने यत् कुतूहलं कौतुकं तेन हेतुना । यदा यस्मिन् काले । तस्य मधूकमहीरुहस्य निकटं समीपम् । अगात् गतवान् । तदा तस्मिन् काले । स तरुः मधूकमहीरुहः । छिन्नपातं पपात छिन्नमूलतरुवद् अपतत् ॥ १३ ॥

अथेति । अथ तरुपतनानन्तरम् । तदानीं तस्मिन् काले । विस्मितः सञ्जातविस्मयः । अयं यतीन्द्रः दिवाकरः । सुगरीयान् अत्युन्नतः । असौ महीरुहः मधूकवृक्षः । कथं कस्माद् हेतोः । पतितः इति एवम्प्रकारेण । मत्वेति शेषः । विलोकयन् सन् । मत्स्यतीर्थे मत्स्यतीर्थनामके तीर्थे, एतत्पर्यन्ते, निहितः मूर्धा शिरो यस्य तथोक्तम् । शङ्खचक्रतीर्थयोः निहितं न्यस्तं बाहुयुग्मं भुजयुगलं यस्य तथोक्तम् । धर्मतीर्थयोः संनिहितं पादयुगलं यस्य तथोक्तम् । समस्तानां सर्वेषां भक्तानां सेवकजनानां रक्षण

---

* 'उपमाने कर्मणि च' (३. ४. ४५) इति णमुल् ।

शङ्खचक्रतीर्थनिहितबाहुयुग्मं धर्माधर्मतीर्थसन्निहितपादयुगलं समस्तभक्तसञ्चयसञ्चितापरिमितसुकृतपुञ्जं परमहंसकुलमूलधनं निश्शरणशरण्यं त्रिभुवनैकनायकं निखिलवेदमार्गपरिमार्गितं भगवन्तं श्रीपद्मनाभं निजसुकृतशतविपाकेनापश्यत् ॥ १४ ॥

इति स्यानन्दूरपुरवर्णनप्रबन्धे प्रत्यक्षदर्शनं नाम

द्वितीयः स्तबकः ।

समूहेन सञ्चितः सम्पादितः अपरिमितश्च यः सुकृतपुञ्जः पुण्यसमूहः तत्स्वरूपं तादृशसुकृतपुञ्जसाध्यमित्यर्थः । साध्यसाधनयोरभेदोपचारः । परमहंसकुलस्य योगीश्वरसमूहस्य मूलधनं मूलद्रव्यम् । 'नीवी परिपणो मूलधनमि'त्यमरः । निःशरणानामगतिकानां शरण्यं शरणार्हम् । त्रिभुवनस्य त्रैलोक्यस्य एकं मुख्यं नायकं नाथम् । निखिलैः समस्तैः वेदमार्गैः करणैः परिमार्गितं अन्विष्टं, नतु दृष्टं, मुनिभिरिति शेषः । भगवन्तं ऐश्वर्यादिषट्कपरिपूर्णम् । श्रीपद्मनाभं, निजानामात्मीयानां सुकृतानां शतस्य समूहस्य विपाकेन परिपाकेन फलेन हेतुना । अपश्यद् दृष्टवान् ॥ १४ ॥

इति स्यानन्दूरपुरवर्णनप्रबन्धव्याख्यायां

द्वितीयः स्तबकः ।

## अथ तृतीयः स्तबकः ।

तावद् विस्मयहर्षमग्नहृदयः सोऽयं परिव्राजक-
स्तं प्रत्यक्षतया विलोक्य सहसा श्रीपद्मनाभं हरिम् ।
सम्प्राप्येह महानिधिं विधिवशाद् यद्वज्जनो निर्धन-
स्तद्वन्निस्तुलमोदरूपजलधौ मग्नस्तमूचे वचः ॥ १ ॥

अद्याहं गतकल्मषोऽस्मि सफलं जातं तवाराधनं
लक्ष्मीनाथ! ममापि जन्म कृपया नूनं तवाधोक्षज! ।

अथ दिवाकरयतीश्वरपरिदृश्यमानभगवत्स्वरूपं वर्णयिष्यन् तृतीयस्तबकमारभते — तावदिति । तावत् भगवत्प्रत्यक्षदर्शनकाले । विस्मये अद्भुते हर्षे सन्तोषे च मग्नं हृदयं मनो यस्य तथोक्तः । सः अयं परिव्राजकः दिवाकरः । हरिं पापहर्तारम् । तं श्रीपद्मनाभम् । प्रत्यक्षतया चाक्षुषप्रत्यक्षविषयत्वेन । विलोक्य दृष्ट्वा । इह भूमौ । निर्धनः जनः दरिद्रः । विधिवशाद् दैववशात् । महानिधिं, सम्प्राप्य लब्ध्वा । यद्वत् यथा । तद्वत् तथा । निस्तुले निरुपमे मोदरूपजलधौ हर्षात्मकसमुद्रे । मग्नः सन्, तं श्रीपद्मनाभम् । वचः, ऊचे उक्तवान् । 'यद्वज्जनो निर्धन' इत्यत्रोपमा, 'निस्तुल' इत्यत्रोपमानलुप्तोपमा, मोदरूपजलधावि'त्यत्र रूपकं चेति तेषां संसृष्टिः ॥ १ ॥

वचनप्रकारमेवाह — अद्येति । हे लक्ष्मीनाथ! अधोक्षज! । यद् यस्माद्धेतोः । अहं, दुरूहैः दुःखेन ऊहितुं शक्यैः नैगमवचोभिः वेदसम्बन्धिवाक्यैः मृग्यं मार्गितुम् अन्वेष्टुं योग्यम् । इह भूमौ । पश्यतां द्रष्टॄणाम् । विश्वेषां सर्वेषाम् । नृणां नराणाम् । नयनयोः नेत्रयोः । पीयूषवर्षप्रदं अमृतधाराप्रदम् । अमृतधारया नेत्रयोर्यावानानन्दः, तावदानन्दप्रदमित्यर्थः । तेषां सन्तोषकरमिति यावत् । भवन्तं, पश्यामि चाक्षुषप्रत्यक्षविषयतयैवावलोकये । यत्तदोर्नित्यसम्बन्धात् पूर्वार्धे तदिति योज्यम् । तत् तस्माद्धेतोः । अद्य, अहं, गतकल्मषः विध्वस्तपापः । अस्मि । तव कृपया दयया । तवाराधनं पूजनम् । मम जन्म जननमपि ।

यत् पश्यामि दुरूहनैगमवचोमृग्यं भवन्तं नृणां
विश्वेषामिह पश्यतां नयनयोः पीयूषवर्षप्रदम् ॥ २ ॥

तदनु स यतिवरो हे देवदेव! श्रीपद्मनाभ! हरे! मुकुन्द! कथमेतादृशातिविशालतनोस्तव परमशक्तवपुर्वर्षीयानहं प्रदक्षिणप्रणामादिकं कर्तुं पारयामि । तस्मादस्मत्प्रदक्षिणादिगोचरसुमनोहरवपुषा भवितव्यं भवतेत्ययाचत ॥ १ ॥

निशम्यैतद् वाक्यं स तु यतिवरेण्यस्य मुरभित्
तदा प्रोवाचैनं मधुरवचसा सस्मितरुचा ।

---

सफलं फलसहितम् । जातं सम्भूतम् । भवतीति शेषः । नूनं निश्चयः । 'नूनं तर्केऽर्थनिश्चये' इत्यमरः । समर्थनीयस्य गतकल्मषत्वादिरूपार्थस्य यत् पश्यामीत्यादिना समर्थनाद् वाक्यार्थहेतुकं काव्यलिङ्गमलङ्कारः ॥ २ ॥

तदन्विति । तदनु तदनन्तरम् । स यतिवरः दिवाकरः । हे देवदेव! हरे! मुकुन्द! श्रीपद्मनाभ! परम् अधिकम् । अशक्तवपुः, वर्षीयान् वृद्धः । 'वर्षीयान् दशमी ज्यायानि'त्यमरः । अहम् एतादृशातिविशालतनोः एवम्प्रकारातिदीर्घशरीरस्य मत्स्यतीर्थात् प्रभृति धर्माधर्मतीर्थपर्यन्तशरीरस्येत्यर्थः । तव, प्रदक्षिणप्रणामादिकं प्रदक्षिणनमस्कारादिकम् । आदिना पूजनादिपरिग्रहः । कर्तुं विधातुम् । कथं केन प्रकारेण । पारयामि शक्तो भवामि, न कथमपीत्यर्थः । अग्रे तस्मादित्यस्य सत्त्वाद् अत्र यस्मादित्यध्याहार्यम् । तस्माद्धेतोः भवता अस्मत्प्रदक्षिणादीनां गोचरः विषयः सुमनोहरं च यद् वपुः शरीरं तद् यस्य स तथा तादृशेन । भवितव्यं भवितुं योग्यम् । इति एवम्प्रकारेण । अयाचत याचितवान् ॥ १ ॥

निशम्येति । सः मुरभित् श्रीपद्मनाभः तु । यतिवरेण्यस्य दिवाकरस्य । एतत् पूर्वोक्तप्रकारकम् । वाक्यं, निशम्य श्रुत्वा । तदा तस्मिन् काले । सस्मितरुचा मन्दहासकान्तिसहितेन । मधुरवचसा माधुर्ययुक्तवाचा । एनं दि-

प्रसन्नोऽहं भक्त्या यतिवर! तवानन्यपरया
विषण्णो मा भूयास्त्वमिह शरणं मां व्रज सदा ॥ ३ ॥

किञ्च यावत्परिमितवपुषं मामिच्छसि तावत्परिमाणो भवामीति भगवदाज्ञानुसारेण स्वदण्डत्रितयपरिमेयतां याचमाने तस्मिन् तथेत्यङ्गीकृत्य तदीयदण्डत्रयपरिमितप्रदेशमात्रसङ्कुचितनिजवपुः सुमनोहरं पावनपावनं निजशोभाविनिन्दितनभोमणिमण्डलं काञ्चनमयं विमानं निर्गतावधिकालं सज्जनपरिपालनाय बद्धकक्ष्यः सन्नलञ्चकार भगवानरविन्दनाभः ॥ २ ॥

वाकरम् । प्रोवाच उक्तवान् । वचनप्रकारमाह— प्रसन्नोऽहमिति । हे यतिवर! तव, अन्यस्मिन् परा आसक्ता अन्यपरा सा न भवतीत्यनन्यपरा तादृश्या, मदेकतत्परयेति यावत् । भक्त्या, अहं प्रसन्नः, अस्मीति शेषः । त्वम्, इह विषण्णः खिन्नः । मा भूयाः नैव भवेरित्यर्थः । सदा मां, शरणं रक्षितारम् । 'शरणं गृहरक्षित्रोरि'त्यमरः । व्रज याहि ॥ ३ ॥

किञ्चेति । किञ्च, त्वं, मां, यावत्परिमितवपुषं यावता परिमाणेन परिच्छिन्नं वपुः शरीरं यस्य तादृशम् । इच्छसि, अहं तावत्परिमाणः, भवामि । इति, भगवतः श्रीपद्मनाभस्य आज्ञानुसारेण नियोगानुसरणेन । तस्मिन् दिवाकरे । स्वस्य आत्मनः दिवाकरसम्बन्धिना दण्डत्रितयेन परिमेयतां परिमातुं शक्यताम् । याचमाने सति, भगवान् अरविन्दनाभः श्रीपद्मनाभः । तथेत्यङ्गीकृत्य, तदीयेन दिवाकरसम्बन्धिना दण्डत्रयेण परिमितः यः प्रदेशस्तावन्मात्रे संकुचितं सङ्कोचं प्रापितं निजम् आत्मीयं वपुः शरीरं येन तादृशः सन् । सुमनोहरं, पावनपावनं पावनेष्वपि पावनम् अतीव शुद्धिकरमित्यर्थः । निजया आत्मीयया विमानसम्बन्धिन्या शोभया विनिन्दितं विशेषेण निन्दितं नभोमणिमण्डलम् आदित्यमण्डलं येन तादृशम् । 'द्युमणिस्तरणिरि'त्यमरः । काञ्चनमयं स्वर्णमयम् । निर्गतः अपगतः अवधिकालः प्रलयादर्वाचीनोऽवसानकालो

अथ तदानीमभङ्गतमचिदानन्दपयोनिधिभङ्गडोलायमानमानसः स तु मस्करिवरेण्यो वक्ष्यमाणस्वरूपं ददर्श तं भगवन्तम् ॥ ३ ॥

भास्वद्भास्करबिम्बकोटिविलसन्माणिक्यवज्रादिस-
द्रत्नानां परितो निरस्ततमसां निस्सीमया शोभया ।
पाकारातिशरासकान्तिविजये नित्यं सुनिष्णातया-
पश्यत् सोऽथ विचित्रिताम्बरतलं दिव्यं किरीटं हरेः ॥ ४ ॥

यस्मात् तादृशम् । विमानं प्रासादम् । सज्जनानां परिपालनाय रक्षणाय रक्षणं कर्तुम् । 'क्रियार्थोपपद'त्यादिना चतुर्थी । बद्धकक्ष्यः सन् उद्युक्तः सन् इत्यर्थः । अलञ्चकार अलङ्कृतवान् । तस्य स्वयमेवालङ्कारो भूत्वा तत्रैव स्थितवानिति भावः ॥ २ ॥

अथेति । अथ, तदानीम्, अभङ्गतमः अतीवाभङ्गः नाशरहित इत्यर्थः । 'भङ्गः पराजये छेदे तरङ्गे चापलण्डने' इति शब्दरत्नाकरः, यः चिदानन्दपयोनिधिः ज्ञानानन्दमयसमुद्रः तस्य ये भङ्गाः तरङ्गाः तत्र डोलायमानं डोलावदाचरितं निमज्जदुन्मज्जदित्यर्थः मानसं मनो यस्य स तादृशः, नित्यपरिपूर्णब्रह्मानन्दनिमग्नचित्त इति भावः । सः मस्करिवरेण्यः दिवाकरः तु । तं भगवन्तं श्रीपद्मनाभम् । वक्ष्यमाणस्वरूपं 'भास्वदि'त्यादिना वक्ष्यमाणाकारं सन्तम् । ददर्श दृष्टवान् ॥ ३ ॥

भगवत्स्वरूपं वर्णयति — भास्वदिति । अथ, सः दिवाकरः । भास्वतां देदीप्यमानानां भास्करबिम्बानाम् आदित्यमण्डलानां कोटिवद् विलसत् शोभमानम् । परितः अभितः । निरस्ततमसां निवारितान्धकाराणाम्, अतीव प्रभावतामिति यावत् । माणिक्यवज्रादीनि पद्मरागहीरकादीनि यानि रत्नानि तेषाम् । पाकारातिशरासस्य इन्द्रचापस्य कान्त्याः शोभाया विजये नित्यम् अनवरतं सुनिष्णातया अतीव निपुणया 'प्रवीणनिपुणाभिज्ञविज्ञनिष्णाते'त्यमरः । यथा नानाप्रभाविशिष्टेन्द्रचापेन नभोमण्डलं विराजते तथा भगवत्किरीटप्रत्युप्तनानारत्नजालकान्त्या विराजत इति भावः । अत्र नित्यमिति पदेनेन्द्रचा-

अद्राक्षीच्च चकोरबन्धुपृथुकश्रीचौर्यलोलं विभोः
प्रोद्यन्निस्तुलगन्धशालिघनसारात्तोर्ध्वपुण्ड्रोज्ज्वलम् ।
चञ्चच्चामरमन्दमारुतदरव्यालोलनीलालकं
लीलानन्दितविश्वजालमलिकं तावत् परिव्राजकः ॥ ५ ॥
भक्तव्रातघनार्तिभञ्जनचणं यत् कामचापोपमं
यल्लीलावशवर्ति विश्वजगतः सत्त्वादिकं सर्वदा ।

---

यस्य वर्षास्वेव नभोमण्डलशोभावहत्वं, भगवत्किरीटप्रत्युप्तरत्नप्रभायास्तु सर्वदापि नभोमण्डलशोभावहत्वमिति व्यतिरेकालङ्कारः, 'व्यतिरेको विशेषश्चेदुपमानोपमेययोः' इति तल्लक्षणात् । निःसीमया निरवधिकया शोभया कान्त्या विचित्रिताम्बरतलं नानावर्णीकृताकाशप्रदेशं । दिव्यं, हरेः श्रीपद्मनाभस्य । किरीटम् । अपश्यद् दृष्टवान् ॥ ४ ॥

अद्राक्षीदिति । परिव्राजकः दिवाकरयतीश्वरः । तावत्, चकोरो नाम पक्षिविशेषः चन्द्रिकाभक्षकः 'जीवंजीवश्चकोरकः' इत्यमरः । तस्य बन्धुः चन्द्रः तस्य पृथुकः शिशुः 'पृथुकः शावकः शिशुरि'त्यमरः । पृथुकशब्देन कला लक्ष्यते । चन्द्रकलेत्यर्थः । बालचन्द्र इति यावत् । तस्य या श्रीः शोभा 'शोभार्थेऽपि प्रयुज्यन्ते लक्ष्मीश्रीकान्तिविभ्रमा' इति हलायुधः । तस्याश्चौर्ये हरणे लोलं सतृष्णं 'लोलश्चलसतृष्णयोरि'त्यमरः । बालचन्द्रादपि मनोहरमित्यर्थः । प्रोद्यन् प्रकाशमानः निस्तुलः निरुपमश्च यो गन्धः सौरभ्यं तच्छालिना तत्सहितेन घनसारेण कर्पूरेण करणेन आत्तं स्वीकृतं यद् ऊर्ध्वपुण्ड्रम् ऊर्ध्वाकारं पुण्ड्रं तिलकः 'तमालपत्रतिलकचित्रकाणि विशेषकमि'त्यत्र 'पुण्ड्रं चे'ति क्षीरस्वामी, तेन उज्ज्वलं दीप्रम् । चञ्चतां व्यालोलानां चामराणां मन्दमारुतेन मन्दवायुना दरव्यालोलाः ईषच्चञ्चलाः नीलाः कृष्णवर्णाः च ये अलकाः ते यत्र तथोक्तम् । लीलया विलासेन आनन्दितं सन्तोषितं विश्वजालं भुवनसमूहो येन तथोक्तम् । विभोः श्रीपद्मनाभस्य । अलिकं ललाटं च । 'ललाटमलिकमि'त्यमरः । अद्राक्षीद् दृष्टवान् ॥ ५ ॥

भक्तव्रातेति । स यतिः दिवाकरः । कामचापोपमं कामधनुस्सदृशं यद् भ्रूयुगलं, भक्तव्रातस्य भक्तसमूहस्य घना सान्द्रा 'घनं निरन्तरं सान्द्रमि'-

ताद्दग् भ्रूयुगलं विराजितमतीवापश्यदेतद् यति-
निर्धूताखिलपापराशि विमलं श्रीपद्मनाभस्य सः ॥ ६ ॥
कारुण्यामृतसंभृतं भगवतो व्यक्तत्रिवर्णात्मकं
लोकस्यार्तिहरं च नेत्रयुगलं पादानतानन्ददम् ।

त्यमरः । या आर्तिः पीडा तस्याः भञ्जने अपनोदने समर्थं, भवतीति शेषः । विश्वजगतः समस्तलोकस्य सत्तादिकं विद्यमानत्वादिकं सृष्टिस्थितिसंहारा इति यावत् । सर्वदा, यस्य भ्रूयुगलस्य लीलाया विलासस्य वशे अधीनत्वे वर्तत इति यल्लीलावशवर्ति । अत्रापि भवतीति योज्यम् । भगवत्प्रेरणया मायाक्षोभः ततः सकलप्रपञ्चोत्पत्तिरिति पुराणप्रसिद्धिमनुसृत्यैवमुक्तिः । तदुक्तं भागवते — 'दुरन्तसर्गो यदपाङ्गमोक्षः' 'सृज्यं सृजामि सृष्टोऽहमीक्षये'ति च । यथा नारायणीये —

'एवञ्च द्विपरार्धकालविगताविक्षां सिसृक्षात्मिकां
बिभ्राणे त्वयि चुक्षुभे त्रिभुवनीभावाय माया स्वयम्'

इत्यादि । अतीव अत्यन्तं । विराजित शोभितं । निर्धूतः निवारितः अखिलानां सर्वेषामुपासकानां पापराशिः पापसमूहो येन तथोक्तम् । विमलं निर्मलम् । श्रीपद्मनाभस्य, तादृक् तादृशं पूर्वोक्तप्रकारकम् । एतद्, भ्रूयुगलं भ्रूयुग्मम् । अपश्यद् दृष्टवान् ॥ ६ ॥

कारुण्येति । भक्तशिरोमणिः भक्तश्रेष्ठः । मोदाकुलः सन्तोषपरवशः । स यतिः दिवाकरः । कारुण्यं दया तदेव यदमृतं तेन सम्भृतं सम्पूरितम् । अतीव कारुण्याकुलमित्यर्थः । व्यक्तत्रिवर्णात्मकं व्यक्ताः स्पष्टाः त्रयो वर्णाः शुक्लनीलरक्तरूपा यस्य सः व्यक्तत्रिवर्णः तादृश आत्मा स्वरूपं यस्य तथोक्तम् । लोकस्य आर्तिहरं पीडानिवारकम् । पादे आनतानां *नमस्कृतानाम् आनन्ददम् आनन्ददायकम् । बालोष्णांशोः बालादित्यस्य गभस्तिसङ्घेन किरण-

* नमस्कृतिमतामित्यर्थः । नमस्कृतिशब्दान्मत्वर्थीयोऽच् । नमस्कृतिं कृतानामिति वा पाठः.

बालोष्णांशुगभस्तिसङ्गविकसत्पङ्केरुहाभं तथा-

पश्यद् भक्तशिरोमणिः स तु यतिर्मोदाकुलः श्रीपतेः ॥

रराजत्तिलपुष्पगर्वहरणश्रीकां प्रभोर्नासिकां

सञ्जाताधिकशीतसौरभयुतश्वासानिलेनानिशम् ।

सामोदं सविधं पुनर्विदधतीं सामोदमाद्यस्य तां

कामोन्निद्रशरीरकान्तिजयिनो दामोदरस्यैक्षत ॥ ८ ॥

राजद्दिव्यमसारसारमुकुरश्रीगर्वनिर्वासन-

प्रौढं चारु कपोलतल्लजयुगं सानन्दमैक्षिष्ट तत् ।

सम्पर्केण । 'किरणोस्रमयूखांशुगभस्तिघृणिघृष्टय' इत्यमरः । विकसदुन्मीलितं यत् पङ्केरुहं तामरसं तस्य आभेव आभा शोभा यस्य तादृशम् । 'बालोष्णांशुगभस्ती'त्यनेनाम्लानसुरभिशीतलपङ्कजसुन्दरमित्यर्थो व्यज्यते । तथा तथाभूतमनन्यादृशमित्यर्थः । भगवतः, श्रीपतेः श्रीपद्मनाभस्य । नेत्रयुगलं नेत्रयुग्मं च । अपश्यन् दृष्टवान् ॥ ७ ॥

रराजदिति । अत्र स यतिरिति कर्ता योज्यः । रराजत् देदीप्यमानं यत् तिलपुष्पं तस्य गर्वहरणे गर्वनिवारणे समर्था या श्रीः सा गर्वहरणश्रीः । शाकपार्थिवादित्वात् समासः । यद्वा गर्वं हरतीति गर्वहरणा श्रीः शोभा यस्य तादृशीम् । सञ्जातेन उत्पन्नेन अधिकेन शीतेन सौरभेण च युतः युक्तः यः श्वासानिलः श्वासवायुः तेन । सविधं समीपप्रदेशम् । अनिशं सदा । सामोदं हर्षसहितं यथा तथा । सामोदं सौरभ्यसहितं सन्तम् । 'आमोदो हर्षगन्धयोरि'ति विश्वः । विदधतीं कुर्वतीम् । कामस्य उन्निद्रा प्रकाशमाना या शरीरकान्तिः तां जेतुं शीलमस्येति तथा तादृशस्य । कामादपि मनोहरस्येति यावत् । आद्यस्य प्रपञ्चकारणस्य । प्रभोः दामोदरस्य श्रीपद्मनाभस्य । ताम् अनन्यादृशीमित्यर्थः । नासिकां नासां पुनः । ऐक्षत दृष्टवान् ॥ ८ ॥

राजदिति । सः अयं, यतीन्द्रः दिवाकरः । राजतः शोभमानस्य दिव्यस्य उत्कृष्टस्य मसारसारमुकुरस्य इन्द्रनीलमणिमयदर्पणस्य, 'दर्पणे मुकु-

व्यावल्गन्मकराभकुण्डलरुचा देदीप्यमानं परं
नित्यं दूरितभक्तलोकशमलं सोऽयं यतीन्द्रो हरेः ॥ ९ ॥

यत्स्यन्दि प्रचुरं मधु प्रपिबतां गोपीजनानां परं
तृप्तिर्नाभवदेव हन्त सविधे नित्यस्थितानामपि ।
तादृक् पाटलबिम्बसन्निभसुधासम्पूर्णदन्तच्छदं
चात्यन्तं कमनीयरूपमवलोक्यानन्दितोऽभून्मुनिः ॥ १० ॥

---

रादर्शावि'त्यमरः, श्रिया शोभया यो गर्वः तस्य निर्वासने विनाशने प्रौढं समर्थं, तस्मादपि मनोहरमित्यर्थः । चारु मनोहरम् । व्यावल्गतोः चञ्चलयोः मकराभयोः मकरमत्स्यशोभयोः कुण्डलयोः कर्णालङ्कारयोः रुचा कान्त्या । परम् अधिकं देदीप्यमानम् अतिशयेन प्रकाशमानं । नित्यं, दूरितं विनाशितं भक्तलोकानां भक्तजनानां शमलं पापं येन तादृशम् । हरेः श्रीपद्मनाभस्य । तत्, कपोलतल्लजयुगं प्रशस्तगण्डस्थलयुग्मम् । 'गण्डकपोलौ', 'मतल्लिका मचर्चिका प्रकाण्डमुद्धतल्लजौ । प्रशस्तवाचकान्यमूनि'इति चामरः । सानन्दम् आनन्दसहितं यथा तथा । प्रैक्षिष्ट ईक्षितवान् ॥ ९ ॥

यत्स्यन्दीति । सविधे भगवत्समीपे । नित्यस्थितानाम् अनवरतं वसताम् अपि । अनेन तृप्त्यवाप्तिसौकर्यमुक्तम् । यस्मात् दन्तच्छदात् स्यन्दितुं स्रवितुं शीलमस्येति तथा । प्रचुरं प्रभूतम् । 'प्रभूतं प्रचुरं प्राज्यमि'त्यमरः । मधु अधरामृतमित्यर्थः । प्रपिबतां प्रकर्षेण पानं कुर्वताम् । गोपीजनानां गोपस्त्रीणाम् । तृप्तिः नाभवत् । हन्तेति हर्षे । एतत्तु कृष्णावतारसमयानुरोधेनोक्तम् । तादृक् तादृशम् । अत्यन्तमधिकम् । कमनीयरूपं मनोहरस्वरूपम् । पाटलेन पाटलवर्णेन बिम्बेन बिम्बाख्यफलविशेषेण सन्निभं तुल्यं सुधया अमृतेन सम्पूर्णं दन्तच्छदमधरं च पाटलबिम्बसन्निभः सुधासम्पूर्णश्च यो दन्तच्छदः तमिति कर्मधारयः । अवलोक्य दृष्ट्वा । मुनिः दिवाकरः । आनन्दितः अभूत् सन्तुष्टोऽभवत् । अत्र नित्यं भगवत्सान्निधानस्थितिप्रकर्षेण पानादिरूपकारणपौष्कल्यसत्त्वेऽपि तृप्तिरूपकार्यानुत्पत्तेर्विशेषोक्तिरलङ्कारः । 'कार्याजनिर्विशेषोक्तिः सति पुष्कलकारणे' इति तल्लक्षणात् ॥ १० ॥

सोऽपश्यन्नवफुल्लकुन्दमुकुलस्यात्यन्तगौरात्मनः
संविश्राणितगाढकार्ष्ण्यरुचिभिर्दन्ताङ्कुरैरुज्ज्वलम् ।
विश्वानन्दकृतौ च बद्धकवचं मन्दस्मितं श्रीपते-
र्नित्यं पार्विकशर्वरीकरलसज्ज्योत्स्नामदच्छेदनम् ॥ ११ ॥

सद्यःसम्यगुदीतवासरमणेराटोपहन्त्र्या परं
कुर्वत्याथ चराचरं बत जगद् द्वेधापि रागान्वितम् ।
तस्याकुण्ठतराभकौस्तुभरुचा शोणायमानं हरेः
कण्ठं चापि विराजितं यतिवरो धन्यः समालोकयत् ॥ १२ ॥

**सोऽपश्यदि**ति । सः दिवाकरः । अत्यन्तगौरात्मनः अतीव धवलस्वरूपस्य । 'अवदातः सितो गौर' इत्यमरः । नवं नूतनं फुल्लं विकसितं च यत् कुन्दमुकुलं कुन्दकुड्मलं तस्य । कुन्दमित्येको लताविशेष मल्लिकामालत्यादिसजातीयः । 'माध्यं कुन्दमि'त्यमरः । सम्यक् विश्राणिता दत्ता, 'विश्राणनं वितरणमि'त्यमरः, गाढा निबिडा या कार्ष्ण्यरुचिः नैल्यशोभा सा यैस्तादृशैः । निरुपमधावल्ययुक्तैरिति यावत् । दन्ताङ्कुरैः अङ्कुरसदृशैः दन्तैः । उज्ज्वलं दीप्तम् । विश्वेषां सर्वेषाम् आनन्दकृतौ सन्तोषकरणे बद्धकवचं उद्युक्तमित्यर्थः । नित्यम् अनवरतम् । पर्वणि भवः पार्विकः यः शर्वरीकरः चन्द्रः तस्य लसन्त्या शोभमानया ज्योत्स्नया चन्द्रिकया यो मदो गर्वः तस्य छेदनं विनाशकरम् । तस्मादपि मनोहरमित्यर्थः । श्रीपतेः श्रीपद्मनाभस्य मन्दस्मितं मन्दहासं च । अपश्यत् दृष्टवान् ॥ ११ ॥

**सद्य** इति । अथ, धन्यः सुकृती । यतिवरः दिवाकरः । सद्यः सम्यक् उदीतः यः वासरमणिः सूर्यः तस्य । बालादित्यस्येति यावत् । परम् अधिकम् । आटोपहन्त्र्या गर्वनाशिन्या । चराचरं स्थावरजङ्गममयम् । जगत् लोकं द्वेधापि, रागान्वितम् अनुरागविशिष्टं शोणिमविशिष्टमिति च । कुर्वत्या, अकुण्ठतरा मन्देतरा या आभा शोभा सा यस्य स तथा तादृशस्य कौस्तुभस्य कौस्तुभाख्यरत्नविशेषस्य, 'कौस्तुभो मणिरि'त्यमरः, रुचा कान्त्या । शोणायमानं शोणवदाचरितम् । विराजितं शोभितम् । तस्य हरेः श्रीपद्मनाभस्य । कण्ठं च

सङ्ग्रामानुपमेयवीर्यदनुजप्रौढासुवातोत्कर-
स्यास्वादे फणिनायकायितमथो नाथस्य बाहुद्वयम् ।
सोऽपश्यत् कलधौतदिव्यवलयान् बिभ्रच्च रत्नाञ्चिता-
ल्लोँकस्येह चराचरस्य कृपया दत्ताभयं संयमी ॥१३॥

मुक्तानामतिगौरचारुमहसां षाण्मासिकानां स्रजा
युक्तं रत्नकवाटतुल्यरुचिमद् वक्षःस्थलं वैष्णवम् ।

अपि, समालोकयत् सम्यग्दृष्टवान् । तद्गुणालङ्कारः । 'तद्गुणः स्वगुण-त्यागादन्यदीयगुणग्रहः' इति तल्लक्षणात् ॥ १२ ॥

सङ्ग्रामेति । अथो अनन्तरम् । 'अथो अथे'त्यमरः । सः संयमी दिवाकरयतीश्वरः । संग्रामे युद्धे अनुपमेयं निरुपमं यद् वीर्यं बलं तत् येषां तादृशानां दनुजप्रौढानाम् असुरश्रेष्ठानाम् । असुवातोत्करस्य प्राणवायुसमूहस्य । आस्वादे भक्षणे । फणिनायकायितं सर्पेश्वरवदाचरितम् । पवनाशना हि सर्पाः । भगवद्बाहुरूपसर्पस्यासुरप्राणवायुरेवाशनमित्यर्थः । असुरसङ्घविनाशकरमिति यावत् । रूपकमुपमा चेति तयोरङ्गाङ्गिभावेन संकरः । रत्नाञ्चितान् रत्नशोभितान् । कलधौतदिव्यवलयान् स्वर्णमयोत्तमकटकान् । 'कलधौतं रूप्यहेम्नोः' 'कटको वलयोऽस्त्रियामि'ति चामरः । बिभ्रद्, इह कृपया दयया । चराचरस्य स्थावरजङ्गमस्वरूपस्य । लोकस्य जगतः । दत्तमभयं येन तादृशम् । नाथस्य श्रीपद्मनाभस्य । बाहुद्वयं च, अपश्यत् दृष्टवान् ॥ १३ ॥

मुक्तानामिति । यतिः दिवाकरः । अतिगौरम् अतिधवलं चारु मनोहरं च यद् महः तेजः तद् येषां तादृशानाम् । षाण्मासिकानां षण्मासपर्यन्तं समुद्रस्थशुक्तिगर्भस्थितत्वात् सम्प्राप्तपक्वावस्थानामिति यावत् । मुक्तानां मौक्तिकानाम् । स्रजा मालया । युक्तं सहितम् । रत्नमयं यत् कवाटं तेन तुल्या सदृशी या रुचिः शोभा तद्वत् तत्सदृशं, तथा विशालं सुन्दरं चेति यावत् । श्रीवत्सेन श्रीवत्साख्यलाञ्छनेन, 'श्रीवत्सो लाञ्छनं मत'मित्यमरः, अधिकभासितम् अधिकशोभितम् । श्रीमत्या वैजयन्त्याख्यया मालया । सुरुचिरं सुमनोहरम् ।

श्रीवत्साधिकभासितं सुरुचिरं श्रीवैजयन्त्या यति-
दृष्ट्वा मोदमयाम्बुधेरिह परं पारं न सन्दृष्टवान् ॥ १४ ॥

नाभीसम्भववारिजोदरगतं ब्रह्माणमुद्यत्त्रयी-
घोषाकर्णनजातभूरिकुतुकव्यालोलमौलिं हरिम् ।
आतन्वानमसौ तदा यतिवरः प्रैक्षिष्ट भाग्याम्बुधिः
सञ्जातानुपमप्रमोदभरसन्त्यक्ताक्षिसम्मीलनः ॥ १५॥

अद्राक्षीदुदरं समस्तजगदावासायितं चाधिकं
रम्यं कैटभविद्विषो यतिवरः सन्तोषपर्याकुलः ।

वैष्णवं विष्णुसम्बन्धि । वक्षस्थलं वक्षःप्रदेशम् । दृष्ट्वा, इह, मोदमयाम्बुधेः सन्तोषमयसमुद्रस्य । परं पारं, न सन्दृष्टवान् परमानन्दमयसमुद्रे निमज्जनोन्मज्जनादिपरिभ्रान्तोऽभूदित्यर्थः ॥ १४ ॥

नाभीति । भाग्याम्बुधिः, सञ्जातेनानुपमेयेन प्रमोदभरेण सन्तोषभारेण सन्त्यक्तमक्षिसम्मीलनं नेत्रनिमीलनं येन तादृशः । असौ यतिवरः दिवाकरः । तदा, नाभ्यां सम्भव उत्पत्तिर्यस्य तादृशस्य वारिजस्य पद्मस्य उदरगतम् अन्तःस्थितम्* । हरिं श्रीपद्मनाभम् । उद्यन्ती उद्गच्छन्ती स्वमुखेभ्य इति शेषः या त्रयी वेदः, 'श्रुतिः स्त्री वेद आम्नायस्त्रयी'त्यमरः, तद्घोषस्य आकर्णनेन श्रवणेन सञ्जातम् उत्पन्नं यद् भूरिकुतुकम् अधिककौतुकं तेन व्यालोलः मौलिः शिरो यस्य स तथा तादृशं सन्तम् । आतन्वानं कुर्वाणम् । ब्रह्माणं विरिञ्चम् । प्रैक्षिष्ट प्रेक्षितवान् ॥ १५ ॥

अद्राक्षीदिति । सन्तोषपर्याकुलः सन्तोषपरवशः । यतिवरः दिवाकरः । समस्तानां जगतां प्रपञ्चानाम् आवासायितं गृहायितं स्थानमित्यर्थः । भगवदुदरे बहूनि ब्रह्माण्डानि निःसङ्कर्षं वर्तन्त इति पुराणप्रसिद्धिः । अधिकं, रम्यं मनोहरम् । नानारत्नयुतं नानारत्नसहितम् उरु महच्च यत् सारसनं काञ्ची

* इदं विशेषणं ब्रह्माणमित्यनेन संबद्धम् ।

नानारत्नयुतोरुसारसनसन्नद्धेन मध्येन तद्
युक्तं भक्तजनानुकम्पिहृदयस्यार्तार्तिविध्वंसिनः ॥ १६ ॥

सन्तप्तानुपमप्रकाशकनकप्रस्पर्धिपीताम्बरे-
णात्यन्तं कमनीयदिव्यरुचिना संवीतमूरुद्वयम् ।
दृष्ट्वा पङ्कजलोचनस्य यमिनामग्र्यः प्रमोदामृतं
धन्यो वाङ्मनसाद्यगोचरमहो मृष्टं बुभोजानघः ॥ १७ ॥

बर्हिश्रेष्ठसुनीलदीर्घमसृणग्रीवामदच्छेदने
सम्यक् शिक्षितमप्रमेयमहसा प्रोल्लासि जङ्घाद्वयम् ।

---

तेन सन्नद्धेन सम्यग् बद्धेन । मध्येन मध्यभागेन युक्तं सहितम् । भक्तजनेषु अनुकम्पि दयावत् हृदयं मनो यस्य तादृशस्य । आर्तानाम् आर्तिविध्वंसिनः पीडानिवारकस्य । कैटभविद्विषः श्रीपद्मनाभस्य । तद् अनन्यादृशमित्यर्थः । उदरं च अद्राक्षीद् दृष्टवान् ॥ १६ ॥

सन्तप्तेति । अनघो निष्पापः । धन्यः सुकृती । यमिनाम् अग्र्यः दिवाकरः । अत्यन्तम् अधिकम् । कमनीया मनोहरा दिव्या उत्तमा च या रुचिः सा यस्य तादृशेन । सन्तप्तं निष्टप्तम् अनुपमप्रकाशं च यत् कनकं स्वर्णं तेन प्रस्पर्धिना प्रकर्षेण मत्सरवता, तत्सदृशेनेति यावत्, पीतेन पीतवर्णेन च अम्बरेण वस्त्रेण संवीतम् आवृतम् । पङ्कजलोचनस्य श्रीपद्मनाभस्य । ऊरुद्वयम् ऊरुयुग्मम् । दृष्ट्वा, वाङ्मनसाद्यगोचरं वाचा वक्तुं मनसा चिन्तयितुम् अन्येन्द्रियैरपि विषयीकर्तुमशक्यमित्यर्थः । प्रमोदामृतं सन्तोषपीयूषम् । मृष्टं सम्पूर्णं यथा तथा । बुभोज भुक्तवान् ॥ १७ ॥

बर्हीति । स एष यतिः दिवाकरः । बर्हिश्रेष्ठस्य मयूरश्रेष्ठस्य सुनीलायाः अतिनीलवर्णायाः दीर्घायाः मसृणायाः स्निग्धायाः, 'चिक्कणं मसृणं स्निग्धम्' इत्यमरः । ग्रीवायाः कन्धरायाः यो मदः गर्वः तस्य छेदने विनाशने । सम्यग् अधिकम् । शिक्षितम् अभ्यस्तं समर्थमित्यर्थः । ततोऽपि मनोहरमिति यावत् । अप्रमेयं प्रमाया अगोचरः अधिकमित्यर्थः । यद् महः तेजः

विष्णोर्दीनजनार्तिमोचनचणं नेत्रोत्पलाभ्यां सुखं
द्वाभ्यामेष चिरं निपीय च यतिस्तृप्तोऽभवन्नैव सः ॥ १८ ॥

कैलासेश्वरमौलिलालितवियत्स्रोतस्विनीसम्भव-
स्थानं रक्तसरोजगर्भरुचिरं पादद्वयं शार्ङ्गिणः ।
सोऽद्राक्षीद् यमिनां वरोऽथ विलसद्वज्राब्जकुम्भादिस-
द्रेखातल्लजशालि दुस्तरभवाम्भोधिप्लवं पावनम् ॥ १९ ॥

---

तेन । प्रोद्भासि प्रकर्षेण शोभमानम् । दीनजनानाम् आर्तिमोचने पीडानिवारणे समर्थम् । विष्णोः श्रीपद्मनाभस्य । जङ्घाद्वयं जङ्घायुग्मम् । द्वाभ्यां नेत्रोत्पलाभ्यां, सुख यथा तथा । चिरं बहुकालम् । निपीय च नितरां पीत्वापि । नैव तृप्तः अभवत् । अत्र बहुकालं पानसत्त्वेऽपि तृप्त्यनुत्पत्त्या विशेषोक्तिविशेषः ॥ १८ ॥

**कैलासेति** । अथ सः यमिनां वरः दिवाकरः । कैलासेश्वरस्य श्रीपरमेश्वरस्य मौलिना शिरसा लालिता या वियत्स्रोतस्विनी गङ्गा तस्याः सम्भवस्थानम् उत्पत्तिस्थानम् । वामनावतारे विश्वाण्डभाण्डमवधीकृत्य प्रवृद्धस्य भगवतः पादाग्रं सत्यलोकगतं दृष्ट्वा ब्रह्मा स्वकमण्डल्वन्तर्गतेन जलेन तं प्रक्षालितवान् । तज्जलमेवेह गङ्गेत्युच्यते, भगीरथहितप्रवृत्तेन परमेश्वरेण ध्रियते च । यथा नारायणीये —

"यत्पादाग्रं निजपदगत पुण्डरीकोद्भवोऽसौ
कुण्डीतोयैरसिचदपुनाद्यज्जलं विश्वलोकान् ।"

इति । रक्तसरोजस्य रक्तोत्पलस्य गर्भवदन्तर्भागवद् रुचिरं मनोहरम् । विलसन्तः शोभमाना वज्राब्जकुम्भादयः कुलिशपद्मघटप्रभृतयः, आदिना आतपत्रादिपरिग्रहः, सन्तः निर्दोषाश्च ये रेखातल्लजाः प्रशस्तरेखाः तच्छालि तत्सहितम् । पदयोः रेखारूपवज्रादिचिह्नानि सामुद्रिकोक्तानि । यथा रघुवंशे 'तिरेखाध्वजकलशातपत्रचिह्नमि'ति । दुस्तरः दुःखेन तर्तुं शक्यः यः भवाम्भोधिः संसारसागरः तस्य प्लवं उडुपभूतम् । पावनं शुद्धम् । शार्ङ्गिणः श्रीपद्मनाभस्य । पादद्वयं पादयुग्मम् । अद्राक्षीद् दृष्टवान् ॥ १९ ॥

किञ्च, शयनीभूतमृणालधवलदन्दशूकपरिवृढातिवितितफणासहस्रमिषान्निखिलभुवनव्याप्तेन कीर्त्तिमयेनैव श्वेतच्छत्रेणावृतोपरिभागमखण्डतरानुरागरसरञ्जितकटाक्षमोक्षण-सञ्जातानन्दभराभ्यां नवशातकुम्भदूर्वादलतुलितशरीरसुषमाभ्यां श्रीभूमिभ्यामनुपमसम्मोदभरनिस्सरदानन्दबाष्पधाराकल्पितार्घ्यं निजनेत्रोत्पलदलविरचितपरिपूजनमुपदीकृतपरमा-

किञ्चेति । किञ्च अपिच । स यतिपरिवृढः दिवाकरः । शयनीभूतः पर्यङ्कीभूतः, 'शयनं मञ्चपर्यङ्के'त्यमरः, मृणालवद् बिसवत् 'मृणालं बिसमि'त्यमरः, धवलश्च यः दन्दशूकपरिवृढः सर्पाधीश्वरः अनन्तः, 'दन्दशूको बिलेशयः', 'प्रभुः परिवृढोऽधिप' इति चामरः, तस्य विततं विस्तृतं यत् फणासहस्रं तन्मिषात् तद्व्याजेन निखिलभुवनेषु सर्वलोकेषु व्याप्तेन । कीर्त्तिमयेनैव कीर्त्तिस्वरूपेणैव । श्वेतच्छत्रेण सितातपत्रेण । आवृत आच्छादित उपरिभाग ऊर्ध्वभागो यस्य स तथा तादृशम् । अत्र फणासहस्रे निखिलभुवनव्याप्तकीर्त्तिमयश्वेतच्छत्रत्वारोपार्थं मिषशब्देन फणासहस्रत्वनिह्नवादपह्नवभेदोऽलङ्कारः । 'कैतवापह्नुतिर्व्यक्तौ व्याजाद्यैर्निह्नुतेः पदैः' इति तल्लक्षणात् । कीर्त्तिमयेनैव श्वेतच्छत्रेणेत्यत्र रूपकं च । अखण्डतरेण अनल्पतरेण अनुरागरसेन स्नेहरसेन रञ्जितं रूषितं यत् कटाक्षमोक्षणं तेन सञ्जात आनन्दभरः सन्तोषातिशयो ययोस्तादृशीभ्याम् । नवेन नूतनेन प्रतप्तेनेति यावत् शातकुम्भेन स्वर्णेन, 'तपनीयं शातकुम्भमि'त्यमरः, दूर्वादलेन दूर्वापत्रेण च दूर्वा नाम हरितवर्णः कश्चन तृणविशेषः, 'दूर्वा तु शतपर्विके'त्यमरः, तुलिता उपमिता शरीरसुषमा शरीरशोभा ययोस्तादृशीभ्याम् । पीतहरितवर्णाभ्यामिति यावत् । श्रीभूमिभ्यां श्रीभगवत्या भूम्या च । अनुपमः यः सम्मोदभरः हर्षातिशयः, 'मुत् प्रीतिः प्रमदो हर्षः प्रमोदामोदसम्मदाः', 'अतिशयो भर' इति चामरः, तेन हेतुना निःसरन्ती निःष्यन्दमाना या आनन्दबाष्पधारा सन्तोषाश्रुधारा तया कल्पितं समर्पितम् अर्घ्यं पूजाजलं यस्मै तम् । निजैः आत्मीयैः श्रीभूमिसम्बन्धिभिः

वदातरुचिमन्दहसितमयनवमुक्ताहारं मुक्ताहाररतिमुखविष-
यचिन्तननिजविनुतिपरपरमतापसं तापसमाकुलसाधुजनपरि-
पालनात्तविविधलीलावतारं जयविजयमुख्यदिव्यपार्षदाकलि-
तविविधसेवासरसमानसं निजवाहनीभूतविहङ्गाधिपरचिता-
तिमनोज्ञसन्नुतिसञ्जातकौतुकमपरिमितकरुणालवालमभङ्गुत-
मलावण्ययौवनगर्वितनानामणिमयविभूषणभूषितनिजरमण-
कुलसहितरम्भामुखाप्सरोनिकरकरविगलदम्लानसौरभमन्दा-

नेत्रैरेव उत्पलदलैः कुवलयदलैः विरचितं कृतं परिपूजनम् अर्चनं यस्य तम् । सानन्दबाष्पैर्नेत्रैरवलोक्यमानमिति भावः । उपदीकृतः उपहारीकृतः, 'उपहारस्तथोपदे'त्यमरः, परमावदाता अतिधवला रुचिः कान्तिर्यस्य तादृशं च यन्मन्दहसितं मन्दहासः तन्मयः तत्स्वरूपः नवः नूतनश्च यः मुक्ताहारः मुक्तावली स यस्य तादृशम् । मुक्तं परित्यक्तम् आहाररतिमुखविषयचिन्तनम् अशनसम्भोगप्रभृतिविषयानुध्यानं यैस्तादृशा निजायामात्मीयायां श्रीपद्मनाभसम्बन्धिन्यां विनुतौ स्तुतौ, 'स्तवः स्तोत्रं स्तुतिर्नुतिरि'त्यमरः, परा आसक्ताः परमा उत्कृष्टाश्च ये तापसा ऋषयः ते यस्य तादृशम् । तापसमाकुलाः हयग्रीवेण वेदहरणं मन्दरस्य समुद्रे निमज्जनमित्यादिदुःखव्याकुलाः ये साधवः सन्तो जनाः ब्रह्मेन्द्रादयः तेषां परिपालनाय पूर्वोक्ततापापनोदेन रक्षणाय आत्ताः स्वीकृताः विविधा नानाप्रकाराश्च ये लीलावताराः मत्स्यकूर्मादयो येन तादृशम् । जयविजयौ नाम भगवतः कौचिद् द्वाःस्थौ तौ मुख्यौ प्रधानौ येषां तादृशा दिव्याश्च ये पार्षदाः परिचारकाः तैः आकलिताः कृता विविधा नानाप्रकाराश्च याः सेवाः परिचर्याः तासु सरसं सरागं, 'शृङ्गारादौ विषे वीर्ये गुणे रागे द्रवे रसः' इत्यमरः, मानसं मनो यस्य तादृशम् । निजवाहनीभूतः यः विहङ्गाधिपः पक्षिश्रेष्ठः गरुडः तेन विरचिताः कृताः अतिमनोज्ञा अतिमनोहारिण्यः सत्यः निर्दोषाश्च याः नुतयः स्तोत्राणि, 'स्तवः स्तोत्रं स्तुतिर्नुतिरि'त्यमरः, तासु सञ्जातमुत्पन्नं कौतुकं यस्य तादृशम् । अपरिमिता अनल्पा या करुणा दया तस्या आलवालम् आवापः । 'स्यादालवालमावालमावापः' इत्यमरः । यथाल-

रानोकहप्रसूनवृष्टिपरिहृष्टं मन्देतरानन्दमन्दिरायितेन्दिराला- लितातिसुन्दरपदारविन्दवन्दननन्दितसमस्तवृन्दारकवृन्दाक- लितमङ्गलदुन्दुभिनिनादश्रवणसञ्जातकौतुकं वीणावेणुमृदङ्ग- संयुतसुमनोहरकण्ठनालनिस्सरदरीणमाध्वीमदभञ्जनचणगा- नानुसृततालमेलमिलितसुमनोहरतरताण्डवपाण्डित्यविवशी- कृतनिखिलजगन्निकरं स्वपुरतः समागत्य कृपावलोकनमहा- भाग्यलाभाय चिरेण सस्पृहं नृत्यन्तं गन्धर्ववधूजनं सकल-

---

वालं जलानामाधारः तथा कृपाया आधार इत्यर्थः। अभङ्गतमम् अतीवाभङ्गम् अनल्पमित्यर्थः यल्लावण्यं सौन्दर्यं यौवनं च ताभ्यां गर्विताः अनेकप्रकारै- र्मणिमयैः रत्नमयैश्च विभूषणैः अलङ्कारैः भूषिताः अलङ्कृताः निजानामात्मी- यानां रमणानां भर्तॄणां कुलेन समूहेन सहिता युक्ताः रम्भामुखाः रम्भाद्याश्च या अप्सरसो देवस्त्रियः तासां निकरस्य समूहस्य करेभ्यः विगलतां पतताम् अम्लानसौरभाणां मन्दारानोकहप्रसूनानां या वृष्टिः वर्षं तया परिहृष्टं स- न्तुष्टम्। मन्देतरस्यामन्दस्य अधिकस्येत्यर्थः आनन्दस्य सन्तोषस्य मन्दिरा- यिता निलयीभूता अतीव सन्तुष्टेत्यर्थः या इन्दिरा महालक्ष्मीः तया लालि- तयोः संवाहितयोः अतिसुन्दरयोः पदारविन्दयोः अरविन्दसदृशपदयोः व- न्दनेन नन्दिताः सन्तोषिताः समस्ताश्च ये वृन्दारका देवाः तेषां वृन्देन स- मूहेन आकलिताः कृताः ये मङ्गलदुन्दुभिनिनादाः शुभसूचकभेरीशब्दाः तेषां श्रवणेन आकर्णनेन सञ्जातम् उत्पन्नं कौतुकं यस्य तादृशम्। वीणया वेणुना मृदङ्गेन च संयुतं सहितं सुमनोहरेभ्यः सुस्वरेभ्य इत्यर्थः कण्ठनालेभ्यो निः- सरत् निर्गच्छद् अरीणायाः अशून्यायाः माध्व्याः मधुरसस्य यः मदः गर्वः तस्य भञ्जने नाशने समर्थं तस्मादपि मधुरमित्यर्थः यद् गानं तेन अनुसृतं यत् तालमेळं तेन मिळितं संयुतं सुतरां मनोहरतरं च यत् ताण्डवं नृत्तं, 'ता- ण्डवं नटनं नाट्यं लास्यं नृत्तं च नर्तनम्' इत्यमरः, तत्र यत् पाण्डित्यं सा- मर्थ्यं तेन विवशीकृतः परवशीकृतः निखिलजगन्निकरः समस्तलोकसमूहो येन तादृशम्। स्वपुरतः स्वपुरोभागे। समागत्य सम्प्राप्य। कृपया सह यदवलोकनं दर्शनं तद्रूपस्य महाभाग्यस्य लाभाय प्राप्तये। सस्पृहं साभिलाषं यथा तथा।

तापहृता कटाक्षेण यथोचितं मुहुरवलोक्य कृतार्थीकुर्वन्तं निजनिरीक्षणजनितसात्त्विकविकारश्लथकुन्तलविगलद्दुकूलानां स्वलावण्यविजितशम्बरारिमहेलानां तासामप्सरसां वदनसरोरुहनिस्सृतान् निजापदानविस्तारान् निशम्य हृदयसम्भूतकुतुकसूचकमन्दहासमनोहरमुखारविन्दं चापश्यत् स यतिपरिवृढो भगवन्तम् ॥ ४ ॥

प्रह्लादशौनकभृगुद्रुहिणात्मजात-
श्रीव्यासपुत्रमुखतापससिद्धसङ्घैः ।

---

चिरेण नृत्यन्तं नृत्तं कुर्वन्तम् । एतत् पूर्वोक्तं च गन्धर्ववधूजनविशेषणम् । गन्धर्ववधूजनं गन्धर्वस्त्रीजनम् । सकलतापहृता तापत्रयनिवारकेणेत्यर्थः । कटाक्षेण अपाङ्गदर्शनेन । यथोचितं यथा तथा । मुहुः पुनः पुनरपि । अवलोक्य कृतार्थीकुर्वन्तं कृतकृत्यं कुर्वाणम् । निजनिरीक्षणेन निजावलोकेन जनिताः सात्त्विकविकाराः—

"स्तम्भप्रलयरोमाञ्चस्वेदवैवर्ण्यवेपथु ।
अश्रु वैस्वर्यमित्यष्टौ सात्त्विकाः परिकीर्तिताः ॥"

इत्युक्ताः सात्त्विकभावाः, श्लथाः विगलितबन्धाः कुन्तलाः चिकुराः विगलन्ति श्लथन्ति दुकूलानि वस्त्राणि च यासां तादृशीनाम् । 'क्षौमं दुकूलमि'त्यमरः । स्वेन आत्मीयेनाप्सरःसम्बन्धिना लावण्येन सौन्दर्येण विजिता शम्बरारिमहेळा रतिदेवी याभिस्तादृशीनाम् । तासां पूर्वोक्तानाम् । अप्सरसां देवस्त्रीणाम् । वदनसरोरुहेभ्यः सरोरुहसदृशेभ्यः वदनेभ्यः मुखेभ्यः निस्सृतान् निर्गतान् । निजम् आत्मीयं यद् अपदानं वृत्तं कर्म, 'अपदानं कर्म वृत्तमि'त्यमरः, तस्य विस्तारान् । निशम्य श्रुत्वा । हृदये मनसि सम्भूतं यत् कुतुकं तत्सूचकेन तत्प्रकाशकेन मन्दहासेन मनोहरं मुखारविन्दं यस्य तादृशं च । भगवन्तं श्रीपद्मनाभम् । अपश्यत् दृष्टवान् ॥ ४ ॥

**प्रह्लादेति** । अयं यतीन्द्रः दिवाकरः । प्रह्लादः शौनकः भृगुः द्रुहिणस्य ब्रह्मणः आत्मजाताः पुत्राः नारदसनकादयः श्रीव्यासपुत्रः श्रीशुकश्च

सोमारुणोडुनिवहैश्च निजायुधैश्च
भक्त्या नुतं हरिमपश्यदयं यतीन्द्रः ॥ २० ॥

अथ करतलविलसितमहतीसंवादनलोलुपं लोकोत्तरतरनिजानुपममाहात्म्ययुतचरित्रगानरसिकं निजभक्तकुलमकुटमणिं श्रीनारदमुनीन्द्रं विश्वपरितापहारिणा कटाक्षामृतेनाभिनन्दयन्तमपश्यत् स मुनिरम्भोजनाभम् ॥ ५ ॥

इति स्यानन्दूरपुरवर्णनप्रबन्धे केशादिपादस्तुतिर्नाम
तृतीयः स्तबकः ।

एते मुखं मुखमिव प्रधानभूताः येषां तादृशाः ये तापसाः सिद्धाश्च तेषां सङ्घैः समूहैः । सोमेन अरुणेन सूर्येण, 'मिहिरारुणपूषण' इत्यमरः, उडुनिवहैः नक्षत्रसमूहैश्च, 'नक्षत्रमृक्षं भं तारं तारकाप्युडु वा स्त्रियामि'त्यमरः । निजायुधैः मूर्तिमद्भिः सुदर्शनप्रभृतिभिश्च । भक्त्या, नुतं स्तुतम् । हरिं श्रीपद्मनाभम् । अपश्यद् दृष्टवान् ॥ २० ॥

अथेति । अथ, स मुनिः दिवाकरः । करतले विलसिता शोभिता या महती महतीनामधेया वीणा । नारदवीणाया महतीति नाम ।

"विश्वावसोस्तु बृहती तुम्बुरोस्तु कलावती ।
महती नारदस्य स्यात् सरस्वत्यास्तु कच्छपी ॥"

इति वैजयन्ती । 'वीणाभेदेऽपि महती'त्यमरश्च । तस्याः संवादने लोलुपं सश्रद्धम् । लोकोत्तरतरम् अतीव लोकोत्कृष्टं निजम् आत्मीयं श्रीपद्मनाभसम्बन्धि अनुपमं च यन्माहात्म्यं तेन युतस्य सहितस्य चरित्रस्य वृत्तान्तस्य गाने रसिकं सरसम् । निजभक्तकुलस्य आत्मीयसेवकसमूहस्य मकुटमणिं चूडामणिं भक्तकुलश्रेष्ठमिति यावत् । श्रीनारदमुनीन्द्रम् । विश्वेषां सर्वेषां परितापहारिणा सन्तापनिवारकेण कटाक्षामृतेन अमृतसदृशेन कटाक्षेण अपाङ्गदर्शनेन अभिनन्दयन्तम् आनन्दयन्तम् । अम्भोजनाभं श्रीपद्मनाभम् । अपश्यद् दृष्टवान् ॥ ५ ॥

इति श्रीस्यानन्दूरपुरवर्णनप्रबन्धव्याख्यायां
तृतीयः स्तबकः ।

## अथ चतुर्थः स्तबकः ।

अथ स भगवानम्भोरुहनाभो निजागमनमुद्दिश्य चिरमाकाङ्क्षमाणैस्त्रिकूटमहेन्द्रमलयाचलताम्रपर्णीकुम्भसम्भवैरपि सुविमलनिगमान्तार्थमयीभिरतिमनोहराभिर्गीर्भिर्विनुतो विरराज ॥ १ ॥

तावत्सफलीभूतनरजन्मा स दिवाकरयतीश्वरोऽप्यपारतरानन्दभारभरितान्तरङ्गस्ततोऽप्यधिकाभिर्दिव्यनुतिभिस्तं तुष्टाव सारसनाभम् ॥ २ ॥

अथ गिरीशवलशासनकुबेरप्रमुखसकलसुरपरिवृढाः सकौतुकविस्मयभरितमानसाः परमानन्दभारविगलद्बाष्पस-

अत्र भगवदाविर्भावस्तु न केवलं दिवाकरयतीश्वरानुग्रहार्थं किन्तु सर्वलोकानुग्रहार्थमपीत्येतादृशार्थद्योतनाय भगवदधिष्ठितस्यानन्दूरपुरस्य सर्वोत्कृष्टतां प्रकटयितुं चतुर्थस्तबकमारभते — अथेति । अथ स भगवान्, अम्भोरुहनाभः श्रीपद्मनाभः । निजागमनं स्वप्राप्तिम् । उद्दिश्य, चिरं चिरकालम् । आकाङ्क्षमाणैः ताच्छील्येन इच्छद्भिः । त्रिकूटमहेन्द्रमलयाचलताम्रपर्णीकुम्भसम्भवैः अपि त्रिकूटाचलेन महेन्द्राचलेन मलयाचलेन ताम्रपर्ण्या कुम्भसम्भवेन अगस्त्येन च । सुविमलं यत् निगमान्तं वेदान्तं तदर्थमयीभिः तदर्थस्वरूपाभिः । अतिमनोहराभिश्च । गीर्भिः वाग्भिः विनुतो विशेषेण स्तुतः सन् । विरराज शुशुभे ॥ १ ॥

तावदिति । सफलीभूतं नरजन्म मनुष्यजन्म यस्य तादृशः । स दिवाकरयतीश्वरः अपि । अपारतरो निरवधिकः यः आनन्दभारः सन्तोषाधिक्यं तेन भरितं पूरितम् अन्तरङ्गं चित्तं यस्य तादृशः सन् । ततोऽपि तस्मादपि त्रिकूटादिकृतस्तुतेरपीत्यर्थः । अधिकाभिः अतिशयशालिनीभिः । दिव्यनुतिभिः उत्तमस्तोत्रैः । सारसनाभं श्रीपद्मनाभम् । तुष्टाव स्तुतवान् ॥ २ ॥

अथेति । अथ गिरीशः शिवः वलशासनः इन्द्रः कुबेरः वैश्रवणश्च प्रमुखा उत्तमा येषां तादृशाः, 'प्रमुखप्रवेकानुत्तमोत्तमा' इत्यमरः, सकलाः

मावृतनयनाः पुलकावृततनवश्चालेख्यवन्निष्पन्दतरा बभूवुः ॥

अथ तदानीं निखिलसवनाशनसार्वभौमः स पुरन्दरोऽपि परमानन्दमयं तं भगवन्तं निजनेत्रसहस्रेण निरवधि निपीयापि तृप्तो न बभूव ॥ ४ ॥

तदनु भगवदाज्ञयैवास्य परमुचितामनुदिनाभ्युदयशालिनीं निखिलजगदानन्ददायिनीं कल्पान्तेष्वप्यनपायिनीं वरीयसीं सपर्यां कल्पयामास स दिवाकरयतीश्वरः सुकृतपयोनिधिः ॥ ५ ॥

समस्ताः सुरपरिवृढाः देवश्रेष्ठाः । सकौतुकेन कौतूहलविशिष्टेन विस्मयेन अद्भुतेन भरितं पूरितं मानसं मनो येषां तादृशाः । परमानन्दभारेण विगलन् विस्रवन् यो बाष्पः अश्रु तेन समावृतानि सम्यगाच्छादितानि पूरितानीत्यर्थः यानि नयनानि नेत्राणि येषां तादृशाः । पुलकेन रोमाञ्चेन आवृताः आच्छादिताः तनवः शरीराणि येषां तादृशाश्च सन्तः । आलेख्यवत् चित्रवत् । निष्पन्दतराः अतीव निश्चलाः बभूवुः ॥ ३ ॥

अथेति । अथ तदानीम् । निखिलानां सर्वेषां सवनाशनानां क्रतुभुजां सार्वभौमः चक्रवर्ती । सः पुरन्दरः इन्द्रोऽपि । परमानन्दमयं परमानन्दस्वरूपम् । तं श्रीपद्मनाभम् । निजेन आत्मीयेन नेत्रसहस्रेण । निरवधि यथा तथा, निपीय नितरां पीत्वापि । तृप्तः न बभूव ॥ ४ ॥

तदन्विति । तदनु तदनन्तरम् । सुकृतपयोनिधिः सुकृतसमुद्रः । सः दिवाकरयतीश्वरः । भगवतः आज्ञया नियोगेनैव । अस्य श्रीपद्मनाभस्य । परम् अधिकम् । उचितां युक्ताम् । अनुदिनं दिनं प्रति । अभ्युदयशालिनीं वृद्धिमतीम् । निखिलानां जगताम् आनन्ददायिनीं सन्तोषप्रदाम् । कल्पान्तेषु प्रलयेष्वपि । अनपायिनीं नाशरहिताम् । कल्पान्तेष्वपीत्यपिशब्देन तावत्पर्यन्तमनपायित्वं सुतरां सिद्धम् । वरीयसीं श्रेष्ठाम् । पाञ्चरात्रवैखानसरूपेण पूजाया द्वैविध्यात् तत्र उत्तमवैखानसात्मिकामित्यर्थः । सपर्यां पूजां कल्पयामास कल्पितवान् ॥ ५ ॥

अथास्यैव भगवतः पङ्केरुहनाभस्य दक्षिणपार्श्वे निजभक्तसत्तमप्रह्लादातुलभक्तिभरवीक्षणकुपितापरिमितभुजबलदुर्धर्षासंख्यदितितनुजवाहिनीसहितहिरण्यकशिपुकरोपात्तकरालकरवालपाटितघनतरस्तम्भान्तरालादाविर्भूयातिघोरतरेणाट्टहासेन चतुर्दशभुवनान्यपि कम्पयन् विततबिसधवलसटाकुलाग्रसंस्पृष्टपयोधरमण्डलः विविधतरानिशितप्रहरणप्रयोगाविदग्धमेनं दैत्यकुञ्जरं निजाङ्कतले निधाय निशितैर्नखरैस्तद्वक्षः पाटयन् तदन्तःस्थितमतिशोणितं फेनिलं बहु

अथेति । अथ निजेषु भक्तेषु सत्तमस्य अतीव श्रेष्ठस्येति यावत् । प्रह्लादस्य अतुलो निरुपमो यः भक्तिभरो भक्त्यतिशयः तस्य वीक्षणेन कुपितः क्रुद्धः अपरिमितेनानल्पेन भुजबलेन बाहुवीर्येण दुर्धर्षः दुःखेन धर्षितुं शक्यः असंख्याः संख्यारहिताः अनन्ता इत्यर्थः ये दितितनुजा असुराः तेषां वाहिन्या सेनया सहितो युक्तश्च यः हिरण्यकशिपुः तस्य करेण उपात्तः स्वीकृतः उद्धृत इत्यर्थः करालः क्रूरश्च यः करवालः खड्गः, 'कौक्षेयको मण्डलाग्रः करवालः कृपाणवदि'त्यमरः, तेन पाटितस्य विदारितस्य घनतरस्य अतीव दृढस्य च स्तम्भस्य अन्तरालाद् मध्यभागाद् । आविर्भूय प्रत्यक्षीभूय । अतिघोरतरेण अतीव भयङ्करेण। 'घोरं भीमं भयानकम् । भयङ्करमि'त्यमरः। अट्टहासेन सिंहनादेन । चतुर्दशभुवनानि लोकानपि कम्पयन् भयचालितान् कुर्वन्नित्यर्थः । विततं विस्तृतम् बिसवत् मृणालवत्, 'मृणालं बिसमि'त्यमरः, धवलं च यत् सटाकुलं स्कन्धरोमसमूहः तस्य अग्रेण संस्पृष्टं सम्यक् स्पृष्टं पयोधरमण्डलं मेघमण्डलं येन तादृशः । विविधतराणि अनेकप्रकाराणि निशितानि तीक्ष्णानि च यानि प्रहरणानि आयुधानि, 'आयुधं तु प्रहरणमि'त्यमरः, तेषां प्रयोगे विदग्धं समर्थम् । एनं दैत्यकुञ्जरं दैत्यश्रेष्ठम् । 'पुङ्गवर्षभकुञ्जरा' इत्यमरः । हिरण्यकशिपुमित्यर्थः । अत्र नरसिंहहननयोग्यत्वप्रदर्शनार्थं गजवाचककुञ्जरशब्दप्रयोगः । निजाङ्कतले निजाङ्कप्रदेशे । निधाय निक्षिप्य । निशितैः तीक्ष्णैः । नखरैः नखैः । तद्वक्षः हिरण्यकशिपुवक्षः । पाटयन्

लोहितं करपुटेन मुहुर्मुहुरापीयाप्यशान्तरोषभाराच्चकितापसृतेषु वज्रायुधमुख्यसकलनिर्जरेषु निर्भयं निजचरणयुगलकृतप्रणामकयाधुनन्दननिरीक्षणजनितानन्दस्तस्मै निःस्पृहायापि वितीर्णसकलवरो विलसति भगवान् श्रीनरसिंहः ॥ ६ ॥

अथास्यैव भगवतः श्रीपद्मनाभस्य निकटे विलसति भगवान् धीरोदात्तगुणपयोनिधिः समस्तलोकसार्वभौमः कमलबान्धवान्वयकलशाम्बुधिराकाशशाङ्कः श्रीरामचन्द्रः सा-

---

विदारयन् । तदन्तःस्थितं तस्य वक्षसः अन्तः अन्तर्भागे स्थितम् । अतिशोणितम् अत्यन्तं सञ्जातशोणवर्णम् । फेनिलं फेनसहितम् । बहु प्रचुरम् । लोहितं क्षतजम् । 'रुधिरेऽसृग्लोहितास्ररक्तक्षतजशोणितमि'त्यमरः । करपुटेन, मुहुर्मुहुः पुनः पुनरपि । आपीय पीत्वापि । अशान्तरोषभारात् अशान्तकोपः भारात् । वज्रायुधः इन्द्रः स मुख्यः प्रधानो येषां तादृशेषु सकलेषु समस्तेषु निर्जरेषु देवेषु । चकितेषु भीतेषु अपसृतेषु दूरस्थितेषु च सत्सु । निर्भयं यथा तथा निजचरणयुगले कृतप्रणामस्य कृतनमस्कारस्य कयाधुनन्दनस्य प्रह्लादस्य, कयाधुरिति प्रह्लादमातुर्नाम, निरीक्षणेन जनितः उत्पादित-आनन्दो यस्य तादृशः सन् । निःस्पृहाय निराग्रहायापि । तस्मै प्रह्लादाय । वितीर्णा दत्ताः सकलाः वरा येन तादृशः । भगवान् ऐश्वर्यादिषट्कपरिपूर्णः । श्रीनरसिंहः । भगवतः अस्य पङ्केरुहनाभस्य श्रीपद्मनाभस्यैव दक्षिणपार्श्वे दक्षिणभागे विलसति शोभते ॥ ६ ॥

अथेति । अथ भगवान् धीरोदात्तगुणपयोनिधिः धीरोदात्तस्य धीरोदात्तनायकस्य ये गुणा महासत्त्वादयः । यदुक्तं प्रतापरुद्रीये —

"महासत्त्वोऽतिगम्भीरः कृपावानविकत्थनः ।
धीरश्च निरहङ्कारो धीरोदात्तो दृढव्रतः ॥"

इति । तेषां पयोनिधिः समुद्रः । समस्तलोकसार्वभौमः सर्वलोकचक्रवर्ती । कमलबान्धवः सूर्यः तस्य अन्वयो वंश एव कलशाम्बुधिः क्षीरसमुद्रः तस्य राकाशशाङ्कः पूर्णचन्द्रः । पूर्णचन्द्रो यथा क्षीरसमुद्रस्य तथा सूर्यवंशस्य वृद्धिकर इति यावत् । श्रीरामचन्द्रः, सानुजः सलक्ष्मणः । सदयितः

नुजः सदयितो निजभक्तकुलवरेण्यसमीरतनयसहितश्च ॥७॥

अथ विष्वक्सेनव्यासक्षेत्रपालार्याश्चास्य सविधमलं-कुर्वन्ति तारा इव तुषारकिरणस्य ॥ ८ ॥

पुनरस्य भगवतः श्रीपद्मनाभस्याविदूर एव विलसति स व्रजाङ्गनामितपुण्यपुञ्जो निजदेहकान्तितुलितातिसुन्दरक-लिन्दनन्दिनीतरङ्गासिक्तबृन्दावनसङ्गतानेकधेनुवत्सबृन्दाव-ननिरतमानसः परमानन्दमयमूर्तिः स भगवान् देवकीन-न्दनः ॥ ९ ॥

सतासहितः । निजभक्तकुलवरेण्यः स्वसेवकजनश्रेष्ठः यः समीरतनयः हनु-मान् तेन सहितश्च सन् । भगवतः अस्य श्रीपद्मनाभस्य एव, निकटे समीपे । विलसति शोभते ॥ ७ ॥

अथेति । अथ, विष्वक्सेनः व्यासः क्षेत्रपालः आर्यः भूतनाथः एते च । ताराः नक्षत्राणि । तुषारकिरणस्य चन्द्रस्येव । अस्य श्रीपद्म-नाभस्य । सविधं समीपप्रदेशम् । अलंकुर्वन्ति भूषयन्ति, समीपवासिनो भवन्तीति यावत् ॥ ८ ॥

पुनरिति । पुनः, व्रजाङ्गनानां गोपस्त्रीणाम् अमितः अनल्पः यः पुण्यपुञ्जः सुकृतसञ्चयः तत्स्वरूपः । निजया आत्मीयया देहकान्त्या शरीर-शोभया तुलिताः उपमिताः कृष्णवर्णा इत्यर्थः अतिसुन्दराश्च ये कलिन्दन-न्दिनीतरङ्गाः कालिन्दीकल्लोलाः तैः आसिक्ते आ समन्तात् सेकं प्राप्ते बृन्दा-वने वृन्दावननामके विपिने सङ्गता अनेका बह्व्यो या धेनवः पशवो वत्साश्च तेषां वृन्दस्य समूहस्य अवने पालने निरतम् आसक्तं मानसं मनो यस्य तादृशः । परमानन्दमयमूर्तिः परमानन्दमयस्वरूपः । भगवान्, सः प्रसिद्धः । देवकीनन्दनः श्रीकृष्णः । भगवतः अस्य श्रीपद्मनाभस्य । अविदूरे समीप एव । विलसति शोभते ॥ ९ ॥

एवमपरिमितानन्यसाधारणमहितानुभावः स भगवानरविन्दनाभो यदेतत् स्यानन्दूरपुरं कृपया कृतार्थीचकार, तादृशानेन पुरेण कथमितरप्रदेशो भुवि साम्यं बिभर्ति ॥ १० ॥

लक्ष्मीदिव्यकटाक्षभृङ्गनिकरोद्यानायितं सन्ततं
विश्वेषां वसतामसीमविमलानन्दौघसन्दायकम् ।
दुग्धाम्भोनिधिमध्यतोऽपि कमलाभर्तुः प्रियं मुक्तिदं
स्यानन्दूरपुरात् परं पदमहो जानामि नैवापरम् ॥ १ ॥

**एवमिति** । एवम् उक्तप्रकारेण । अपरिमितः अनल्पः अन्यसाधारणो न भवतीत्यनन्यसाधारणः महितः पूजितश्च यः अनुभावः माहात्म्यं स यस्य तादृशः । भगवान् सः, अरविन्दनाभः श्रीपद्मनाभः । यत् यस्माद्धेतोः । एतत् स्यानन्दूरपुरं कृपया, कृतार्थीचकार स्वाधिष्ठानतासम्पादनेन सफलीकृतवान् । तादृशा तादृग्भूतेन । अनेन पुरेण स्यानन्दूरपुरेण । भुवि इतरप्रदेशः अन्यप्रदेशः । कथं केन प्रकारेण । साम्यं सादृश्यम् । बिभर्ति, न कथमपीत्यर्थः । स्यानन्दूरपुरं निरुपममेवेति भावः ॥ १० ॥

निरुपमत्वमेव प्रपञ्चयन् स्यानन्दूरपुरं वर्णयति — लक्ष्मीति । सन्तत सदा । लक्ष्म्याः श्रीभगवत्याः दिव्या. कटाक्षा एव ये भृङ्गाः तेषां निकरस्य समूहस्य उद्यानायितम् उद्यानवदाचरितं भृङ्गानां यथा उद्यानं तथा लक्ष्मीकटाक्षाणां सर्वदाप्यावासभूतमित्यर्थः । सर्वदापि लक्ष्मीकटाक्षप्रचारात् सकलसम्पत्सम्पूर्णमिति यावत् । वसतां वासं कुर्वताम् । स्वस्मिन्निति शेषः । विश्वेषां सर्वेषाम् । असीमः निरवधिको विमलश्च यः आनन्दौघः आनन्दसमूहः तस्य सन्दायकं प्रदायकम् । कमलाभर्तुः श्रीपद्मनाभस्य । दुग्धाम्भोनिधिमध्यतः क्षीराब्धिमध्यादपि श्वेतद्वीपादपीत्यर्थः । प्रियम् इष्टम् । परं श्रेष्ठम् । स्यानन्दूरपुराद् अपरम् अन्यत् पदं स्थानम् । नैव जानामि, अहो आश्चर्यम् । अत्रैतादृशगुणविशिष्टस्य स्यानन्दूरपुरभिन्नस्य एकस्यापि पदस्याभावात् । स्यानन्दूरपुरमात्रस्यैव एतादृशगुणविशिष्टत्वं नान्यस्येत्युक्त्या निरुपमत्वं सिद्धमेव ॥ १ ॥

स्यानन्दूरपुरं च पङ्कजभवो वैकुण्ठलोकं तुला-
मध्यारोपयदित्यवैमि नितरां भेदं द्वयोर्वेदितुम् ।
स्यानन्दूरपुरं भुवि स्थितमभूद्वैकुण्ठलोकश्चिरा-
दूर्ध्वं तिष्ठति तेन चास्य गरिमा व्यक्तोऽधिकं दृश्यते ॥२॥

अस्मिन् भूवलये सशैलविपिने न क्वापि तुल्यो बत
स्यानन्दूरपुरेण चेति विदितो लोकैः प्रदेशोऽपरः ।
स्वर्गे यद्यथवा रसातलपदे त्वेतादृशः स्यात् पर-
स्तावत् तत्र निवासिनामिह कथं बाधः पुरे सम्भवेत् ॥

स्यानन्दूरपुरमिति । पङ्कजभवः ब्रह्मा । द्वयोः स्यानन्दूरपुरवैकुण्ठलोकयोः । भेदं गौरवलाघवरूपं व्यत्यासमित्यर्थः । नितराम् अधिकं सम्यगित्यर्थः । सूक्ष्मतयेति यावत् । वेदितुं ज्ञातुम् । स्यानन्दूरपुरं वैकुण्ठलोकं च तुलाम् अध्यारोपयत् तुलायामारोपयदित्यर्थः । तदा स्यानन्दूरपुरं भुवि भूमौ स्थिरम् अचञ्चलम् अभूत्, गौरवातिशयादिति भावः । वैकुण्ठलोकः, चिरात् अत्यर्थम् । ऊर्ध्वम् ऊर्ध्वभागे । तिष्ठति, लाघवातिशयादिति भावः । इति एवम्प्रकारेण । अवैमि निश्चिनोमि । तेन भूमौ स्थिरतया वृत्तित्वेन हेतुना अस्य स्यानन्दूरपुरस्य । गरिमा गौरवं दुर्भरत्वमित्यर्थः, श्रेष्ठत्वमिति च गम्यते । 'गुरुस्तु गीष्पतौ श्रेष्ठे गुरौ पितरि दुर्भर' इति हलायुधः । अधिकम् अत्यर्थम् । व्यक्तः स्पष्टः । दृश्यते, अस्माभिरिति शेषः । उत्प्रेक्षालङ्कारः ॥ २ ॥

अस्मिन्निति । लोकैः जनैः । स्यानन्दूरपुरेण तुल्यः इति, विदितः ज्ञातः । अपरः अन्यः । प्रदेशः, सशैलविपिने अस्मिन् भूवलये भूमण्डले । क्वापि कुत्रापि । नच नास्त्येवेत्यर्थः । बत आश्चर्यम् । स्वर्गे, अथवा रसातलपदे पातालप्रदेशे तु । एतादृशः स्यानन्दूरपुरसदृशः । परः अन्यः प्रदेश इति शेषः । स्याद्यदि अस्ति चेदित्यर्थः । तावत् तदा । तत्र स्वर्गपातालयोः । निवासिनां स्थितानां, जनानामिति शेषः । बाधः सम्मर्दः । इह पुरे स्यानन्दूरपुरे । कथं केन प्रकारेण । सम्भवेद् उपपन्नो भवेत् न कथमपीत्यर्थः । अतः स्वर्गे पातालेऽपि स्यानन्दूरपुरसदृशप्रदेशो नास्त्येवेति युक्तिसिद्धमिति भावः । अनुमानालङ्कारः ॥ ३ ॥

नाके लभ्यमथामृतं सुमनसां पूर्वं पयोवारिधेः
सञ्जातं मथनेन तच्च महता यत्नेन नैवान्यथा ।
स्यानन्दूरपुरेऽत्र लभ्यममृतं पापीयसामप्यहो
लोकानां च विना श्रमेण वसतामानन्दसान्द्रं स्थिरम् ॥

मन्दाः स्वोदरपूर्तिमात्रचतुराः केचिज्जनाः सस्पृहा
वित्तादौ कुधियोऽपरे च विषयव्यासक्तचित्तास्तथा ।

---

नाके इति । अथ, नाके स्वर्गे । सुमनसां देवानाम् । 'सुपर्वाणः सुमनस' इत्यमरः । शुद्धात्मनामिति च गम्यते । अमृतं पीयूषम् । लभ्यं लब्धुं शक्यं भवतीति शेषः । तच्च अमृतं च । महता यत्नेन महाप्रयासेन सहेति शेषः । पूर्वं पुरा । पयोवारिधेः क्षीरसमुद्रस्य । मथनेन सञ्जातम् उत्पन्नं, भवतीति शेषः । अन्यथा अन्येन प्रकारेण प्रयत्नं विनेत्यर्थः । न एव नैव सञ्जातं भवतीत्यर्थः । अपरिमितप्रयत्नेनैव सञ्जातमिति यावत् । अत्र अस्मिन् स्यानन्दूरपुरे । वसतां पापीयसां लोकानामपि पापिष्ठानां जनानामपि । अपिना पुण्यवतां किं वक्तव्यमिति सूच्यते । आनन्देन सान्द्रं घनं सान्द्रानन्दस्वरूपमिति यावत् । स्थिरं पुनरावृत्तिरहितम् । एतद् *द्वयमपि मोक्षस्य श्रुत्युक्तमेव । अमृतं पीयूषं मोक्ष इति च । 'मुक्तिः कैवल्यनिर्वाणश्रेयोनिःश्रेयसामृतम् । मोक्षोऽपवर्ग' इत्यमरः । श्रमेण विना प्रयासं विनैव । लभ्यं, भवतीति शेषः । अहो आश्चर्यम् ॥ ४ ॥

मन्दा इति । केचित्, मन्दाः अल्पबुद्धयः । केचित् स्वोदरपूर्तिमात्रे आत्मीयकुक्षिपूरणमात्रे नत्वन्यत्रेत्यर्थः, चतुराः समर्थाः । स्वोदरमात्रपूरणमपि दोष एव,

"यस्मिन् जीवति जीवन्ति बहवः स तु जीवति ।
बकोऽपि किं न कुरुते चञ्च्वा स्वोदरपूरणम् ॥"

इत्याद्युक्तत्वात् । केचिद्, वित्तादौ धनादौ । सस्पृहाः साग्रहाः । अपरे अन्ये । कुधियः कुत्सितबुद्धयः दुर्बुद्धय इत्यर्थः । अपरे विषयेषु स्रक्चन्दनवनि-

*द्वयम् आनन्दसान्द्रत्वं स्थिरत्वं चेति धर्मयुगलम्

स्यानन्दूरपुरे यदि स्वसुकृतेनात्रागमिष्यन्ति ते
जायन्ते स्म विधूतपापनिकराः सर्वे महान्तो यथा ॥ ५ ॥

स्यानन्दूरपुरं निरीक्ष्य किल यत् स्वर्गेऽप्यनीहाः परं
देवा भूमिसुरच्छलेन नियतं कुर्वन्ति वासं सदा ।
तादृङ् निर्जरलोकतोऽप्यधिकतां यो वा बिभर्त्यन्वहं
कर्ता विश्वमुदः कथं नहि भवेत् सोऽयं प्रदेशो वरः ॥

ये स्नानव्रतहोमदानमुखसत्कर्मादिभिः सन्ततं
क्लिष्टा हन्त भवन्ति धन्यचरितास्ते हन्त जन्मान्तरे ।

---

तादिषु व्यासक्तानि विशेषेणासक्तानि तत्पराणि चित्तानि मनांसि येषां तादृशाः । जनाः, स्वसुकृतेन आत्मीयसुकृतवशात् । अत्र अस्मिन् स्यानन्दूरपुरे । आगमिष्यन्ति आयास्यन्ति यदि । ते पूर्वोक्ताः सर्वे । यथा महान्तः सज्जनाः । तथा विधूतपापनिकराः निर्दग्धसकलकल्मषा इत्यर्थः । जायन्ते भवन्ति । स्मेति पादपूरणे ॥ ५ ॥

स्यानन्दूरपुरमिति । देवाः, यद् यादृशम् । स्यानन्दूरपुरं निरीक्ष्य स्वर्गेऽपि परम् अनीहाः अनिच्छाः सन्तः । भूमिसुरच्छलेन ब्राह्मणा इति व्याजेन । सदा वासं स्थितिम् । अत्र स्यानन्दूरपुर इति शेषः । नियतं नियमेन कुर्वन्ति । तादृक् तादृशः । यः प्रदेशः अन्वहं नित्यम् । निर्जरलोकतोऽपि स्वर्गादपि । अधिकताम् आधिक्यम् । बिभर्ति दधाति । वरः श्रेष्ठः सः अयं प्रदेशः स्यानन्दूरपुरप्रदेश इत्यर्थः । विश्वेषां सर्वेषां मुदः सन्तोषस्य । कर्ता कथं नहि भवेत् सकलसन्तोषकारी भवेदित्यर्थः । अत्र भूमिसुरेषु च्छलपदेन भूमिसुरत्वनिह्नुतिव्यक्त्या अपह्नवभेदोऽलङ्कारः ॥ ६ ॥

ये इति । धन्यचरिताः धन्यानां सुकृतिनां चरितमिव चरितम् आचारो येषां तादृशाः । ये जना इति शेषः । स्नानव्रतहोमदानमुखैः सत्कर्मादिभिः । सन्ततं सदा । क्लिष्टाः क्लेशयुक्ताः । भवन्ति । हन्त हन्तेत्यनुकम्पायाम् । ते पूर्वोक्ता जनाः । जन्मान्तरे अपरजन्मनि । पूर्वजन्मनि अतीतजन्मनि

स्यानन्दूरपुरे सुभोक्तुमिह वै पुण्यस्य पूर्णं फलं
जायन्ते खलु पूर्वजन्मचरितस्यानुग्रहाच्चक्रिणः ॥ ७ ॥
स्यानन्दूरपुरेश्वरः स भगवान् श्रीपद्मनाभो हरिः
श्रीभूमीरमणोऽपि सक्तहृदयः पुर्यामिहास्यां ध्रुवम् ।
या सूते पुरुषान् भुजाञ्चितगदाशङ्खारिपङ्केरुहान्
भव्यान् दिव्यकलायसूनमहसः पीताम्बरान् सुन्दरान् ॥
स्यानन्दूरपुरं किल प्रविशतां दूरागतानां नृणा-
मानन्देन समोऽस्ति नैव भुवने त्वानन्दभारोऽपरः ।

---

चरितस्य अनुष्ठितस्य । पुण्यस्य स्नानव्रतादिसत्कर्मणामित्यर्थः । पूर्णं फलम् । अनुभोक्तुम् अनुभवितुम् । चक्रिणः श्रीपद्मनाभस्य । अनुग्रहात् हेतोः । इह वै अस्मिन् स्यानन्दूरपुरे किल । जायन्ते खलु जाता भवन्त्येव । हन्त, हन्तेति हर्षे । 'हन्त हर्षेऽनुकम्पायां वाक्यारम्भविषादयोरि'त्यमरः ॥ ७ ॥

स्यानन्दूरपुरेति । स्यानन्दूरपुरेश्वरः । भगवान् हरिः सः श्रीपद्मनाभः । श्रियः लक्ष्म्या भूम्याश्च रमणः भर्ता अपि । इह मनुष्यलोके । अस्यां पुर्यां स्यानन्दूरपुर्याम् । अत्र स्त्रीलिङ्गमहिम्ना स्त्रियामिति च गम्यते । सक्तहृदयः आसक्तचित्तः । भवतीति शेषः । ध्रुवं निश्चयः । या स्यानन्दूरपुरी भुजेषु अञ्चितानि गदाशङ्खारिपङ्केरुहाणि कौमोदकीपाञ्चजन्यसुदर्शनपद्मानि येषां तादृशान् । भव्यान् मङ्गलान् । दिव्यं यत् कलायसूनं कलायपुष्पं तस्य मह इव महस्तेजो येषां तादृशान्, नीलवर्णानित्यर्थः । पीताम्बरान् पीतवर्णवस्त्रान् । सुन्दरान् च पुरुषान्, सूते प्रसूते । या सूते अस्यामिति पूर्वेणान्वयः । अत्र निवसन्तः भगवत्सारूप्यं लभन्त इति भावः । यस्यां जायायां स्वसदृशाः पुत्रा जायन्ते तस्यामेव भर्तुरधिकानुरागः नत्वन्यस्यामिति लोकप्रसिद्धेः काव्यलिङ्गगर्भितोत्प्रेक्षालङ्कारः ॥ ८ ॥

स्यानन्दूरपुरमिति । स्यानन्दूरपुरं किल प्रविशतां, दूरात् दूरदेशाद् आगतानां प्राप्तानाम् । नृणां नराणाम् । आनन्देन समः, अपरः अन्यः, आनन्दभारः । भुवने, जातावेकवचनमिदं, लोकेष्वित्यर्थः । नास्त्येव । एवकारेण सन्देहस्य-

ब्रह्मानन्दपदं च योगिमनसा ज्ञेयं न तुल्यं यत-
स्तस्यानन्दभरस्य हन्त समतां केनेह वा ब्रूमहे ॥ ९ ॥
आक्रान्तोऽपि महीतले किल कलिः सर्वत्र दुश्चेष्टितो
द्राक्सान्निध्यमयेन यत्र तु हरेर्दुर्गेण दुर्गेण वै ।
नो शक्तो भवति प्रवेष्टुमिह यत तत्तादृगेतद् वरं
स्यानन्दूरपुरं नु कस्य हृदयं तुष्टं न कुर्यात् परम् ॥ १० ॥
आर्तानां भवरूपदावदहनज्वालोष्मणा सन्ततं
भक्तव्रातमहीरुहामिह कृपापीयूषवृष्ट्या परम् ।

शोऽपि नास्तीति सूच्यते । योगिमनसा, ज्ञेयं ज्ञातुं शक्यम् । ब्रह्मानन्दपदं च ब्रह्मानन्दरूपं वस्त्वपि । 'पदं व्यवसितित्राणस्थानलक्ष्माङ्घ्रिवस्तुषु' इत्यमरः । यतः येन, सार्वविभक्तिकस्तसिः । न तुल्यं, भवतीति शेषः । तस्य तादृशस्य आनन्दभरस्य आनन्दातिशयस्य । 'अतिशयो भर' इत्यमरः । इह लोके । केन वा केनानन्देन वा । समतां तौल्यं ब्रूमहे, न केनापीत्यर्थः । तादृशानन्दस्यान्येन सह तौल्यकथनमशक्यमेवेति भावः । अहो आश्चर्यम् ॥ ९ ॥

आक्रान्त इति । दुश्चेष्टितः दुर्व्यापारः । कलिः, महीतले भूमौ । सर्वत्र किल, द्राक् झटिति । आक्रान्तः व्याप्नुवन्नपि । हरेः श्रीपद्मनाभस्य । सान्निध्यमयेन सान्निध्यस्वरूपेण । यत्र यस्मिन् स्यानन्दूरपुरे । स्थितेन । दुर्गेण दुःखेन गन्तुं शक्येन । दुर्गेण प्राकारेण हेतुना । इह तु स्यानन्दूरपुरे । प्रवेष्टुं प्राप्तुम् । वै नो शक्तो भवति नैव समर्थो भवति । यत् तत्तादृक् तादृशम् । वरं श्रेष्ठम् । एतत स्यानन्दूरपुरम् । कस्य नु कस्य वा । हृदयं चित्तम् । परम् अधिकं तुष्टं न कुर्यात् सर्वेषामपि हृदयं तुष्टं कुर्यादेवेत्यर्थः ॥ १० ॥

आर्तानामिति । इह अस्मिन् लोके । स्वं सम्यक्सेवितुं शीलम् एषां तादृशानाम् । भवरूपः संसारस्वरूपः यः दावदहनः अरण्यवह्निः तस्य ज्वालाया ऊष्मणा तापेन । सन्ततम्, आर्तानां पीडितानाम् । भक्तव्राता भक्तसमूहाः एव ये महीरुहा वृक्षाः तेषाम् । आर्तिं पीडाम् । कृपैव यत् पीयूषम् अमृतं तस्य वृष्ट्या वर्षेण । परम् अधिकं निश्शेषेणेत्यर्थः ।

छित्त्वार्तिं शिशिरीकरोति हृदयं यो वा स्वसंसेविनां
सोऽयं यत्र पुरे विराजति सदा श्रीपद्मनाभाम्बुदः ॥ ११ ॥
अंहोराशिपुलिन्दभीतहृदयाः साधुद्विजाः सन्ततं
स्यानन्दूर*पुरे महीरुहि कृपापत्रावृते चक्रिणः ।
सानन्दं विहरन्ति निर्भयतमाः संकीर्तयन्तो हरे-
र्नामान्यत्र तु मङ्गलानि परमानन्दाब्धिमग्नाः परम् ॥
पापात्मा स गजः समस्तधरणीभागस्थितान् मानवान्
नित्यं व्याकुलयंश्चरन्नपि बिभेत्यायातुमस्मिन् पुरे ।

छित्त्वा निवार्य । हृदयं चित्तम् । यो वा । शिशिरीकरोति शिशिरं विधत्ते । सः अयं, श्रीपद्मनाभ एवाम्बुदो मेघः । यत्र पुरे स्यानन्दूरपुरे । सदा, विराजति शोभते । अत्र रूपकालङ्कारः ॥ ११ ॥

अंहोराशीति । अंहोराशयः पापसञ्चया एव ये पुलिन्दाः किराताः तेभ्यः भीतं हृदयं येषां तादृशाः । साधवः सज्जना एव द्विजाः पक्षिणः अथवा साधवश्च ते द्विजाः ब्राह्मणा एव पक्षिणः । श्लिष्टरूपकम् । 'दन्तविप्राण्डजा द्विजा' इत्यमरः । चक्रिणः श्रीपद्मनाभस्य । कृपयैव पत्रेण आवृते । अत्र तु अस्मिन् स्यानन्दूरपुर एव, महीरुहि वृक्षे । व्यस्तरूपकमेतत् । आगत्येति शेषः । निर्भयतमाः भयलेशेनापि रहिता इत्यर्थः । मङ्गलानि मङ्गलकारीणि । हरेः श्रीपद्मनाभस्य । नामानि, सानन्दं यथा तथा, संकीर्तयन्तः सम्यक् जपन्तः । परम् अधिकम् । परमानन्दाब्धौ परमानन्दसमुद्रे मग्नाश्च सन्तः ; विहरन्ति क्रीडन्ति । रूपकालङ्कारः ॥ १२ ॥

पापात्मेति । पापात्मा पापस्वरूपः । स गजः कल्मषात्मकगज इत्यर्थः । समस्तेषु सकलेषु धरणीभागेषु स्थितान् । मानवान् मनुष्यान् । नित्यं, व्याकुलयन् परवशान् कुर्वन् सन् । चरन् सञ्चरन्नपि । इदं स्यानन्दूरपुरम् । हरिणा श्रीपद्मनाभेनैव हरिणा सिंहेन श्लिष्टरूपकम् । 'यमानिलेन्द्रचन्द्रार्कविष्णुसिंहांशुवाजिषु । शुकाहिकपिभेकेषु हरिरि'त्यमरः । सेवितम् अध्यासितम् । इति

* 'भये म' इति मूले पाठो दृष्टः ।

ज्ञात्वेदं हरिसेवितं च कलयन् व्याप्तां तदीयां यशः-
स्फूर्तिं तन्निहतस्वबान्धवशिरोभागस्थमुक्ता इति ॥ १३ ॥

मन्ये पद्मभवोऽदितेस्तनुभवान् पूर्वं तु धीमान् परं
चक्रे वीतनिजाक्षिमीलनगुणान् नित्यं समस्तानलम् ।
नाकावाससुदर्पितान् परममून् शोभां परां सन्ततं
स्यानन्दूरपुरस्य दर्शयितुमेवोच्चैरनन्यादृशीम् ॥ १४ ॥

---

ज्ञात्वा, व्याप्तां, तदीयां हरिसम्बन्धिनीम् । यशःस्फूर्तिं यशःसमृद्धिम् । तेन हरिणा निहतानां स्वबान्धवानां स्वबन्धूनाम् । 'सगोत्रबान्धवज्ञातिबन्धुस्वस्वजना' इत्यमरः । शिरोभागस्थाः मस्तकप्रदेशस्थिताः मुक्ताः इति एवंप्रकारेण । कलयन् मन्यमानश्च । अस्मिन् पुरे स्यानन्दूरपुरे । आयातुम् आगन्तुम् । बिभेति भीतो भवति । पापरूपगजः स्यानन्दूरपुरं हर्यध्यासितमिति तत्कीर्तिं तन्निहतस्वबन्धुकुलमस्तकप्रदेशास्थितमुक्ता इति च भावयन् मया तत्र गतं चेत् मद्बान्धवानिव मामपि स निहनिष्यति, अतो मया तत्र न गन्तव्यमिति मत्वा एतत्स्यानन्दूरपुरे आगन्तुमतीव भीतो भवतीत्यर्थः । अत्र भगवत्सान्निध्यात् पापं नास्तीति भावः । रूपकभ्रान्तिमतोः सङ्करः ॥ १३ ॥

मन्ये इति । परम् अधिकम् । धीमान् बुद्धिमान् अतिबुद्धिशालीत्यर्थः । पद्मभवः ब्रह्मा । पूर्वं तु अलम् अधिकम् । नाकावासेन स्वर्गस्थित्या सुदर्पितान् सुतरां गर्विष्ठान् । समस्तान् अमून् । अदितेः तनुभवान् देवान् । परां श्रेष्ठाम् । अनन्यादृशीं निरुपमाम् । स्यानन्दूरपुरस्य उच्चैः शोभां सन्ततं दर्शयितुम् अवलोकयितुमेव । नित्यम् अनवरतम् । वीतः नष्टः निजाक्षिमीलनगुणः निजनेत्रनिमेषधर्मः येषां तादृशान् । चक्रे कृतवान् । मन्ये नूनम् । लोकोत्कृष्टस्थाने तिष्ठन्तो वयमेव धन्यतमा इति गर्विष्ठान् देवान् विलोक्य तेषां गर्वहरणाचिकीर्षुर्ब्रह्मा स्वर्गादुत्कृष्टस्यानन्दूरपुरशोभासन्ततदर्शने सति निमेषकालेऽपि तेषां तादृशगर्वो न भविष्यतीत्यभिप्रायेण तान् सन्ततमनिमिषान् कृतवानिति मन्य इति भावः । उत्प्रेक्षालङ्कारः ॥ १४ ॥

लोकेऽस्मिन् गतकल्मषाः सुकृतिनः पुण्यस्वरूपेण ये
वाणिज्यं दधति स्म पण्यनिकरेणातीतजन्मन्यलम् ।
स्यानन्दूरमयापणे किल समेत्यैते हि पण्याधिकं
मूल्यं कोटिगुणं गतच्युतिकथं मुक्तिं लभन्ते पराम् ॥
स्यानन्दूरपुरं यियासुरयमित्यंहोमयास्तस्करा
जानन्तश्चकिताः पलायनमहो कुर्वन्ति दृष्ट्वाध्वगम् ।
एवं सत्यथ तत्र सन्निवसतां पापं कथं सम्भवे-
न्नित्यं पङ्कजनाभपूर्णकरुणापीयूषसिक्तात्मनाम् ॥ १६ ॥

लोके इति । अस्मिन् लोके भूमौ । गतकल्मषाः विगतपाप्मानः । ये सुकृतिनः पुण्यवन्तः । अतीतजन्मनि पूर्वजन्मनि । पुण्यस्वरूपेण, पण्यनिकरेण पण्यानां विक्रेयवस्तूनां, 'विक्रेयं पणितव्यं च पण्यमि'त्यमरः, निकरेण समूहेन । अलम् अधिकम् । वाणिज्यं वणिक्कर्म । 'वाणिज्यं तु वणिज्या स्याद्' इत्यमरः । दधति स्म अकुर्वन् । एते हि एते एव । स्यानन्दूरमये स्यानन्दूरस्वरूपे आपणे विपण्याम् । 'आपणस्तु निषद्यायां विपणि'रित्यमरः । वाणिज्यस्थान इत्यर्थः । समेत्य आगत्य । पण्यादप्यधिकं, कोटिगुणं कोटिगुणितम् । गता निवृत्ता च्युतिकथा नाशप्रसङ्गो यस्मात् तादृशम् । मुक्तिं मूल्यं मुक्तिरूपमूल्यं क्रयमित्यर्थः । परं, लभन्ते प्राप्नुवन्ति । पुण्यशालिभिः स्थलान्तरेषु तत्तत्पुण्यानुसारेणैव फलं लभ्यते । अत्र तु पुण्यादधिकं मोक्षरूपं फलं लभ्यते । अतोऽतीवाश्चर्यम् एतत्स्थलमाहात्म्यमिति भावः । अत्र रूपकं परिवृत्तिश्च । 'परिवृत्तिर्विनिमयो न्यूनाभ्यधिकयोर्मिथः' इति लक्षणात् । तयोरङ्गाङ्गिभावेन सङ्करः ॥ १५ ॥

स्यानन्दूरपुरमिति । अंहोमयाः पापस्वरूपाः । तस्कराः चोराः । अध्वगं पान्थम् । दृष्ट्वा अयम् अध्वगः । स्यानन्दूरपुरं, यियासुः यातुमिच्छुः । भवतीति शेषः । इति एवम्प्रकारेण । जानन्तः मन्यमानाः । चकिता भीताः सन्तः । पलायनं धावनम् । कुर्वन्ति, अहो आश्चर्यम् । एवं सति स्यानन्दूरपुरजिगमिषावत्पुरुषालोकन एव पापानां धावने सति । अथ, तत्र स्यानन्दूरपुरे । सन्निवसतां स्थितानाम् । नित्यं, पङ्कजनाभस्य श्रीपद्मनाभस्य

**किं वा हन्त बहूदितेन सदृशो लोकत्रयेष्वप्यहो**
**स्यानन्दूरपुरेण नैव रुचिरो जागर्ति देशः परः ।**
**यत् तत्रस्थजनस्य मोदजलधेः सूक्ष्मः कणोऽप्यालये**
**शक्रस्य त्रिदिवौकसामपि भवेल्लभ्यो न धन्यात्मनाम् ॥**

इति स्यानन्दूरपुरवर्णनप्रबन्धे क्षेत्रवर्णनं नाम
चतुर्थः स्तबकः ।

पूर्णा करुणैव यत् पीयूषम् अमृतं तेन सिक्त आत्मा येषां तादृशानाम् । जनानामिति शेषः । कथं केनप्रकारेण । पापं सम्भवेत्, न कथमपीत्यर्थः । अंहस्सु तस्करत्वारोपणाद् रूपकालङ्कारः । नच, तस्कराः राष्ट्रपालाद् भीत्या तत्समीपं जिगमिषुमेवाध्वगं न बाधन्ते, न त्वीश्वरसमीपं यियासुं, तेषां नास्तिकतयैव चौर्ये प्रवृत्तेः, रूपके आरोप्यमाणस्यैव प्राधान्यादत्रांहस्स्वारोप्यमाणचोराणामेव प्राधान्येन तेषां स्यानन्दूरपुरजिगमिषुजनाद् भीत्या पलायनोक्तिः कथमुपपद्यत इति शङ्क्यम् । स्यानन्दूरपुराधीश्वरे श्रीपद्मनाभे राष्ट्रपालत्वस्यापि सत्त्वात् । अतः सङ्गतमेवांहस्तस्कराणां स्यानन्दूरपुरजिगमिषुजनाद् भीत्या पलायनोक्तिरिति मन्तव्यम् ॥ १६ ॥

उपसंहरति— किंवेति । बहूदितेन बहुना अधिकेन उदितेनोक्तेन । किं वा किंवा स्यादित्यर्थः । किमर्थं वा बहु वदामि संग्रहतया एकवाक्येनैव वक्ष्यामीति भावः । स्यानन्दूरपुरेण, सदृशः तुल्यः । रुचिरः मनोहरः । परः अन्यः । देशः, लोकत्रयेषु अपि लोकानां त्रयं लोकत्रयं तेषां सरूपैकशेषः अनेकब्रह्माण्डवर्तिषु लोकत्रयेष्वित्यर्थः । नैव जागर्ति नास्तीत्यर्थः । यद् यस्माद्धेतोः । तत्रस्थजनस्य स्यानन्दूरपुरस्थितजनस्य । मोदजलधेः सन्तोषसमुद्रस्य । सूक्ष्मः तनुः । कणः लेशः अपि, शक्रस्य इन्द्रस्य । आलये गृहे अमरावत्यामित्यर्थः । धन्यात्मनां सुकृतिनाम् । त्रिदिवौकसां देवानाम् अपि । लभ्यः लब्धुं शक्यः । न भवेत् । तस्माद्धेतोः न जागर्तीति पूर्वेणान्वयः । काव्यलिङ्गमलङ्कारः ॥ १७ ॥

इति श्रीस्यानन्दूरपुरवर्णनप्रबन्धव्याख्यायां
चतुर्थः स्तबकः ।

---

## अथ पञ्चमः स्तबकः ।

अथैतादृशेऽस्मिन् जगत्पवित्रे स्यानन्दूरपुरे निखिलपापजालतूलसमीरणायिता बहवस्तीर्थविशेषा विद्यन्ते ॥ १ ॥

तेष्वपि निखिलजगद्विदितमाहात्म्यानि पद्मवराहमत्स्यशङ्खचक्रधर्माधर्मपादतीर्थानीति विश्रुतिमितानि तीर्थान्यष्टावेव ॥ २ ॥

तेषु किल मुक्तिमयवापीतीर्थायितेषु तीर्थेष्ववगाहमानानां जनानां परमानन्दो ब्रह्मानन्दपदवीमपि परिहसति ॥ ३ ॥

---

एवं सामान्यतः स्यानन्दूरपुरमाहात्म्यं प्रतिपाद्य विशेषतस्तद्वर्णयितुं पञ्चमस्तबकमारभते—अथेति । अथ, जगत्पवित्रे एतादृशे उक्तगुणविशिष्ट इत्यर्थः । अस्मिन् स्यानन्दूरपुरे । निखिलपापजालमयस्य सकलपापसंघस्वरूपस्य तूलस्य समीरणायिताः वायुवदाचरिताः । यथा वायुस्तूलस्य तथा पापजालस्यापनोदकरा इत्यर्थः । बहवः, तीर्थविशेषाः विद्यन्ते ॥ १ ॥

तेष्विति । तेषु तीर्थविशेषेष्वपि मध्ये । निखिलजगत्सु विदितं ज्ञातं माहात्म्यं येषां तादृशानि । पद्मवराहमत्स्यशङ्खचक्रधर्माधर्मपादतीर्थानि इति एतत्संज्ञावन्ति । अष्टावेव, विश्रुतिं प्रसिद्धिम् । इतानि प्राप्तानि । भवन्तीति शेषः ॥ २ ॥

तेष्विति । मुक्तिमयी मोक्षस्वरूपिणी या वापी दीर्घिका तस्याः तीर्थायितेषु सोपानायितेषु । वाप्याद्यवरोहणे यथा सोपानं तथा मोक्षप्राप्तिसौलभ्यसम्पादकेष्वित्यर्थः । तेषु तीर्थेषु । अवगाहमानानां मज्जताम् । जनानां, परमानन्दः, ब्रह्मानन्दपदवीमपि परिहसति । तत्र स्नायतामानन्दो ब्रह्मानन्दादप्युत्कृष्ट इति भावः ॥ ३ ॥

किञ्च,

पारावारलसन्महीरुहदलव्यावल्गदुष्णेतर-
प्रौढामोदसमीरघूर्णितलुठत्कल्लोलडोलायितः ।
सोऽयं तीर्थगणो न कस्य हृदयं मग्नं सुधावारिधौ
कुर्यान्नूनमिहाध्वगस्य विशतः श्रान्तस्य सञ्चारतः ॥ १ ॥

स्थित्वा दूरेऽपि देशे सकृदपि मनुजस्तूच्चरन् हन्त नामा-
न्येतेषां तीर्थराजां सपदि विरहितः पापजालैर्यदि स्यात् ।
किं वाच्यं नित्यमेतेष्वखिलमलहरेष्वेव संस्नायतां वै
लोकानां पूर्वजन्मार्जितसुकृतपरीपाकभाजां तु भाग्यम् ॥

पारावारेति । पारावारयोः परार्वाक्तीरयोः, 'पारावारे परार्वाची तीरे' इत्यमरः, तीरेष्वित्यर्थः लसन्तः शोभमाना ये महीरुहा वृक्षाः तेषां दलेषु पत्रेषु व्यावलगन् चलन्नित्यर्थः उष्णेतरः शीतः प्रौढ उत्कृष्ट आमोदः सौरभ्यं यस्य तादृशश्च, 'आमोदो हर्षगन्धयोरि'त्यमरः, यः समीरो वायुः तेन घूर्णिताः उद्धूता लुठन्तः चलन्तश्च ये कल्लोलाः महातरङ्गाः तैः डोलायितः डोलावदाचरितः चञ्चल इति यावत् । सः अयं, तीर्थगणः तीर्थसमूहः सञ्चारतः सञ्चारेण अध्वगमनेनेत्यर्थः । श्रान्तस्य क्लान्तस्य । विशतः अवगाहनं कुर्वत इत्यर्थः । कस्य अध्वगस्य पान्थस्य । चित्तं, सुधावारिधौ अमृतसमुद्रे परमानन्दसमुद्र इति यावत् । मग्नं न कुर्यात् सर्वेषामपि कुर्यादेवेत्यर्थः ॥ १ ॥

स्थित्वेति । मनुजः मनुष्यः । दूरे देशे, स्थित्वा अपि एतेषां, तीर्थराजां तीर्थश्रेष्ठानाम् । नामानि पद्मप्रभृतीनि । सकृद् एकवारम् अपि । उच्चरन् सन्, सपदि वेगेन । पापजालैः पापसमूहैः । विरहितः वियुक्तः । स्याद् यदि, तदा, पूर्वजन्मनि आर्जितस्य सम्पादितस्य सुकृतस्य यः परीपाकः फलं तद्भाजां तच्छालिनाम् । अखिलमलहरेषु सर्वपापनिवारकेषु । एतेषु तीर्थेष्वेव नित्यं, संस्नायतां सम्यक् स्नानं कुर्वताम् । लोकानां जनानाम् । भाग्यं, वाच्यं वक्तुं शक्यं किं, नैव वाच्यमित्यर्थः । अनिर्वाच्यमिति यावत् ॥ २ ॥

निखिलभुवनभागस्थेषु लोकेषु तीर्थे-
ष्वनुदिनमवगाहादत्र निष्कल्मषेषु ।
असुकृतकृदभावाद् रौरवाद्याः सुघोरा
अपि नरकभुवस्ताः शून्यभावं भजन्ते ॥ ३ ॥

अथ निखिलजगत्तीर्थीकरणचणचरित्रा धुतपाप्मानो मुनिवरेण्या अप्येषु तीर्थेषु सकृदप्यवगाहितुं सकुतुकास्तपश्चरन्ति सुदारुणम् ॥ ४ ॥

अपिच, त्रिभुवनाघपूरविदलनपटुमाहात्म्या सा जह्नुनन्दिनी तीर्थान्येतान्यालोकितुं सकुतुकेव गिरीशशिरः समधिरुह्य सुखेन निवसति ॥ ५ ॥

निखिलेति । निखिलभुवनभागस्थेषु, लोकेषु जनेषु । अत्र एषु तीर्थेषु । अनुदिनं दिनं प्रति । अवगाहाद् निष्कल्मषेषु निष्पापेषु सत्सु । 'पापकिल्बिषकल्मषमि'त्यमरः । असुकृतकृदभावात् पापकृदभावाद् हेतोः । रौरवाद्याः रौरवप्रभृतयः । 'तद्भेदास्तपनावीचिमहारौरवरौरवा' इत्यमरः । सुघोरा अतिभयङ्कराः । नरकभुवो नरकभूमयः अपि । शून्यभावं शून्यत्वं, निर्जनत्वमित्यर्थः । भजन्ते । अत्र सुघोरा अपीत्युक्त्या महापातकिनोऽपि निष्कल्मषा भवन्ति किमुतान्ये पापिन इति भावः ॥ ३ ॥

अथेति । अथ, निखिलानां सर्वेषां जगतां लोकानां तीर्थीकरणे शुद्धीकरणे समर्थं चरित्रं वृत्तान्तो येषां तादृशाः, सच्चरित्रा इति यावत् । धुतपाप्मानः अपगतपापाः । मुनिवरेण्या ऋषिश्रेष्ठाः अपि । एषु तीर्थेषु, सकृद् एकवारम् अपि । अवगाहितुं स्नातुम् । सकुतुकाः कुतूहलसहिताः सन्तः । सुदारुणम् अतिघोरम् । तपः, चरन्ति अनुतिष्ठन्ति ॥ ४ ॥

अपिचेति । अपिच त्रिभुवने लोकत्रये यः अघपूरः पापसञ्चयः तस्य विदलने विनाशने पटु समर्थं माहात्म्यं यस्यास्तादृशी । सा प्रसिद्धा । जह्नुनन्दिनी गङ्गा । एतानि तीर्थानि, आलोकितुं द्रष्टुम् । सकुतुका सकुतूहला । इवेत्युत्प्रेक्षा । गिरीशस्य महादेवस्य शिरः उत्तमाङ्गम् । गिरीणां पर्व-

किञ्च,

पीयूषस्य निवासभूमिरहमित्येवं मदेनाकुलो
दृष्ट्वामून्यमृतप्रदामृतमयान्येतानि तीर्थान्यहो ।
मन्ये शोकसमाकुलो निजयशोहानिं विशङ्क्याधिकं
चन्द्रोऽसौ बत विस्रवन्नवसुधाधारामिषाद् रोदिति ॥ ४ ॥

---

तानामीशः श्रेष्ठ इति व्युत्पत्त्या पर्वतश्रेष्ठ इति च गम्यते । तस्य शिर अधित्यकाम् । समधिरुह्य सम्यगधिरुह्य । सुखेन दर्शनसुखेन सह । निवसति । अत्र दूरस्थितपदार्थावलोकने उपरिभागारोहणस्य सौकर्यसम्पादकत्वात् श्लिष्टगिरीशशब्दप्रयोग इति ध्येयम् ॥ ५ ॥

किञ्च अपि च ।

पीयूषस्येति । पीयूषस्य अमृतस्य । निवासभूमिः निवासस्थानम् । अमृतकिरणत्वादिति भावः । इति एवम् । मदेन गर्वेण । आकुलः असौ चन्द्रः । अमृतप्रदं मोक्षसन्दायकं यदमृतं जलं तन्मयानि तत्स्वरूपाणि । 'मुक्तिः कैवल्यनिर्वाणश्रेयोनिःश्रेयसामृतं', 'पयःकीलालममृतमि'ति चामरः । अमृतप्रदं पीयूषसन्दायकं यदमृतं पीयूषं तत्स्वरूपाणीति च गम्यते । 'पीयूषममृतं सुधे'त्यमरः । अमूनि एतानि पूर्वोक्तान्येतानीत्यर्थः । तीर्थानि दृष्ट्वा, निजस्य आत्मीयस्य यशसः पीयूषनिवासभूमित्वहेतुकायाः कीर्त्तेरित्यर्थः, हानिं क्षयम् । विशङ्क्य, अधिकं शोकेन दुःखेन समाकुलः । अत एव विस्रवन्नवसुधाधारामिषात् क्षरन्नूतनामृतधाराव्याजेन । रोदिति अश्रुमोचनं करोति । बतेत्यनुकम्पायाम् । मन्ये निश्चिनोमि । अहं खलु पीयूषस्य निवासस्थानम् । अतः पीयूषाभिलाषिणः सर्वेऽपि मामेव प्रार्थयेयुरिति निश्चित्य सर्वदापि गर्विष्ठः सः चन्द्रः पीयूषसन्दायकपीयूषस्वरूपाणि एतानि तीर्थानि दृष्ट्वा हन्त मम केवलं पीयूषनिवासस्थानत्वमेव खलु, एतेषां तीर्थानां तु पीयूषस्वरूपत्वमस्ति तदात्मकपीयूषस्य पीयूषप्रदत्वं चास्ति । एवं सति पीयूषाभिलाषिणः सर्वेऽपि पीयूषसन्दायकपीयूषस्वरूपाण्येतानि तीर्थान्येव प्रार्थयेयुः, न तु पीयूषनिवासभूमिं मामिति विचार्य खिन्नहृदयो भूत्वा रोदित्येव, न तु नवसुधाधारां करोतीति मिषपदेनापह्नवव्यक्त्या उत्प्रेक्षाशिरस्ककैतवापह्नुतिरलङ्कारः । अथवा

एवं पापमयामयेन विवशा लोकाश्चरन्तो महीं
दानस्नानतपोमयौषधकुलैश्चाभिन्नरोगाः पुनः ।
स्यानन्दूरपुरस्थतीर्थनिवहेष्वेष्वेकदा सन्निम-
ज्ज्यैते हन्त भवन्ति पापकदनैर्मुक्ताश्च भक्ता हरौ ॥ ५ ॥

अविद्यारूपं तं तिमिरनिचयं चापि दलयन्
प्रफुल्लं कुर्वाणः सुजनहृदयाम्भोरुहकुलम् ।
द्रवीभूतं कुर्वन्नघमयहिमौघं प्रतिदिनं
त्वसौ तीर्थव्रातारुण इह विराजत्यसदृशः ॥ ६ ॥

अमृतप्रदामृतमयानीत्यत्र प्रथमामृतशब्दस्य मोक्ष एवार्थः द्वितीयस्य तु पीयूषम्। तथाच मोक्षसन्दायकपीयूषस्वरूपाणीत्यर्थः। एवञ्च चन्द्रः मृत्यभावसन्दायक-पीयूषस्थानत्वमेव खलु ममास्ति । एतेषां तीर्थानां तु मोक्षसन्दायकपीयूषस्व-रूपत्वमस्ति । एवञ्चैतानि तीर्थानि मत्तोऽप्युत्कृष्टानि । हन्त मम यशो नष्टमे-वेति विचार्य रोदितीत्यर्थः ॥ ४ ॥

एवमिति। पापमयेन पापस्वरूपेण आमयेन रोगेण । 'रोगव्याधिगदा-मयाः' इत्यमरः। विवशाः परवशाः। लोका जनाः। महीं भूमिम्। अत्यन्तसं-योगे द्वितीया । चरन्तः, दानस्नानतपोमयैः दानतीर्थस्नानतपःस्वरूपैः औ-षधकुलैः औषधसमूहैः । अभिन्नरोगाः अविनष्टरोगाः, अशान्तपापरूपरोगाः सन्त इत्यर्थः। पुनः तदनन्तरम्। एवम् एवंभूतेषु पूर्वोक्तप्रकारेष्वित्यर्थः। एषु, स्यानन्दूरपुरस्थेषु तीर्थनिवहेषु तीर्थसमूहेषु । एकदा एकवारमित्यर्थः । सन्निमज्ज्य, एते पूर्वोक्ताः पापरोगिणः । पापकदनैः पापसङ्कटैः। मुक्ताः, हरौ श्रीपद्मनाभे । भक्ताश्च भवन्ति । हन्तेति हर्षे ॥ ५ ॥

अविद्येति। अविद्यारूपम् अज्ञानस्वरूपम्। तिमिरनिचयं चापि अ-न्धकारसमूहमपि । दलयन् विनाशयन् । सुजनानां सज्जनानां हृदयान्येव यानि अम्भोरुहाणि पद्मानि तेषां कुलं समूहम् । प्रफुल्लं प्रकर्षेण विकसितम् । कुर्वाणः, अघमयः पापस्वरूपः यः हिमौघः हिमसञ्चयः तम्। द्रवीभूतं विन-ष्टमित्यर्थः । कुर्वन्, असदृशः निरुपमः । असौ, तीर्थव्रातः तीर्थसमूह एव

मुक्तेर्मार्गः सुलभ्यो घनतरदुरिताम्भोधिपोतो निवास-
स्त्वानन्दस्यामितस्याखिलमलहरणस्तापसन्दोहहारी ।
स्यानन्दूरस्थतीर्थोत्करगुरुमहिमा कस्य चित्ते न तुष्टिं
दद्यादाद्यो मुनीन्द्रैरपि च सुमहितैः कामितः कामहीनैः ॥

स्यानन्दूरपुरेऽत्र तीर्थनिकरेष्वेवं लसत्स्वन्वहं
निश्शेषाघविनाशनैकपटुतामुच्चैर्वहत्सु स्थिराम् ।
पापौघोऽलमलब्धवासभवनो भीतो विषण्णः कृशो
दूरे भ्राम्यति हन्त भूमिवलये सूर्योदये दस्युवत् ॥ ८ ॥

अरुणः सूर्यः । तु । 'मिहिरारुणपूषण' इत्यमरः । इह स्यानन्दूरपुरे । प्रति-दिनं दिनं प्रति । विराजति शोभते ॥ ६ ॥

मुक्तेरिति । मुक्तेः मोक्षस्य । सुलभ्यः सुखेन लब्धुं शक्यः । मार्गः, मुक्तिसाधनमित्यर्थः । घनतरं यद् दुरितं पापं तन्मयस्य अम्भोधेः समुद्रस्य पोतः यानपात्रम् । अमितस्य अनल्पस्य । आनन्दस्य निवासः, अखिलमल-हरणः सकलपापनाशकः । तापसन्दोहहारी दुःखसमूहनिवारकः । 'सन्दोहविसरव्रजा' इत्यमरः । सुमहितैः सुतरां श्रेष्ठैः । कामहीनैः आग्रहलेशरहितैः । मुनीन्द्रैः तापसश्रेष्ठैरपि । कामितः अभिलषितः । आद्यः मुख्य इत्यर्थः । स्यानन्दूरपुरस्थस्य तीर्थोत्करस्य तीर्थसमूहस्य, 'उत्करः कूटमस्त्रियामि'त्यमरः, गुरुः श्रेष्ठः, 'गुरुस्तु गीष्पतौ श्रेष्ठे गुरौ पितरि दुर्भरे' इति हलायुधः, म-हिमा माहात्म्यम् । कस्य चित्ते, तुष्टिं सन्तोषम् । न दद्यात्, सर्वेषामपि दद्या-देवेत्यर्थः ॥ ७ ॥

स्यानन्दूरपुर इति । स्थिरां दृढाम् । निःशेषाणां सर्वेषाम् अघानां पापानां विनाशने एका मुख्या या पटुता सामर्थ्यं ताम् । उच्चैः अतितराम् । वहत्सु सकलपापविनाशनसमर्थेष्वित्यर्थः । तीर्थनिकरेषु तीर्थसमूहेषु । अत्र अस्मिन् स्यानन्दूरपुरे । एवम् अन्वहं प्रतिदिनम् । लसत्सु शोभमानेषु सत्सु । पापौघः पापसमूहः । सूर्योदये, दस्युवत् तस्करवत् । 'दस्युतस्करमोषका' इत्यमरः । अलब्धम् अप्राप्तं वासभवनं वासगृहं यस्य तादृशः । अलम्

तत्रैतादृशतीर्थमण्डिते पयोधिनन्दिनानृत्तरङ्ग इवा-नुपमकान्तिकान्ते तुङ्गतरदृढदृषन्मयप्राकारवलयिते भगवतो मन्दिरवरे प्रतिदिनजायमानासंख्यधरणीसुरान्नदानमयमहा-मन्त्रापरिगणितगुणनिको भगवद्घोषयात्रामयमहोत्सवानुदि-नैधमानानुपमश्रीनिलयः श्रीबलिमण्डपो विलसति ॥ ६ ॥

अधिकम् । भीतः, विषण्णः खिन्नः । कृशः क्षीणश्च सन्, नष्टप्राय इत्यर्थः । भूमिवलये, दूरे दूरदेशे । भ्राम्यति भ्रमणं करोति । हन्तेति हर्षे । उपमालङ्कारः ॥ ८ ॥

तत्रेति । एतादृशैः तीर्थैः मण्डिते अलङ्कृते । पयोधिनन्दिन्याः महा-लक्ष्म्याः नृत्तार्थं यद् रङ्गं स्थलं तस्मिन्निव । 'रङ्गं स्यान्नटनस्थलमि'ति श-ब्दरत्नाकरोक्त्या रङ्गशब्दस्य नटनस्थलार्थकत्वेऽपि अत्र नृत्तशब्दस्य पृथगु-पादानात् स्थलमात्रार्थकत्वं बोध्यम् । विशिष्टवाचकानां पदानां सति पृथग्विशे-षणवाचकपदसमवधाने विशेष्यमात्रपरत्वनियमात् । अनुपमया कान्त्या कान्ते मनोरमे । 'कान्तं मनोरममि'त्यमरः । तुङ्गतरः अत्युन्नतः दृढदृषन्मयः कठिन-शिलास्वरूपश्च यः प्राकारः सालः तेन, 'प्राकारो वरणः साल' इत्यमरः, वलयिते वेष्टिते । 'वेष्टितं स्याद्वलयितमि'त्यमरः । तत्र तस्मिन् भगवतः श्रीपद्मनाभस्य मन्दिरवरे स्यानन्दूरपुरक्षेत्र इत्यर्थः । प्रतिदिनं दिनं प्रति जायमानं क्रियमा-णमित्यर्थः, असंख्येभ्यः संख्यारहितेभ्यः अपरिमितेभ्य इत्यर्थः धरणीसुरेभ्यः ब्राह्मणेभ्यः यत् अन्नदानं तन्मयस्य तत्स्वरूपस्य महामन्त्रस्य उत्तममन्त्रस्य परिगणिता न भवन्तीत्यपरिगणिता अनन्तत्वाद् गणनाविषया इति यावत् या गुणनिकाः गुणना एव गुणनिकाः आवृत्तय इत्यर्थः ताः यत्र तादृशः । प्रतिदिनमसंख्यब्राह्मणभोजनस्थानमित्यर्थः । भगवतः श्रीपद्मनाभस्य घोष-यात्रामयेन घोषयात्रास्वरूपेण महोत्सवेन अनुदिनं दिनं प्रति एधमाना वर्धमाना या श्रीः शोभा, 'शोभार्थेऽपि प्रयुज्यन्ते लक्ष्मीश्रीकान्तिविभ्रमाः' इति हलायुधः, तस्या निलयः स्थानभूत इत्यर्थः । श्रीबलिमण्डपः, विल-सति शोभते ॥ ६ ॥

आलेख्यप्रतिमामिषात् सवनिताः सिद्धाः सुराश्चारणा-
स्तस्य श्रीबलिमण्डपस्य विशदस्तम्भेषु सक्ताः सदा ;
आनन्दाम्बुधिमग्ननेत्रहृदया निष्पन्दरूपाः परं
दृष्ट्वा पङ्कजनाभमात्तकुतुकं जाग्रत्यमी सादरम् ॥ ९ ॥

तत्र चान्तः सुविशालवेदिकाद्वयपरिष्कृतो मुखमण्डपश्चासंख्यधरणीसुरवदननिःसरन्निगमघोषजोघुष्यमाणो विराजते ॥ ७ ॥

तेषामास्यविनिस्सृतानि सुधियां भूमीसुराणां पुनः
श्रुत्वा वेदवचांसि मोदभरिता वैमानिकाः सादरम् ।

---

आलेख्येति । सिद्धाः देवयोनिविशेषाः । 'पिशाचो गुह्यकः सिद्ध' इत्यमरः । सुरा देवाः । चारणाः सवनिताः सदयिताः सन्तः । आलेख्यप्रतिमामिषात् आलेख्यानां चित्राणां प्रतिमानां सालभञ्जिकानां च मिषात् व्याजात् । तस्य श्रीबलिमण्डपस्य, विशदस्तम्भेषु निर्मलस्थूणासु । सदा, सक्ताः, पङ्कजनाभं श्रीपद्मनाभम् । आत्तकुतुकं यथा तथा, दृष्ट्वा परम् अधिकम्, आनन्दाम्बुधौ आनन्दसमुद्रे मग्नानि नेत्राणि हृदयानि च येषां तादृशाः । निष्पन्दरूपा निश्चलस्वरूपाः च सन्तः । अमी देवयोनयः । सादरं यथा तथा जाग्रति जागरूका भवन्ति ॥ ९ ॥

तत्र चेति । तत्र च स्यानन्दूरपुरक्षेत्रे । अन्तः अन्तर्भागे । सुविशालेन सुतरां विस्तृतेन वेदिकाद्वयेन परिष्कृतभूमियुग्मेन पार्श्वयुगलस्थितमण्डपद्वयेनेत्यर्थः । 'वेदिः परिष्कृता भूमिरि'त्यमरः । परिष्कृतः अलङ्कृतः । असंख्यानां धरणीसुराणां ब्राह्मणानां वदनेभ्यः मुखेभ्यः निःसरता निर्गच्छता निगमघोषेण वेदघोषेण जोघुष्यमाणः, मुखमण्डपः च । विराजते शोभते ॥ ७ ॥

तेषामिति । विमानेन चरन्तीति वैमानिकाः । देवव्रजाः देवसमूहाः । सुधियां सताम् । 'सन् सुधीः कोविदो बुध' इत्यमरः । तेषां पूर्वोक्तानाम् । भूमीसुराणां ब्राह्मणानाम् । आस्येभ्यो मुखेभ्यः विनिस्सृतानि निर्गतानि । वेदवचांसि वेदवाक्यानि । पुनः मुहुर्मुहुरपीत्यर्थः । सादरं यथा तथा, श्रुत्वा,

पीयूषेऽपि च निःस्पृहास्तदधिकं माधुर्यमेतेष्विति
ज्ञात्वा विस्मितमानसा दिवि परं तिष्ठन्ति देवव्रजाः ॥१०॥

किञ्च, मुनयोऽपि स्थिरतरसमाधिबलनिमीलितनयनास्त्वेतान्यनिदमुदयानि वचांसि श्रवणपुटेनास्वाद्य क्षणमात्रमस्तनयनसम्मीलनाः सकुतुकं शिरः कम्पयन्ति ॥ ८ ॥

अस्याग्रे भुवनेशितुः खलु हरेः श्रीपद्मनाभप्रभोः
कम्रस्त्वेकशिलामयोऽथ विततो जागर्त्यहो मण्डपः ।
मन्ये नूनमशेषलोकनिवहस्थेभ्यः परं मण्डप-
व्रातेभ्यस्तदिहात्मनः प्रथयितुं चैकत्वमव्याकुलम् ॥ ११ ॥

---

पीयूषे अमृते । निःस्पृहाः निराग्रहाः । तदधिकं तस्मात् पीयूषमाधुर्यादित्यर्थः । अधिकम् उत्कृष्टम् । माधुर्यं मधुरता । एतेषु वेदवाक्येषु । भवतीति शेषः । इति एवम्प्रकारेण । ज्ञात्वा, परम् अधिकम् । विस्मितं सञ्जातविस्मयं मानसं मनो येषां तादृशाः सन्तः । दिवि आकाशे । 'द्योदिवौ द्वे स्त्रियामभ्रमि'त्यमरः । तिष्ठन्ति । वैमानिका देवाः वेदवाक्यश्रवणानन्तरं स्वभोज्यामृतादप्यधिकमाधुर्यमेतेष्वेवेति मत्वा तत्रैव तिष्ठन्ति, न त्वमृतपानादिकं कर्तुं दिवं गच्छन्तीत्यभिप्रायः ॥ १० ॥

किञ्चेति । किञ्च अपिच । स्थिरतरेण अचञ्चलतरेण समाधिबलेन चित्तैकाग्र्यबलेन निमीलितानि नयनानि येषां तादृशाः । मुनय ऋषयोऽपि । अनिदमुदयानि अनादीनि, एतानि वचांसि वेदवाक्यानीत्यर्थः । श्रवणपुटेन श्रोत्रपुटेन । आस्वाद्य निपीय । क्षणमात्रम्, अस्तनयनसम्मीलनाः निर्निमेषाश्च सन्तः । सकुतुकं यथा तथा, शिरः कम्पयन्ति शिरःकम्पनेनाभिनन्दन्तीत्यर्थः ॥ ८ ॥

अस्येति । भुवनेशितुः लोकेश्वरस्य । हरेः, अस्य श्रीपद्मनाभप्रभोः श्रीपद्मनाभ एव प्रभुः स्वामी, तस्य । अग्रे पुरोभागे । विद्यमान इति शेषः । कम्रः कमनीयः । विततो विस्तृतः । मण्डपः, अशेषलोकनिवहस्थेभ्यः सर्वलोकसमूहस्थितेभ्यः । मण्डपव्रातेभ्यः मण्डपसमूहेभ्यः । आत्मनः स्वस्य

सौवर्णो ध्वजराडमुष्य पुरतः संराजमानो रुचा
यः स्वस्याखिललोकजालमनिशं विद्योतयन् भासते ।
सोऽयं चोन्नतिघट्टिताभ्रपटलो विश्वैकहृद्यः परं
खद्योतस्य ददाति भूरिमहसो राशेस्तु खद्योतताम् ॥ १२॥
तं दृष्ट्वा ध्वजपुङ्गवं दिवि सुराः सिद्धाश्च देवर्षयः
स्थित्वा विस्मितमानसाः खलु रुचो राशिस्तु कोऽसाविति ।
नासान्यस्तकराङ्गुलीकिसलयाः सन्तोषपर्याकुला
यूयं पश्यत पश्यतेति च मिथो जल्पन्ति ते बृन्दशः ॥

परम् अधिकं तद् अनिर्वाच्यम् । एकत्वं प्रधानत्वम् । इह अस्मिन् लोके । प्रथयितुं प्रख्यापयितुम् । नूनं, एकशिलामयः सन् एकया अद्वितीयया मुख्ययेति च शिलया निर्मित इत्यर्थः । अव्याकुलं निःशङ्कं यथा तथा, जागर्ति जागरूकास्तिष्ठति । अहो आश्चर्यम् इति मन्ये । उत्प्रेक्षालङ्कारः ॥ ११ ॥

**सौवर्ण इति** । अमुष्य श्रीपद्मनाभस्य । पुरतः पुरोभागे । संराजमानः शोभमानः । सौवर्णः स्वर्णमयः । ध्वजराट् ध्वजश्रेष्ठः । स्वस्य रुचा स्वकान्त्या अखिललोकजालम् अखिललोकसमूहम् । विद्योतयन् प्रकाशयन् सन् । भासते शोभते । उन्नत्या घट्टितम् अभ्रपटलं मेघसमूहो येन तादृशः । परम् अधिकम् । विश्वेषां सर्वेषाम् एकः प्रधानो हृद्यः अभीष्टः 'अभीष्टमीप्सितं हृद्य'मित्यमरः । सः अयं ध्वजराडित्यर्थः । भूरिमहसः अधिकतेजसः जातावेकवचनम् अधिकतेजसामित्यर्थः । राशेः समूहभूतस्य । खद्योतस्य सूर्यस्य । 'खद्योतो लोकबान्धव' इत्यमरः। खद्योततां खद्योतत्वं खद्योतो नाम रात्रौ स्फुलिङ्गवत् किञ्चिद्दीप्तिविशिष्टः कश्चन कीटविशेषः । 'खद्योतो ज्योतिरिङ्गण' इत्यमरः । ददाति, सूर्यस्यापि खद्योतप्रायत्वप्रापणचण इत्यर्थः, ततोऽप्यधिकतेजोविशिष्ट इति यावत् ॥ १२ ॥

**तमिति** । सुराः सिद्धाः देवर्षयश्च, तं ध्वजपुङ्गवं ध्वजश्रेष्ठम् । दृष्ट्वा, विस्मितमानसाः, दिवि आकाशे । वृन्दशः संघीभूय । स्थित्वा, नासायां न्यस्तं कराङ्गुलीकिसलयं यैः । एतत्तु विस्मयाधिक्यात् । सन्तोषेण पर्याकुलाः परवशाश्च सन्तः असौ रुचस्तेजसः जात्येकवचनं, तेजसामित्यर्थः । राशिः समूहः ।

किञ्चायं ध्वजनायकः पिशङ्ग्या स्वकान्त्या निखिलमपि जगत् पिशङ्गीकुर्वन् जातरूपेषु घटपटादिसकलपदार्थेषु जातरूपतां प्रकटीकरोति ॥ ९ ॥

तस्याग्रेऽतिविशालपक्षयुगलादुद्भूतकर्णामृत-
प्रायात्युत्तमसामवेदविलसद्घोषेण चेतोहृता ।
लक्ष्मीनाथमहर्निशं निरुपमानन्दं प्रशंसन् हरिं
भक्त्या बद्धकराञ्जलिर्विजयते श्रीमान् विहङ्गाधिपः ॥१४॥

क इति, यूयं पश्यत पश्यत इति ते, मिथः अन्योन्यं 'मिथोऽन्योन्यरहस्ययो-रि'त्यमरः । जल्पन्ति वदन्ति ॥ १३ ॥

किञ्चेति । किञ्च, अयं ध्वजनायकः ध्वजश्रेष्ठः । पिशङ्ग्या पिङ्गलया 'पिङ्गपिशङ्गौ कद्रुपिङ्गलावि'त्यमरः । स्वकान्त्या आत्मीयशोभया । निखिलं समस्तमपि जगत् लोकम् । पिशङ्गीकुर्वन् पिङ्गलं कुर्वन् । जातं रूपं स्वरूपं येषां तादृशेषु घटपटादिसकलपदार्थेषु । जातरूपतां सुवर्णत्वं 'चामीकरं जातरूपमि'त्यमरः । प्रकटीकरोति प्रकाशयति । स्वर्णमयस्यैतस्य प्रभया सकलपदार्थेष्वपि स्वर्णसवर्णेषु सत्सु पदार्थाः सर्वेऽपि स्वर्णमया एव वा इति सर्वेषामपि शङ्कामावहतीति यावत् ॥ ९ ॥

तस्येति । श्रीमान् विहङ्गाधिपः पक्षिश्रेष्ठः गरुडः । भक्त्या उपलक्षणतृतीयैषा । भक्त्योपलक्षित इत्यर्थः । बद्धकराञ्जलिः बद्धकरसम्पुटः । चेतोहृता मनोहारिणा । अतिविशालाद् अतिविस्तृतात् पक्षयुगलात् गरुद्युग्मात् । उद्भूतः सञ्जातः कर्णयोः श्रोत्रयोः अमृतप्रायः अमृततुल्य इत्यर्थः अत्युत्तमस्य 'वेदानां सामवेदोऽस्मी'ति भगवदुक्त्या वेदेषु मध्ये उत्तमस्येत्यर्थः सामवेदस्य विलसन् शोभमानश्च यः घोषः तेन । लक्ष्मीनाथं हरिं श्रीपद्मनाभं । निरुपमानन्दं यथा तथा । अहर्निशम् अहोरात्रम् । प्रशंसन् स्तुवन् सन् । तस्य ध्वजश्रेष्ठस्य । अग्रे ऊर्ध्वभागे । विजयते सर्वोत्कर्षेण वर्तते । गरुत्मतः पक्षाभ्यां सामघोषोत्पत्तिश्च पुराणप्रसिद्धा । तदुक्तम् 'अशुभमपनयन्तं पक्षजैः सामघोषैरि'ति ॥ १४ ॥

१. 'कान्तम' इति मूलग्रन्थे पाठः.

अथास्य केतनस्तम्भोपरि स्थितस्य विनतातनूजस्य व्यावल्गनोदितातिशिशिरसमीरपोता पत्रयुगली भगवतः सह दयितया विहरमाणस्य श्रीपद्मनाभस्य व्यजनायते ॥ १० ॥

पुनरस्य भगवतः श्रीपद्मनाभस्य पुरतः सुविशालतमो गोपुरविशेषोऽसंख्यतरोन्नतविविधशिखरनिकायसंस्पृष्टविरिञ्चवसतिर्विनिर्मितचित्ररूपसमस्तवृन्दारकवृन्दविराजितो मध्यभागविलसदतिविशालद्वारवरसंयुतः समस्तजनमानसं सविस्मयं करोति ॥ ११ ॥

---

अथेति । अथ, केतनस्तम्भोपरि ध्वजाग्रभागे । स्थितस्य, विनतातनूजस्य गरुडस्य । विनतेति गरुडमातुर्नाम । व्यावल्गनेन चलनेन उदित उत्पन्नः यः समीरपोतः मन्दवायुरित्यर्थः 'पोतः पाकोऽर्भको डिम्भ' इत्यमरः । स यस्यास्तादृशी पत्रयुगली पक्षयुग्मम् । 'गरुत्पक्षश्छदः पत्र'मित्यमरः । दयितया भार्यया महालक्ष्म्या सह । विहरमाणस्य क्रीडतः । भगवतः श्रीपद्मनाभस्य व्यजनायते तालवृन्तवदाचरति, 'व्यजनं तालवृन्तकमि'त्यमरः । भगवतः श्रमापनोदं करोतीति भावः ॥ १० ॥

पुनरिति । पुनः भगवतः अस्य श्रीपद्मनाभस्य । पुरतः पुरोभागे । पुरोभागाधिकरणक इत्यर्थः । सुविशालतमः अतीव विस्तृतः । असंख्यतराणि निरवधिकानि उन्नतानि विविधानि नानाप्रकाराणि च यानि शिखराणि शृङ्गाणि तेषां निकायेन समूहेन 'स्यान्निकायः पुञ्जराशी' इत्यमरः संस्पृष्टा विरिञ्चवसतिः सत्यलोको येन तादृशः । विनिर्मिताः विरचिताः चित्ररूपाः चित्रस्वरूपाश्च ये वृन्दारका देवाः तेषां वृन्देन समूहेन विराजितः शोभितः । मध्यभागे विलसद्भिः अतिविशालैः द्वारवरैः द्वारश्रेष्ठैः संयुतो युक्तः । गोपुरविशेषः, समस्तजनानां सकलजनानां मानसं मनः । सविस्मयं विस्मययुक्तं । करोति ॥ ११ ॥

स्यानन्दूरपुरेश्वरालयगतं तत्तादृशं गोपुरं
हन्ताधस्तु रसातलावधि गतं चोर्ध्वे विरिञ्चालये ।
मन्ये द्योतयितुं महत्त्वमखिलं तत्र स्थितानां निजं
सत्यं विस्मयशालिनां निरुपमश्रीभाजनं तद् ध्रुवम् ॥ १५ ॥

अथ सर्वेऽपि महीधरा ह्यस्य गोपुरस्यौन्नत्यं निरीक्ष्य चकिता इवात्मनिस्सरन्निर्झरमिषादुच्छ्रितस्यास्य पाद्यं वितरन्ति ॥ १२ ॥

तत्र कुलशेखरमण्डप इति विश्रुतो मण्डपप्रवेकः सोऽयमात्मनि स्थितानेकाश्ममयस्तम्भविनिर्मितचित्ररूपशि-

---

स्यानन्दूरपुरेति । स्यानन्दूरपुरेश्वरस्य श्रीपद्मनाभस्य आलये गतं स्थितमित्यर्थः । तत्तादृशम् अनिर्वचनीयमित्यर्थः । निरुपमायाः श्रियः शोभायाः भाजनं स्थानमित्यर्थः । तद् गोपुरं बहिर्द्वारं । 'बहिर्द्वारं तु गोपुरमि'त्यमरः । अधः अधोभागे । रसातलावधि पातालपर्यन्तम् । ऊर्ध्वम् ऊर्ध्वभागे । विरिञ्चालये सत्यलोके च । गतं भातीति शेषः । हन्तेति हर्षे । अतिशयोक्तिविशेषः । तावत्पर्यन्तगमनमुत्प्रेक्षते मन्ये इति । विस्मयशालिनां विस्मययुक्तानाम् । तत्र सत्यलोके पाताले च । स्थितानां वसताम् । जनानामिति शेषः । निजम् आत्मीयम् । ध्रुवं स्थिरम् । अखिलं, महत्त्वं महत्परिमाणं माहात्म्यं च द्योतयितुं प्रकाशयितुम् । इति, मन्ये निश्चिनोमि । सत्यम् ॥ १५ ॥

अथेति । अथ सर्वे, महीधराः पर्वताः अपि हि । अस्य गोपुरस्य औन्नत्यं निरीक्ष्य, चकिताः भीता इव । आत्मनः स्वस्मात् निस्सरन् निःष्यन्दमानः यो निर्झरः प्रवाहः तस्य मिषाद् व्याजेन । उच्छ्रितस्य उन्नतस्य । अस्य गोपुरस्य । पाद्यं पादावनेजनवारि । 'पाद्यं पादाय वारिणी'त्यमरः । वितरन्ति ददति । पर्वतेभ्यो निःष्यन्दमाना निर्झरास्तु न निर्झराः, किन्तु तैरेतद्गोपुराय दत्तपादावनेजनजलानीति कैतवापह्नुतिरलङ्कारः, मिषपदेन निह्नवस्य द्योतनात् ॥ १२ ॥

तत्रेति । तत्र स्यानन्दूरपुरे । कुलशेखरमण्डप इति, विश्रुतः प्रसिद्धः ।

ल्पविशेषेण विश्वकर्मणः कारुतामदं दूरीकरोति ॥ १३ ॥

पुनरिह भगवतो वासुदेवस्य यत् कान्तिव्रजनिकेतनीभूतं व्रज इति विश्रुतं मन्दिरं, तदपि समस्तजनमानसं सन्तोषाम्बुधौ मज्जयति ॥ १४ ॥

तत्रापि पुरतो विराजमानो राजतो ध्वजस्तम्भस्तस्य भगवतो वासुदेवस्य कीर्तेर्निश्चलत्वमुच्छ्रायवत्त्वं च निजाकृत्यैव प्रकटीकरोति ॥ १५ ॥

---

कुलशेखरमण्डप इति नाम्ना लोके प्रसिद्ध इत्यर्थः । मण्डपप्रवेकः मण्डपोत्तमः । 'प्रवेकानुत्तमोत्तमा' इत्यमरः । भवतीति शेषः । सः अनिर्वचनीय इत्यर्थः । अयं मण्डपप्रवेकः । आत्मनि स्वस्मिन् । स्थिता अनेके बहवः अश्ममयाः शिलास्वरूपाश्च ये स्तम्भाः स्थूणाः तेषु विनिर्मितेन विशेषतो रचितेन चित्ररूपेण प्रतिबिम्बस्वरूपेण शिल्पविशेषेण । विश्वकर्मणः देवत्वष्टुः । कारुतया कारुत्वेन यः मदः गर्वः तम् । चित्रादिनिर्माणे अनन्यसाधारणकौशलवत्त्वेन योऽभिमानस्तमिति यावत् । दूरीकरोति विनाशयतीत्यर्थः । कुलशेखरमण्डपस्तु विश्वकर्मणाप्यशक्यनिर्माणबहुतरशिल्पविशिष्टस्तम्भसमूहसहितो भवतीति भावः ॥ १३ ॥

पुनरिति । पुनः, इह स्यानन्दूरपुरे । भगवतः, वासुदेवस्य श्रीकृष्णस्य कान्तिव्रजस्य कान्तिसमूहस्य निकेतनीभूतं गृहभूतं, स्थानभूतमित्यर्थः । व्रज इति विश्रुतं व्रजनामकत्वेन प्रसिद्धमित्यर्थः । यद्, मन्दिरं गृहम् । भवतीति शेषः । तद् मन्दिरमपि । समस्तजनानां मानसं मनः । सन्तोषाम्बुधौ सन्तोषसमुद्रे । मज्जयति ॥ १४ ॥

तत्रेति । तत्रापि व्रजनामकमन्दिरेऽपि । पुरतः पुरोभागे । विराजमानः शोभमानः । राजतः रजतात्मकः । 'दुर्वर्णं रजतं रूप्यमि'त्यमरः । ध्वजस्तम्भः भगवतः तस्य, वासुदेवस्य कृष्णस्य । कीर्तेः यशसः । निश्चलत्वम् अचञ्चलत्वं, स्थिरतामित्यर्थः । उच्छ्रायवत्त्वमौन्नत्यं च । निजया आकृत्या आकारे-

अथैतादृशेऽत्र समस्तसज्जनहृदयारविन्दापादितानुपमानन्दभारमयकीरोद्यानीभूते प्रतिनवमाङ्गल्यशताकरायितेऽस्य भगवतः श्रीपद्मनाभस्य मन्दिरवरे प्रत्यब्दं द्विवारं तन्तन्यमानो महोत्सवो न कस्य हृदयमानन्दरूपसुधातरङ्गेषु विलोलितं वितनुते ॥ १६ ॥

कुम्भैरुत्तमशातकुम्भरचितैरम्भोजनाभो हरिः
सम्भृताधिककौतुकं किल महारम्भात् पुरैवामितैः ।
जम्भोन्मर्दकदेशिकोपमकलायुक्तेन भूमीसुरो-
त्तंसेनायमथो लसत्यनुपमप्रीत्याभिषिक्तस्तदा ॥ १६ ॥

---

णैव, निश्चलोच्छ्रिताकारेणैवेत्यर्थः । प्रकटीकरोति प्रकाशयति । राजतत्वादतिधवलः निश्चलोच्छ्रिताकारश्च ध्वजः अहमिव मत्स्वामिनः कीर्तिरपीति सर्वानपि स्पष्टतया बोधयतीत्यर्थः ॥ १५ ॥

अथोत्सववर्णनमारभते--- अथेत्यादिना । अथ एतादृशे उक्तगुणविशिष्टे । समस्तानां सज्जनानां हृदयारविन्देषु चित्तपद्मेषु आपादितः सम्पादितश्चानुपमश्च यः आनन्दभारस्तन्मयाः ये कीराः शुकाः, 'कीरशुकौ समौ' इत्यमरः, तेषामुद्यानीभूते उद्यानायिते । प्रतिनवस्य पुनःपुनर्नूतनस्य माङ्गल्यशतस्य माङ्गल्यसमूहस्य आकरायिते उत्पत्तिस्थानभूते । भगवतः अस्य श्रीपद्मनाभस्य, अत्रास्मिन् । मन्दिरे स्यानन्दूरपुर इत्यर्थः । प्रत्यब्दं प्रतिसंवत्सरम् । 'संवत्सरो वत्सरोऽब्द' इत्यमरः । द्विवारं, तन्तन्यमानः अतिशयेन क्रियमाणः । महोत्सवः कस्य, हृदयं चित्तम् । आनन्दरूपायाः सुधाया अमृतस्य तरङ्गेषु वीचिषु विलोलितं विलुठितम् । न, वितनुते करोति । सर्वस्यापि वितनुत एवेत्यर्थः ॥ १६ ॥

कुम्भैरिति । अथो हरिः अयम् अम्भोजनाभः श्रीपद्मनाभः । महारम्भाद् उत्सवारम्भात् । 'मह उद्धव उत्सव' इत्यमरः । पुरैव पूर्वमेव । जम्भोन्मर्दकः इन्द्रस्तस्य देशिको गुरुः । 'गुरौ देश्ये च देशिक' इत्यमरः ।

अथ तदानीं तस्य भगवतश्चरणसरसीरुहनिःसृतं तीर्थंतीर्थं तत्तोयं संभृतसुकृतपुञ्जा महान्तः स्वशिरसा संलालयन्ति ॥ १७ ॥

यस्यामुष्य हरेः पदाब्जगलितां जह्नोः सुतां सादरं
श्रीमान् बालशशाङ्कमौलिरनिशं मूर्ध्ना दधात्यात्मनः ।
यत्रैतादृशमस्य तीर्थमखिलैर्लभ्यं जनैरश्रमात्
तस्मिन्नत्र पुरे कथं निवसतौ योगस्त्वपुण्यात्मनाम् ॥१७॥

बृहस्पतिरित्यर्थः । देशिकपदेन देशिककला लक्ष्यते । तेन उपमा सादृश्यं यस्याः तादृश्या कलया विद्यया युक्तेन विशिष्टेन । भूमीसुरोत्तंसेन ब्राह्मणश्रेष्ठेन । उत्तमेन शातकुम्भेन स्वर्णेन रचितैः निर्मितैः । अमितैः अनल्पैः । कुम्भैः सम्भृताधिककौतुकम् अभिषिक्तः सन् तदा अनुपमप्रीत्या उपलक्षितः । लसति शोभते किल ॥ १६ ॥

अथेति । अथ, तदानीम् अभिषेककाले । सम्भृतः सम्पादितः सुकृतपुञ्जः पुण्यसमूहो यैस्तादृशाः । महान्तः सज्जनाः । तस्य, भगवतः श्रीपद्मनाभस्य । चरणसरसीरुहाभ्यां पादारविन्दाभ्यां निस्सृतं निःष्यन्दितम् । तीर्थंतीर्थं तीर्थानामपि शुद्धिकरमित्यर्थः । तत् पद्मनाभे अभिषिक्तं तोयं जलम् । स्वशिरसा आत्मीयोत्तमाङ्गेन । संलालयन्ति सम्यक् लालयन्ति दधतीत्यर्थः ॥

यस्येति । श्रीमान् , बालशशाङ्कमौलिः श्रीपरमेश्वरः । यस्य अमुष्य, हरेः श्रीपद्मनाभस्य । पदाब्जाभ्यां पादपद्माभ्यां गलितां निस्सृताम्, उत्पन्नामित्यर्थः । जह्नोः सुतां गङ्गाम् । आत्मनः स्वस्य । मूर्ध्ना उत्तमाङ्गेन । दधाति वहति । अस्य श्रीपद्मनाभस्य । एतादृशं परमेश्वरेणापि शिरसा सन्धार्यमाणम् । अथवा मूर्धगलितमित्यर्थः । तीर्थं, यत्र यस्मिन् पुरे । अखिलैः समस्तैः । जनैः । अश्रमात् निर्यत्नम् । लभ्यं लब्धुं शक्यम् । भवतीति शेषः । तस्मिन् तादृशे । अत्र पुरे स्यानन्दूरपुरे इत्यर्थः । निवसतौ, अपुण्यात्मनाम् असुकृतिनामित्यर्थः । योग उपपत्तिः, सङ्गतिरित्यर्थः । कथं केन प्रकारेण । सम्भवतीति शेषः । न कथमपीत्यर्थः । सुकृतिनामेवात्र निवासः सम्भवतीति भावः ॥ १७ ॥

तदनूत्सवारम्भदिने समुपागते पूर्वमुक्तेन महीसुर-कुलमकुटमणिना निरुपमेयशोभावती पताका समन्त्रतन्त्रं ध्वजाग्रभागाध्यारोपिता यदा भवति, तदा निखिलमपि जगत् सकौतुकं विराजते॥ १८ ॥

सा च शिशिरतरसमीरसम्पर्कचलिताग्रभागा निखिलभुवनभागस्थितं लोकसमूहमस्योत्सवस्य विलोकनार्थमायातुमङ्गुलीसंज्ञयाह्वयतीव॥ १९॥

तावद्भूमिसुराः स्वबालवनितायुक्ताः परं बृन्दशो
ह्यायान्तीह धृतातपत्रनिकराः स्कन्धे वहन्तो भरान्।

---

तदन्विति। तदनु अभिषेकाद्यनन्तरम्। उत्सवारम्भदिने उत्सवारम्भदिवसे। समुपागते प्राप्ते सति। पूर्वम् उक्तेन 'जम्भोन्मर्दके'त्यादिना पूर्वमभिषेककर्तृत्वेनोक्तेनेत्यर्थः। महीसुराणां ब्राह्मणानां कुलस्य समूहस्य मकुटमणिना चूडारत्नेन, ब्राह्मणोत्तमेनेत्यर्थः। निरुपमेयशोभावती अनुपमेयशोभासहिता। पताका ध्वजपटः। 'पताका वैजयन्ती'त्यमरः। समन्त्रतन्त्रं मन्त्रैस्तन्त्रैश्च सहितं यथा तथा। यदा यस्मिन् काले। ध्वजस्याग्रभागे उपरिभागे। अध्यारोपिता भवति, तदा तस्मिन् काले। निखिलं समस्तमपि। जगद् लोकः। सकुतुकं सकुतूहलं यथा तथा। विराजते शोभते॥ १८॥

सा चेति। शिशिरतरस्य शीतलतरस्य समीरस्य वायोः सम्पर्केण सम्बन्धेन चलितः कम्पितः अग्रभागः प्रान्तभागो यस्याः तादृशी। सा च पताका च। निखिलभुवनभागस्थितं, लोकसमूहं जनसमूहम्। अस्योत्सवस्य। विलोकनार्थं दर्शनार्थम्। आयातुम् आगन्तुम्। अङ्गुलीसंज्ञया अङ्गुलीभिः या संज्ञा अर्थसूचनं तयेत्यर्थः। 'संज्ञा स्याच्चेतना नामहस्ताद्यैश्चार्थसूचनमि'त्यमरः। आह्वयति इवेत्युत्प्रेक्षा॥ १९॥

तावदिति। तावद् उत्सवकाले। भूमिसुराः ब्राह्मणाः। स्वैः आत्मीयैः बालैः शिशुभिः स्वाभिर्वनिताभिः भार्याभिश्च युक्ताः सहिताः। धृतः आतपत्रनिकरः छत्रसमूहो यैस्तादृशाः। स्कन्धे भुजशिरसि। भरान् सम्भारान्।

पृच्छन्तश्च पथि स्थितानयि ! कियद्दूरं त्वितो ब्रूत नः
स्यानन्दूरपुरं महोत्सवमहो श्रुत्वागताः स्मो वयम ॥

अपिचामी महीसुराः स्यानन्दूरपुरगमनानन्तरभावि-परमानन्दकथाप्रसङ्गेन मार्गक्लममपि शिथिलीकुर्वन्ति ॥ २० ॥

किञ्चैतेषां धरणिरेण्वधिकसंख्यानां भूसुरवरेण्यानां कथने फणिनायकोऽप्यपटुरेव भवति ॥ २१ ॥

एवमागच्छत्सु बहुषु महीसुरप्रवरेषु दृष्टचरस्यानन्दूरपुरैः कैश्चिन्मध्येमार्गमुदीरितवृत्तान्तास्त्वदृष्टचरस्यानन्दूरपुरा

---

वहन्तः, अयि हे जना ! इत्यर्थः । स्यानन्दूरपुरम् । इतः अस्मात्प्रदेशात् । कियद्दूरं कियद्दूरदेशे स्थितम् । भवतीति शेषः । इति नः, ब्रूत वदत । किमर्थं स्यानन्दूरपुरप्रच्छनमित्याकाङ्क्षायामाह — वयं महोत्सवं श्रुत्वा स्यानन्दूरपुरे महोत्सव आरब्ध इति श्रुत्वेत्यर्थः । आगताः प्राप्ताः । स्मः भवामः । इति, पथि मार्गे । स्थितान् जनानिति शेषः । पृच्छन्तश्च सन्तः परं, बृन्दशः सङ्घशः । इह स्यानन्दूरपुरे । आयान्ति आगच्छन्ति । अहो आश्चर्यम् ॥ १८ ॥

अपिचेति । अपिच किञ्च । अमी महीसुराः ब्राह्मणाः । स्यानन्दूरपुरगमनस्य स्यानन्दूरपुरप्राप्तेः अनन्तरं भावी आगमिष्यन् परम उत्कृष्टश्च य आनन्दः तस्य कथायाः प्रसङ्गेन । मार्गक्लमं मार्गश्रममपि । शिथिलीकुर्वन्ति निवारयन्ति ॥ २० ॥

किञ्चेति । किञ्च, धरणिरेणोः भूमिधूल्या अधिका संख्या येषां तादृशानाम् । तेषां, भूसुरवरेण्यानाम् ब्राह्मणश्रेष्ठानाम् । कथने गणने । फणिनायकः अनन्तः अपि । अपटुरसमर्थ एव । भवति ॥ २१ ॥

एवमिति । एवं बहुषु, महीसुरप्रवरेषु ब्राह्मणश्रेष्ठेषु । आगच्छत्सु आगमनं कुर्वत्सु सत्सु । दृष्टचरं पूर्वं दृष्टं स्यानन्दूरपुरं यैः तादृशैः । कैश्चित् ब्राह्मणैरिति शेषः । मध्येमार्गं मार्गमध्ये । उदीरितः उक्तः वृत्तान्तः उदन्तः

द्विगुणीभूतदिदृक्षारसभरितमानसा यदा स्वयं स्यानन्दूरमायान्ति, तदा श्रुतपूर्वां सम्पदं कोटिगुणां निरीक्ष्य विस्मयानन्दनिश्चला भवन्ति ॥ २२ ॥

एते भूसुरतल्लजाः पथि बहुश्रान्ताश्च सञ्चारतः
क्षुत्तृड्घर्मसमाकुलाश्च बहवो यावज्जगन्मोहनम् ।
स्यानन्दूरपुरं विशन्ति बत ते सन्नष्टतापाः क्षणा-
ज्जायन्ते किल माधवस्य नियतं शीलं द्विजप्रीणनम् ॥

अर्थात् स्यानन्दूरपुरसम्बन्धिवृत्तान्तः यैस्तादृशाः । अदृष्टचरं पूर्वमदृष्टं स्यानन्दूरपुरं यैस्तादृशाः । द्विगुणीभूता या दिदृक्षा द्रष्टुमिच्छा तया यो रसः रागः, त्वरितं गन्तुमिच्छेति यावत् । तेन भरितं पूरितं मानसं येषां तादृशाः सन्तः । यदा यस्मिन् काले । स्वयमात्मनैव । स्यानन्दूरपुरम्, आयान्ति आगच्छन्ति । तदा तस्मिन् काले । श्रुतपूर्वां पूर्वं श्रुताम् । सम्पदं समृद्धिम् । कोटिगुणां कोटिगुणितां सतीम् । निरीक्ष्य दृष्ट्वा । विस्मयेनानन्देन च निश्चलाः । भवन्ति ॥ २२ ॥

एत इति । पथि मार्गे । सञ्चारतः सञ्चारेण । बहु अधिकम् । श्रान्ताः श्रमं प्राप्ताः । च । क्षुधा पिपासया, 'उदन्या तु पिपासा तृडि'त्यमरः, घर्मेण स्वेदेन च समाकुलाः व्याकुलाः । बहवः एते, भूसुरतल्लजाः ब्राह्मणश्रेष्ठाः । 'मतल्लिका मचर्चिका प्रकाण्डमुद्धतल्लजौ । प्रशस्तवाचकान्यमूनी'त्यमरः । जगतां लोकानां मोहनं मनोहरम् । स्यानन्दूरपुरं, यावत् यदा । विशन्ति प्रविशन्ति । तावत्, ते ब्राह्मणाः क्षणाद् वेगेन, प्रवेशक्षण एवेत्यर्थः । सन्नष्टतापाः विनष्टसकलदुःखाः । जायन्ते भवन्ति । बत आश्चर्यम् । माधवस्य श्रीपद्मनाभस्य । वसन्तस्येति च । 'वैशाखे माधव' इत्यमरः । शीलं स्वभावः । 'शीलं स्वभावे सद्वृत्ते' इत्यमरः । द्विजानां ब्राह्मणानां पक्षिणां च प्रीणनं सन्तोषकरम् । नियतं निश्चितं किल । यथा पक्षिणां प्रीणनं वसन्तस्य स्वाभाविकं, तथा ब्राह्मणसन्तोषणं श्रीपद्मनाभस्य स्वाभाविकमेवेत्यर्थः ॥ १९ ॥

अथ समागतास्त्वेते महीसुरवरेण्याः परमात्मनः श्रीपद्मनाभस्य मन्दिरे प्रतिदिनं विविधखाद्यपेयचूष्यलेह्यसहितेन तस्यैव भगवतः कीर्त्तिवितानानुकारिणा परमौदनेन निरवधि तृप्ताः प्रतिनवपीयूषास्वादनदृप्तदिविषद्वदनाम्भोरुहाणीर्ष्याकलुषीकृतानि कलयन्ति ॥ २३ ॥

अथास्मिन्नेव महोत्सवे चिरकालाभ्यस्तनिजकलापाण्डित्यसफलीकरणसमयप्रतीक्षैर्विविधनटनर्तकैन्द्रजालिकाद्यैरप्येतत्स्यानन्दूरपुरं निबिडीभूतं भवति ॥ २४ ॥

---

अथेति । समागताः प्राप्ताः । ते, महीसुरवरेण्या ब्राह्मणश्रेष्ठाः तु । अथ आगमनानन्तरम् । परमात्मनः श्रीपद्मनाभस्य मन्दिरे स्यानन्दूरपुर इत्यर्थः । प्रतिदिनं, विविधाः नानाप्रकाराः ये खाद्याः खादितुं योग्याः पेयाः पातुं योग्याः चूष्याः चूषितुं योग्याः लेह्याः लेढुं योग्याश्च भोज्यपदार्थाः इत्यर्थः, तैः सहितेन युक्तेन । तस्यैव, भगवतः श्रीपद्मनाभस्येत्यर्थः । कीर्त्तिवितानानुकारिणा कीर्त्तिविस्तारसदृशेनेत्यर्थः । धावल्येन सादृश्योक्तिः । परमौदनेन उत्कृष्टान्नेन । निरवधि अधिकम् । तृप्ताः तृप्तिमन्तः सन्तः । प्रतिनवस्य अभिनवस्य पीयूषस्य अमृतस्य आस्वादनेन पानेन दृप्तानां गर्वितानां दिविषदां देवानां वदनाम्भोरुहाणि मुखारविन्दानि । ईर्ष्यया असूयया कलुषीकृतानि मलिनानि । कलयन्ति रचयन्तीत्यर्थः । अमृताशनेन गर्विष्ठा देवास्तु अमृतादप्यधिकस्वादिमवदेतादृशपरमौदनभोजिनामेतेषां ब्राह्मणानामवलोकने सति अतीवासूयान्धा भवन्तीति भावः ॥ २३ ॥

अथेति । अथैतत् स्यानन्दूरपुरम् । अस्मिन्नेव महोत्सवे । चिरकालेन बहुकालेन अभ्यस्ता निजा स्वीया तत्तत्क्रियाभ्याभिजनसम्बन्धिनीत्यर्थः, या कला विद्या तस्यां यत् पाण्डित्यं सामर्थ्यं तस्य सफलीकरणस्य यः समयः कालस्तं प्रतीक्षन्ते प्रतिपालयन्तीति तादृशैः । विविधा नानाविधा ये नटा अभिनयप्रधानाः, नर्तकाः तालप्रधानाः, ऐन्द्रजालिका इन्द्रजालप्रयोक्तारश्च ते आदयः प्रथमा येषां तादृशैः जनैरिति शेषः । अपि न केवलं ब्राह्मणैः,

किञ्च विविधकलापारङ्गतास्ते चाहमहमिकया निजाभ्यस्तां विद्यां यथाशक्ति प्रकटयन्तः समस्तजनान् विस्मापयन्ति ॥ २५ ॥

खड्गोत्क्षेपणपण्डिताः कतिचन प्रासप्रहारोद्यताः
केचित् पट्टसमुद्गरैः प्रकटितस्वाभ्यस्तविद्याः परे ।
केचिद् वज्रसमानविग्रहयुता मल्लप्रवीरा मिथो
* युध्यन्तो विहरन्ति विश्वजनताश्चर्यं दिशन्तस्तदा ॥ २० ॥

---

किन्तु नटनर्तकादिविविधजनैरपीत्यर्थः । निबिडीभूतं निरन्तरीभूतमित्यर्थः । भवति ॥ २४ ॥

किञ्चेति । किञ्च, विविधा नानाप्रकारा याः कलाः विद्याः तासां पारं गताः, तास्वतीव समर्था इत्यर्थः । ते नटनर्तकादिजनाः च । अहमहमिकया परस्पराहङ्कारेण । 'अहमहमिका तु सा स्यात् परस्परं यो भवेदहङ्कारः' इत्यमरः । निजैः स्वैः स्वैः अभ्यस्तां विद्याम् । यथाशक्ति शक्त्यनुगुणम् । प्रकटयन्तः प्रकाशयन्तः सन्तः । समस्तजनान् सकलजनान् । विस्मापयन्ति विस्मितान् कुर्वन्ति ॥ २५ ॥

तानेव वर्णयति—खड्गेति । कतिचन केचित् । खड्गानामुत्क्षेपणे ऊर्ध्वं क्षेपणे पण्डिताः समर्थाः । केचित्, प्रासैः कुन्तैः, 'प्रासस्तु कुन्त' इत्यमरः, यः प्रहारः प्रहरणं तत्रोद्यताः उद्युक्ताः । परे अन्ये । पट्टसैः पट्टसनामकैः मुद्गरैः मुद्गरनामकैश्च, आयुधविशेषैरित्यर्थः । प्रकटिताः प्रकाशिताः स्वैरभ्यस्ताश्च या विद्यास्ताः यैस्तादृशाः । केचिद्, वज्रसमाना वज्रतुल्याः ये विग्रहाः शरीराणि, 'शरीरं वर्ष्म विग्रहः' इत्यमरः, तैर्युताः सहिताः । मिथः अन्योन्यम् । युध्यन्तो युद्धं कुर्वन्तश्च । मल्लप्रवीराश्च, विश्वजनतायाः अशेषजनसमूहस्य आनन्दं सन्तोषम् । दिशन्तः वितरन्तः सन्तः । तदा उत्सवकाले । विहरन्ति क्रीडन्ति ॥ २० ॥

---

* इह परस्मैपदमात्मनपदं नित्यत्वात् ।

अथ परमनिपुणाः केचनास्मिन् स्यानन्दूरपुरे समागतानां गुणलसितस्थितिरेवोचितेति प्रकटीकर्तुमिव गुणमारुह्य विविधाः कलाः कुर्वन्ति ॥ २६ ॥

केचिदथ गीतरूपं हरिकथापीयूषं गायन्तो नृत्यन्तश्च पश्यतां नयनश्रवसी युगपत् परमानन्दमग्ने रचयन्ति ॥ २७ ॥

अथ केचन निजवाक्पटुताविनिर्जितवाचस्पतयो गद्यपद्यपरिमिश्रितरुचिरसाहित्यसङ्गतहरिचरितवर्णनसन्तोषितसमस्तजनमानसाश्च विलसन्ति ॥ २८ ॥

अथेति । अथ, परमनिपुणाः अतिसमर्थाः । केचन केचित् । जना इति शेषः । अस्मिन् स्यानन्दूरपुरे, समागतानां प्राप्तानाम् । जनानामिति शेषः । गुणैर्दयादाक्षिण्यादिभिः लसिता शोभिता स्थितिः एव । उचिता युक्ता । इति एवम्प्रकारेण । प्रकटीकर्तुं स्पष्टयितुमिवेत्युत्प्रेक्षा । गुणं रज्जुम् । आरुह्य, विविधा नानाप्रकाराः । कलाः कुर्वन्ति ॥ २६ ॥

केचिदिति । अथ केचित्, जना इति शेषः । गीतरूपं गीतस्वरूपम् । गीतात्मकतया निर्मितमित्यर्थः । यत् हरिकथापीयूषं पीयूषसदृशी हरिकथा तत् । गायन्तः, नृत्यन्तः नृत्तं कुर्वन्तश्च । पश्यतां द्रष्टॄणाम् । नयनश्रवसी चक्षुःसहिते श्रवणे । 'श्रुतिः स्त्री श्रवणं श्रव' इत्यमरः । युगपद् एककालावच्छेदेनैव । परमानन्दनिमग्ने, रचयन्ति कुर्वन्ति । गानस्य श्रवणानन्दकारित्वाद् नृत्तस्य नयनानन्दकारित्वाद् गानविशिष्टनृत्ते सति एककालावच्छेदेनैव श्रवणनयनानन्दो भविष्यतीति भावः ॥ २७ ॥

अथेति । अथ, निजा आत्मीया या वाक्पटुता वाक्सामर्थ्यं तया विनिर्जितः विशेषेण निर्जितः वाचस्पतिः बृहस्पतिर्यैस्तादृशाः । केचन, जना इति शेषः । गद्यैः पद्यैः श्लोकैश्च परिमिश्रितं सहितं रुचिरं च यत् साहित्यं कवनं तत्र संगतस्य हरिचरितस्य वर्णनेन सन्तोषितानि समस्तजनमानसानि सकलजनहृदयानि यैस्तादृशाः सन्तः । विलसन्ति शोभन्ते ॥ २८ ॥

पुनरस्य भगवतः श्रीपद्मनाभस्याग्रे मसृणतरदरवरशोभाहरणधुरीणगलनालविनिस्सृतसुमनोहरारवविनिन्दितकलकण्ठाः परममङ्गलमृदङ्गमुरलीकोमलनिनादानुसृतश्रुतिलयसमन्वितमनोहरतरगानानुगुणमधुरतरकटाक्षविविधतरचेष्टाभेदैर्निखिलयुवजनहृदयारविन्देष्वनङ्गरसमयमहीरुहबीजं किरन्त्यो नृत्तसमयमुखरीभूतवरनूपुरनिःस्वननिर्जितमरालपरिवृढरुता वारमुख्या विबुधालयेऽपि दुर्लभं किमपि कुतूहलं निखिलजनानामापादयन्ति, न चैतदिह चित्रमासां निजोरुकान्त्यैव रम्भामन्दाक्षसन्दायिनीनाम् ॥ २९ ॥

---

पुनरिति । पुनः भगवतः अस्य श्रीपद्मनाभस्य, अग्रे पुरोभागे मसृणतरस्य अतीव स्निग्धस्य दरवरस्य शङ्खश्रेष्ठस्य या शोभा तस्या हरणे धुरीणं धुरन्धरं समर्थमिति यावत् , यद् गलनालं तस्माद् विनिस्सृतः निर्गतः उत्पन्न इत्यर्थः सुमनोहरः सुतरां मनोहरश्च यः आरवः शब्दः तेन विनिन्दिताः विशेषेण निन्दिताः कलकण्ठाः कोकिला याभिस्तादृश्यः । परममङ्गलः अतीव मङ्गलकरः यः मृदङ्गस्य मृदङ्गनामकवाद्यविशेषस्य मुरल्याः वेणोश्च कोमलनिनादः मनोहरशब्दः तेनानुसृता सङ्गता या श्रुतिः स्वरारम्भको नादविशेषः लयस्तालः, 'तालः कालक्रियामानं लयः साम्यमि'त्यमरः, ताभ्यां समन्वितं सहितं मनोहरतरम् अतीव मनोहरं च यद् गानं तस्यानुगुणाः समानगुणा मधुरतराः अतीव मधुराश्च याः कटाक्षस्यापाङ्गदर्शनस्य विविधाश्चेष्टा नानाप्रकारव्यापाराः तासां भेदैः । निखिलानां सर्वेषां युवजनानां यौवनयुक्तपुरुषाणां हृदयारविन्देषु चित्तपद्मेषु । अनङ्गरसः कामरस एव यो महीरुहो वृक्षः तस्य बीजं किरन्त्यः प्रक्षिपन्त्यः । नृत्तसमये मुखरीभूताः शब्दायमाना वराः श्रेष्ठाश्च ये नूपुराः मञ्जीराः । 'मञ्जीरो नूपुरोऽस्त्रियां' 'हंसकः पादकटक' इति चामरः । तेषां निःस्वनेन शब्देन निर्जितं मरालपरिवृढानां हंसश्रेष्ठानां रुतं वाशितं याभिस्तादृश्यः । 'तिरश्चां वाशितं रुतमि'त्यमरः । वारमुख्या जनसत्कृता वेश्याः । 'वारस्त्री गणिका वेश्या रूपाजीवाश्च

एवमेतासां गणिकानां नर्तनदिदृक्षया समागतेषु बहुषु जनेषु केचन गानरसिका गानचातुर्येण केचनाभिनयकौशलेन केचित् सौन्दर्यमात्रेणैव प्रीणिता भवन्ति ॥ ३० ॥

एवमस्मिन् निखिलजगदानन्दोत्पादकोत्सवे विविधकलासञ्जातपाटवेषु जनेषु तत्र तत्र पृथक् स्वविद्यां प्रक-

---

सा जनैः । सत्कृता वारमुख्या स्यादि'त्यमरः । निखिलजनानां समस्तजनानाम् । विबुधालये स्वर्गेऽपि । दुर्लभं दुःखेन लब्धुं शक्यम् । किमपि अनिर्वचनीयमित्यर्थः । कुतूहलं कौतुकम् । आपादयन्ति सम्पादयन्ति । विबुधालयेऽपि दुर्लभमित्युक्तं तदेव समर्थयति — नचेति । निजोरुकान्त्या निजया आत्मीयया उर्व्या महत्या च कान्त्या सौन्दर्येण । निजस्य ऊरोः कान्त्या शोभयेति च । एव । रम्भा नामाप्सरसः तस्याः कदल्या इति च, 'रम्भा मोचांशुमत्फले'त्यमरः, मन्दाक्षसन्दायिनीनाम् लज्जासन्दायिनीनाम् । 'मन्दाक्षं ह्रीस्त्रपा व्रीळे'त्यमरः । आसां वारमुख्यानाम् एतद् विबुधालयदुर्लभकुतूहलसम्पादनम् । इह स्यानन्दूरपुरे । नच चित्रं नैवाश्चर्यमित्यर्थः । एतासां वारमुख्यानां रम्भासौन्दर्यादप्यधिकसौन्दर्यवत्त्वाद् रम्भानिलयभूतस्वर्गदुर्लभकुतूहलसम्पादनं युक्तिसिद्धमेवेति भावः ॥ २९ ॥

**एवमिति** । एवम्, एतासाम् उक्तानाम् । गणिकानां वेश्यानाम्, 'वारस्त्री गणिका वेश्ये'त्यमरः । नर्तनस्य नृत्तस्य दिदृक्षया द्रष्टुमिच्छया । समागतेषु प्राप्तेषु । बहुषु अनेकेषु । जनेषु मध्ये गानरसिका गानरसवन्तः । केचन, गाने यत् चातुर्यं दक्षता तेन । 'दक्षे तु चतुरपेशलपटव' इत्यमरः । गानसामर्थ्येनेत्यर्थः । तासामिति शेषः । केचन अभिनये नाट्ये यत् कौशलं कुशलता तेन सामर्थ्येनेत्यर्थः । केचित् सौन्दर्यमात्रेण केवलं सौन्दर्येण । प्रीणिताः सन्तोषिताः भवन्ति, ताभिरिति शेषः ॥ ३० ॥

**एवमिति** । अस्मिन्, निखिलानां सर्वेषां जगतां लोकानाम् आनन्दोत्पादके आनन्दसम्पादके उत्सवे । विविधासु कलासु विद्यासु सञ्जातं यत् पाटवं पटुता सामर्थ्यमित्यर्थः तद् येषां तादृशेषु । जनेषु पृथक्, तत्र तत्र तत्तत्प्रदेश इत्यर्थः । स्वविद्याम् आत्मीयविद्याम् । प्रकटयत्सु प्रकाशयत्सु सत्सु ।

टयत्सु सत्सु समागतसमस्तजनसमूहः किमत्रैव स्थित इति शङ्कां सर्वे समावहन्ति ॥ ३१ ॥

वाचा किं बहुविस्तरेण भुवने मोदावहो देहिनां
स्यानन्दूरपुरेश्वरोत्सववरादन्यो न चैवोत्सवः ।
विप्रादिश्वपचावधीह सकलैरानन्दसान्द्रा स्थिति-
र्यल्लभ्यात्र समागतैः करुणया लोकत्रयाधीशितुः ॥

इति स्यानन्दूरपुरवर्णनप्रबन्धे तीर्थादिमाहात्म्यं नाम
पञ्चमः स्तबकः ।

---

समागतसमस्तजनसमूहः प्राप्तसकलजनसमूहः । अत्रैव अस्मिन् प्रदेश एव । स्थितः किम् । इति एवम्प्रकारिकाम् । शङ्कां संशयम् । सर्वे तत्र तत्र स्थिताः समस्तजनाः । समावहन्ति सन्दधति । सर्वत्रापि विद्याप्रकटनस्थाने अतीव जनसम्मर्दो भवतीति भावः ॥ ३१ ॥

उपसंहरति—वाचेति । वाचा वचसा । बहुविस्तरेण बहुना विस्तारेण, वाग्भिरुत्सवप्रपञ्चनेनेत्यर्थः । अथवा बहुविस्तरेण उपलक्षणतृतीयेयम्, अधिकविस्तारेणोपलक्षितयेत्यर्थः । वाचा किं किं स्यात् । न किमपीत्यर्थः । वचनविस्तरेण किं वा स्यात् । बहुधा वर्णनेऽपि उत्सवगुणातिशयकथनं साकल्येन न सम्भवति । अतः संक्षेपेणैव वक्ष्यामीति भावः । देहिनां जनानाम् । मोदावहः सन्तोषसम्पादकः । स्यानन्दूरपुरेश्वरोत्सववरात्, अन्यः अपरः उत्सवः, भुवने लोके, न चैव नास्त्येव । इह अस्मिन्नुत्सवे । अत्र स्यानन्दूरपुरे समागतैः प्राप्तैः । विप्रादिश्वपचावधि ब्राह्मणात् प्रभृति श्वपचपर्यन्तैरित्यर्थः । सकलैः समस्तैः, जनैरिति शेषः । लोकत्रयाधीशितुः त्रैलोक्यनाथस्य श्रीपद्मनाभस्य । करुणया दयया हेतुना, आनन्दसान्द्रा आनन्दघना । 'घनं निरन्तरं सान्द्रमि'त्यमरः । स्थितिः निवासः । लभ्या लब्धुं शक्या । भवतीति शेषः । यद् यस्माद्धेतोः । तत् स्यानन्दूरपुरेश्वरोत्सववराद् अन्यः उत्सवः भुवने न चैवेति पूर्वेणान्वयः । काव्यलिङ्गमलङ्कारः ॥ ३२ ॥

इति श्रीस्यानन्दूरपुरवर्णनप्रबन्धव्याख्यायां
पञ्चमः स्तबकः ।

## अथ षष्ठः स्तबकः ।

अथास्मिन्निह दिवसदशकस्थायिनि महोत्सवे निखिलजगदेकनायको भगवान् श्रीपद्मनाभः प्रतिदिनं निजघोषयात्रया निखिलजनानानन्दयन्नप्युत्सवे तु विशेषेण वक्ष्यमाणविविधवाहनवरोह्यमानः प्रतिदिनं पूर्वमुक्तं श्रीबलिमण्डपं सफलीकुरुते ॥ १ ॥

यानं सिंहासनाख्ये नरहरिवसुदेवात्मजाश्लिष्टपार्श्वः
सानन्दं वन्दिबृन्देरितजयविजयीत्यादिमाङ्गल्यवाक्यः ।

---

एवं सामान्यत उत्सवं वर्णयित्वा अनन्तरं स्तबकचतुष्टयेन प्रथमदिवसादिक्रमेण उत्सवान्तर्गतदिवसदशकमपि प्रत्येकं विस्तरतो वर्णयितुमुपक्रमते — अथेति । अथ, इह स्यानन्दूरपुरे । दिवसदशकस्थायिनि दशदिनपरिमित इत्यर्थः । अस्मिन् उक्तगुणविशिष्टे । महोत्सवे, निखिलानां जगतां लोकानाम् एकः प्रधानो नायकः नाथः । भगवान् श्रीपद्मनाभः, प्रतिदिनं दिनं प्रति । निजया आत्मीयया घोषयात्रया । निखिलजनान्, आनन्दयन् सन्तोषयन्नपि । उत्सवे, सति सप्तमी चेयम् । उत्सवे सति त्वित्यर्थः । वक्ष्यमाणैः 'याने सिंहासनाख्य' इत्यादिना वक्ष्यमाणैरित्यर्थः । विविधैर्नानाप्रकारैः वाहनवरैः वाहनश्रेष्ठैः उह्यमानः धार्यमाणः । विशेषेण अधिकतया । निखिलजनानानन्दयन् सन्निति शेषः । पूर्वमुक्तं 'प्रतिदिनजायमाने'त्यादिना पूर्ववर्णितमित्यर्थः । श्रीबलिमण्डपं, प्रतिदिनं दिनं प्रति । दशस्वपि दिनेष्वित्यर्थः । सफलीकुरुते निजघोषयात्रया सफलं करोतीत्यर्थः । भगवद्घोषयात्रयैव खलु तस्य साफल्यम् ॥ १ ॥

विविधवाहनवरोह्यमान इत्युक्तमेव प्रपञ्चयति — यान इति । विश्वेषां सर्वेषां लोकानां जनानाम् आर्तिं पीडां हरतीति विश्वलोकार्तिहारी । असौ, स्यानन्दूरपुरेश्वरः श्रीपद्मनाभः । महस्य उत्सवस्य । 'मह उद्धव उत्सव' इत्यमरः । आदिमे प्रथमे । वासरे दिवसे हि । नानाप्रकाराभिः भूषाभिः भूषणैः अम्बरैर्वस्त्रैश्च अलङ्कृता विमला निर्मला च तनुः शरीरं यस्य

नानाभूषावरालङ्कृतविमलतनुर्विश्वलोकार्तिहारी
स्यानन्दूरेश्वरोऽसौ प्रविशति हि महस्यादिमे वासरे हि ॥

अथ तदानीमशेषधरणीभागसमागतानामानन्दामृतपयोनिधिमग्नानां बद्धाञ्जलीनां धरणीसुरादिजनानां दन्तुरतराः कराः सारसिनीविलसितकोरकितसरोरुहाणीव विराजन्ते ॥ २ ॥

अथानन्तपुण्यपुञ्जगोचरीभूतहृषीकेशवन्दनसंक्षालितकलुषनिकरा ह्येते जय जय पद्मनाभ! पद्मविलोचन! परमपूरुष! परमात्मन्! पाहीति भद्रतरविविधस्तुतिमुखरमुखा भवन्ति ॥ ३ ॥

तादृशः सन् । सिंहासनाख्ये सिंहासननामके । याने वाहने । अधिरुह्येति शेषः । नरहरिणा नरसिंहमूर्तिना भगवता वसुदेवात्मजेन श्रीकृष्णेन चाश्लिष्टौ सङ्गतौ पार्श्वौ दक्षिणवामभागौ यस्य तादृशः । पार्श्वयुगले स्वावताराभ्यां श्रीकृष्णनरहरिभ्यामनुसृत इति यावत् । सानन्दं यथा तथा, वन्दिवृन्देन स्तुतिपाठकसमूहेन ईरितानि उक्तानि जयविजयीत्यादीनि माङ्गल्यवाक्यानि माङ्गल्ययुक्तानि वाक्यानि यस्य तादृशः सन् । प्रविशति हि घोषयात्रार्थं श्रीबलिमण्डपे प्रविशतीत्यर्थः ॥ १ ॥

अथेति । अथ, तदानीं घोषयात्राकाले । अशेषेभ्यः समस्तेभ्यः धरणीभागेभ्यः भूभागेभ्यः समागतानां प्राप्तानाम् । तदानीं भगवद्घोषयात्राकाले आनन्दामृतपयोनिधौ सन्तोषमयामृतसमुद्रे मग्नानाम् । बद्धाञ्जलीनां भगवन्तमभिमुखीकृत्य बद्धकरसम्पुटानामित्यर्थः । धरणीसुरादीनां ब्राह्मणप्रभृतीनां जनानाम् । दन्तुरतराः अतीव दन्तुराः । 'दन्तुरं तून्नतानतमि'त्यमरः । कराः, सारसिन्यां पद्मिन्यां विलसितानि शोभितानि कोरकितानि मुकुलितानि च यानि सरोरुहाणि पद्मानि तानीव । विराजन्ते शोभन्ते ॥ २ ॥

अथेति । अथ, अनन्तानां पुण्यानां पुञ्जाद्धेतोः गोचरीभूतस्य विषयीभूतस्य हृषीकेशस्य श्रीपद्मनाभस्य वन्दनेन संक्षालितः सम्यक् क्षालितो

अस्य श्रीरमणस्य देहविलसद्भूषावरेण्योल्लस-
न्माणिक्योत्तमवासवोपललसद्वैडूर्यजालोदिता ।
कान्तिर्व्याप्य जगत्त्रयीं सुरजनानानन्दयन्ती दिवि
प्राप्तानुत्सववीक्षणैकमनसस्तावल्लसत्युज्ज्वला ॥ २ ॥

अथास्य भगवतः पङ्कजनाभस्य देहविलसद्भूषणवरेण्यसङ्गतानल्परुचिवासरेशशतभासुरवरोपलजालोदितकान्तिस्वरूपा मत्तकाशिनी चतुर्दशस्वपि भुवनभागेषु समं चरन्ती

---

विनाशित इत्यर्थः कलुषनिकरः पापसमूहो येषां तादृशाः । एते पूर्वोक्तधरणीसुरादिजनाः, हि । पद्मविलोचन ! परमपूरुष ! परमात्मन् ! पद्मनाभ ! त्वं, जय सर्वोत्कर्षेण वर्तस्व पाहि रक्ष । अस्मानिति शेषः । इति एवंप्रकारिका भद्रतरा अतीव मङ्गलकारिणी विविधा नानाप्रकारिका च या स्तुतिः तया मुखराणि शब्दायमानानि मुखानि येषां तादृशाः । भवन्ति ॥ १ ॥

अस्येति । श्रीरमणस्य लक्ष्मीपतेः । अस्य श्रीपद्मनाभस्य । देहे शरीरे विलसन्ति शोभमानानि यानि भूषणवरेण्यानि भूषणश्रेष्ठानि तेषु उल्लसतां देदीप्यमानानां माणिक्यानां पद्मरागरत्नानाम् उत्तमानां श्रेष्ठानां वासवोपलानाम् इन्द्रनीलरत्नानां लसतां शोभमानानां वैडूर्याणां वैडूर्यनामकरत्नविशेषाणां च जालात् समूहाद् उदिता उत्पन्ना । उज्ज्वला दीप्रा । उत्सववीक्षणे उत्सवालोकने एकत्रैव मनो येषां तादृशान् । दिवि आकाशे । 'द्योदिवौ द्वे स्त्रियामभ्रमि'त्यमरः । प्राप्तान् आगतान् । सुरजनान् देवजनान् । आनन्दयन्ती सन्तोषयन्ती । कान्तिः प्रभा । जगत्त्रयीं त्रैलोक्यम् । व्याप्य, उल्लसति शोभते ॥ २ ॥

अथेति । अथ, भगवतः अस्य, पङ्कजनाभस्य श्रीपद्मनाभस्य । देहे शरीरे विलसन्ति शोभमानानि यानि भूषणवरेण्यानि भूषणश्रेष्ठानि तेषु सङ्गतानां स्थितानाम् अनल्परुचीनाम् अधिककान्तीनां वासरेशशतवत् सूर्यसमूहवत् भासुराणां दीप्राणां वराणां श्रेष्ठानां च उपलानां रत्नानां जालात् समूहाद् उदिता उत्पन्ना या कान्तिः तत्स्वरूपा । मत्तकाशिनी वरारोहा । 'वरारोहा मत्तकाशिनी'त्यमरः । चतुर्दशसु चतुर्दशसंख्याकेषु । भुवनभागेषु

तत्रस्थितानेकजननयनोत्पलरचितपरिपूजना विदग्धतरकवीश्वरकुलवाक्सुधाकलिताभिषेका सदा विराजते ॥ ४ ॥

किञ्चासञ्जातशशिदिवाकरतेजःसम्पर्केषु लोकालोकशिखरिप्रदेशेषु च वितता तत्रस्थिततिमिरसमूहं विनाशयन्ती तत्रत्यजननिकरैश्च सविस्मयं वीक्षिता विलसति ॥ ५ ॥

किञ्च,

नाम्ना साम्यं दधानौ हरिरिति विदितेनाब्जनाभेन चैतौ
जेतुं कान्तिस्तदीयोत्तममणिविलसद्भूषणोत्था तदानीम् ।

---

लोकप्रदेशेषु अपि । समं युगपत् चरन्ती, तत्र चतुर्दशभुवनभागेषु । स्थिताः वर्तमानाः अनेके बहवश्च ये जनास्तेषां नयनैः नेत्रैरेव उत्पलैः कुवलयैः विरचितं कृतं परिपूजनं यस्यास्तादृशी । विदग्धतराः अतीव विदग्धाः अतिसमर्था इत्यर्थः । ये कवीश्वराः कविश्रेष्ठा इत्यर्थः । तेषां वाग्भिरेव सुधाभिः अमृतैः कलितः कृतः अभिषेकः यस्यास्तादृशी च सती । सदा, विराजते शोभते ॥ ४ ॥

किञ्चेति । किञ्च, असञ्जातः अनुद्भूतः शशिदिवाकरयोः सोमसूर्ययोः तेजस्सम्पर्कः तेजस्सम्बन्धो येषु तादृशेषु । लोकालोकशिखरिप्रदेशेषु लोकालोकशिखरिनामकपर्वतप्रदेशेषु च । 'महीध्रशिखरिक्ष्माभृदि'त्यमरः । वितता विस्तृता, व्याप्तेत्यर्थः । तत्र लोकालोकशिखरिप्रदेशेषु स्थितं तिमिरसमूहम् अन्धकारसमूहम् । विनाशयन्ती, तत्रत्यैः तत्र वर्तमानैः लोकालोकस्थितैरित्यर्थः । जननिकरैः जनसमूहैः । सविस्मयं साद्भुतं यथा तथा । वीक्षिता अवलोकिता च सती । विलसति शोभते ॥ ५ ॥

किञ्च अपि च ।

नाम्नेति । तदानीं घोषयात्राकाले । तदीयानि पद्मनाभसम्बन्धीनि उत्तमैः श्रेष्ठैः मणिभिः रत्नैः विलसन्ति देदीप्यमानानि च यानि भूषणानि तेभ्यः उत्था उत्थिता । विश्वलोकैः सकलजनैः । वर्णिता च, हरिरिति, विदितेन ज्ञातेन । हरिरूपसंज्ञावत्त्वेन जगत्प्रसिद्धेनेत्यर्थः । अब्जनाभेन श्रीपद्मनाभेन च । नाम्ना, साम्यं तौल्यम् । दधानौ, तयोरपि

उद्युक्ता सोमसूर्यावपि बहुमहसौ तौ तु वीतप्रकाशौ
कृत्वा मन्ये लसत्यन्वहमिह भुवने वर्णिता विश्वलोकैः ॥
बद्धायाः प्रसवस्रजो निपतिताः पूर्वोक्तसिंहासन-
स्योर्ध्वे सूनगणा लसन्ति पदयोरस्येह लक्ष्मीपतेः ।

हरिनामकत्वादिति भावः । 'यमानिलेन्द्रचन्द्रार्कविष्णुसिंहांशुवाजिषु । शुकाहिकपिभेकेषु हरिरि'त्यमरः । बहुमहसौ अतितेजस्विनौ एतौ सोमसूर्यौ अपि । जेतुम् उद्युक्ता कान्तिः, तौ सोमसूर्यौ तु । वीतप्रकाशौ नष्टतेजसौ । कृत्वा अन्वहं भुवने, लसति शोभते । इति मन्ये । फलोत्प्रेक्षेयम् ॥ ३ ॥

बद्धाया इति । इह अस्यां घोषयात्रायाम् । सूनगणाः पुष्पसमूहाः । 'स्त्रियः सुमनसः पुष्पं प्रसूनं कुसुमं सुममि'त्यमरः । उत्तरत्र सुमनसामित्युक्त्या सूनगणानां सुमनस्त्वमाक्षेपात् प्रतीयते । अत्र सुमनस्त्वं पुष्पत्वम् । तथाच सुमनोगणा इत्यर्थः । पूर्वोक्तसिंहासनस्य, ऊर्ध्वम् उपरिभागे । बद्धायाः अलङ्कारत्वेन विन्यस्ताया इत्यर्थः । प्रसवस्रजः पुष्पमालायाः सकाशात् । अस्य, लक्ष्मीपतेः श्रीपद्मनाभस्य । पदयोः चरणयोः निपतिताः सन्तो, लसन्ति शोभन्ते । उपरिनिबद्धप्रसूनानां भगवत्पादनिपतनमुत्प्रेक्षते— मन्ये इति । सुमनसां सुधियां देवानामिति च । सदा नित्यम् । एतत्पदं श्रीपद्मनाभपादारविन्दमेव आलम्ब आश्रयो येषां तेषां भावः एतत्पदालम्बतातां[1] । अत्र अस्मिन् पुण्यस्थले आगत्य भूरिकुतुकाद् हेतोः सन्तिष्ठतां संगम्य सङ्घीभूय तिष्ठतां कौतुकाधिक्येनापरिमितसम्बाधतया घोषयात्रामेवावलोक्य तिष्ठतामिति यावत् । मुग्धानां मूढानामपि । बुद्धिमतां बोधनं विनापि सुमनसामेतत्पदालम्बनताज्ञानं सम्भवतीत्यपिशब्दार्थः । द्योतयितुं प्रकाशयितुम् । इति मन्ये निश्चिनोमि । सुमनोगणास्तु सुमनसामपि भगवत्पादारविन्दमेवावलम्बनमिति अत्र घोषयात्रायामागतेभ्यो[2] मूढेभ्योऽपि द्योतयितुमेवोपरिनिबद्धपुष्पमालायाः सकाशाद् भगवत्पादनिपतिता भवन्तीति मन्य इति भावः[3] । फलोत्प्रेक्षालङ्कारः । यत्तु आगत्य सन्तिष्ठतामित्यत्र 'समवप्रविभ्यः

१. 'तां । भूरिकुतुकात् ल्यब्लोपे पञ्चमी । भूरिकुतुकं संप्राप्येत्यर्थः । अत्र अस्मिन् पुण्यस्थले । आगत्य संतिष्ठतां सम्यक् स्थितिं कुर्वतां । मुग्धानां मूढानामपि । द्यो', २. 'भ्योऽपि सुमनसामेव भगवत्पादावलम्बतेति द्यो', ३. 'वः ॥ ४ ॥ थाचेति' क. पाठः.

मन्ये द्योतयितुं सदा सुमनसामेतत्पदालम्बतां
मुग्धानामपि चात्र भूरिकुतुकादागत्य संतिष्ठताम् ॥ ४ ॥

तथाचाम्लानपरमसुरभिलतुलसीकुन्दमालतीचम्पक-स्रजा श्रीमदम्भोरुहनाभकण्ठप्रकाण्डधार्यमाणया भुवनत्रयमपि सुरभीभूतं जायते ॥ ६ ॥

---

स्थः' इति सूत्रेण समाद्युपसृष्टतिष्ठतेरात्मनेपदविधानात् सन्तिष्ठमानानामित्येव स्यात् । सन्तिष्ठतामिति परस्मैपदप्रयोगस्त्वसाधुरिति वाच्यार्थकक्ष्याशब्दार्थानुशासनमात्रविदः केचिदाहुः । तदेवासाधु । 'समवप्रविभ्यः स्थ' इत्यनेन स्थाधातुनिरूपितोपसर्गत्वविशिष्टसमाद्युपसृष्टस्थाधातोरेवात्मनेपदविधानात् । उक्तरीत्या प्रकृते समः गमधातुनिरूपितोपसर्गतया स्थाधातोः समुपसृष्टत्वाभावेनात्मनेपदप्रसक्तेरेवाभावात् । 'यत्क्रियायुक्ताः प्रादयस्तं प्रत्येव गत्युपसर्गसंज्ञा' इति न्यायात् । न चात्र गमधातुश्रवणाभावात् कथं समस्तदुपसर्गत्वमिति वाच्यम् । गमधात्वर्थविवक्षामात्रेण तदुपसर्गत्वसिद्धेः । अन्यथा 'एरनेकाचोऽसंयोगपूर्वस्ये'त्यनेन यण्विधिप्रकरणे 'गतिकारकेतरपूर्वपदस्य यण् नेष्यते' इत्यनेन गतिकारकपूर्वपदस्यैव यण्विधानाद् दुर्धिय इत्यत्र गतिपूर्वकत्वाद् यणा भवितव्यमित्याक्षिप्य दुःस्थिता धीर्येषामिति विग्रहं कृत्वा पूर्वोक्तन्यायबलेन दुरुपसर्गस्य वैवक्षिकस्थाधातुनिरूपितगतित्वमेव, न तु श्रुतध्यायतिनिरूपितगतित्वमित्यभिप्रायं च प्रकटय्य समाधानाभिधानं ग्रन्थकृतामसङ्गतं स्यात् । किञ्च समः स्थाधातुनिरूपितोपसर्गत्वविवक्षया सन्तिष्ठमानानामित्यात्मनेपदप्रयोगेऽर्थान्तरप्रतीतिरपि स्यात् । तन्मा भूदिति मनसि निधाय तस्य धात्वन्तरोपसर्गत्वमेव प्रतीयेत, न तु स्थाधातुनिरूपितोपसर्गत्वमित्यभिप्रायेणैव परस्मैपदं प्रयुक्तवन्तो महाकवय इत्यस्यावश्यं वक्तव्यत्वेन एतादृशार्थानवगाहितया सन्तिष्ठमानानामित्यात्मनेपदं स्यादिति केषाञ्चिदाक्षेपोऽत्यन्तमसङ्गत एव ॥ ४ ॥

**तथाचेति** । तथाच अन्यो विशेषोऽप्यस्तीति भावः । श्रीमता प्रशस्तशोभावता अम्भोरुहनाभस्य श्रीपद्मनाभस्य कण्ठप्रकाण्डेन प्रशस्तकण्ठेन, 'प्रकाण्डमुद्धतल्लजा'वित्यमरः, धार्यमाणया ध्रियमाणया । अम्लानया अ-

किञ्च निरुपमसौरभ्यसंभृतविविधैतादृशकुसुमवृन्द-कलितमालिकासौरभं विज्ञायात्मनि स्थितप्रसूनमोघतामा-शङ्कमान इव स पारिजाततरुर्निखिलजगदीशे भगवत्यम्भो-रुहनाभे महोत्सवनिरीक्षणसमागतवृन्दारकवृन्दकरारविन्दैः स्वकुसुमान्युपदीकुरुते ॥ ७ ॥

दिव्यामोदहिमाम्भसा परिभृतैः सौवर्णपात्रैस्तदा
तत्पादाम्बुजपूजकेन हि महीदेवोत्तमेनादरात् ।

---

क्रान्तया अभिनवयेत्यर्थः, परमसुरभिलया उत्कृष्टसौरभ्यवत्या च तुलसीकु-न्दमालतीचम्पकानां स्रजा तुलसीदलकुन्दमालतीचम्पककुसुममय्या स्रजा मा-लया । भुवनत्रयं लोकत्रयमपि । सुरभीभूतं, जायते भवति ॥ ६ ॥

किञ्चेति । किञ्च अपिच । सः प्रसिद्धः । पारिजाततरुः कल्प वृक्षः । निरुपमेन निस्तुलेन सौरभ्येण सम्भृतानि सम्पूर्णानि विविधानि ना नाप्रकाराणि एतादृशानि च यानि कुसुमानि पुष्पाणि तेषां वृन्देन समूहे कलिता बद्धा या मालिका माला तस्याः सौरभं सौगन्ध्यं । विज्ञाय, आत्मनि स्वस्मिन् स्थितानां विद्यमानानां प्रसूनानां पुष्पाणां मोघतां निष्फलताम् । भगव-त्स्वीकारेणैव पुष्पाणां साफल्यमिति भावः । आशङ्कमानः संशयान इवेत्यु-त्प्रेक्षा । स्वकुसुमानि, महोत्सवस्य निरीक्षणार्थं दर्शनार्थं समागतस्य प्राप्तस्य वृन्दारकवृन्दस्य देवसमूहस्य करारविन्दैः अरविन्दसदृशैः करैः करणैः । निखिलजगदीशे सर्वलोकनाथे । भगवति, अम्भोरुहनाभे श्रीपद्मनाभे । उपदी-कुरुते उपहारीकुरुते ॥ ७ ॥

दिव्येति । जगतो लोकस्य । तापप्रणाशी सन्तापनाशकरः । हरि श्रीपद्मनाभः । तदा घोषयात्राकाले । दिव्यः उत्तम आमोदः सौरभ्यम् 'आमोदो हर्षगन्धयोरि'ति विश्वः, यस्य तद् दिव्यामोदं तादृशेन हिमा म्भसा हिमजलेन । परिभृतैः पूरितैः । सौवर्णपात्रैः स्वर्णमयपात्रैः करणैः । तस्य श्रीपद्मनाभस्य पादाम्बुजयोः पादपद्मयोः पूजकेन अर्चकेन । महीदेवोत्तमेन ब्रा-ह्मणश्रेष्ठेन कर्त्रा । आदरात् सादरम् । विक्षिप्तानाम् अतितुषाराणाम् अतिशी-

विक्षिप्तातितुषारबिन्दुकलनात् सद्योऽनुभुङ्क्ते मुदं
भक्तानुग्रहवाञ्छयैव जगतस्तापप्रणाशी हरिः ॥ ५ ॥

अथ तदानीं निरुपमतमकार्तस्वरमयभाजनान्तर्गत-कर्पूरतेजसा च यदा स भगवान् नीराजितो भवति, तदा समस्तजनमानसं भक्तिभारभरितं परमाह्लादसहितं च जायते, नेदं चित्रं चन्द्रमयभाजनान्तर्गते चन्द्र एव नीराजनापदमुपनीते ॥ ८ ॥

तलानां, 'तुषारः शीतलः शीत' इत्यमरः, बिन्दूनां हिमजलकणानां कलनात् स्पर्शाद्धेतोः । भक्तानामनुग्रहे वाञ्छा आग्रहस्तयैव । सद्यः, मुदं सन्तोषम् । अनुभुङ्क्ते । सकललोकतापहारिणो भगवतः शीतलहिमाम्भःकणसम्पर्कजनिततापप्रणाशहेतुकसन्तोषासम्भवेऽपि भक्तानुग्रहवाञ्छयैव भगवान् सन्तोषं प्राप्तवान् । भगवत्सन्तोषमात्रस्यैवाभ्युदयहेतुत्वादिति भावः । 'किमलभ्यं भगवति प्रसन्ने श्रीनिकेतने' इत्युक्तत्वात् ॥ ५ ॥

अथेति । अथ तदानीं, निरुपमतमम् अतीव निरुपमं कार्तस्वरमयं स्वर्णमयं च यद् भाजनं नीराजनार्थं निर्मितः पात्रविशेषः तदन्तः गते स्थिते कर्पूरे विद्यमानेन तेजसा च दीपेन । सः, भगवान् श्रीपद्मनाभः । यदा यस्मिन् काले । नीराजितः कृतनीराजनः । भवति, तदा तस्मिन् काले । समस्तजनानां सकलजनानां मानसं मनः । भक्तिभारेण भक्त्यतिशयेन भरितं पूर्णम् । परमेण उत्कृष्टेन आह्लादेन सन्तोषेण सहितं युक्तं च । जायते । नेदमिति । चन्द्रमयस्य स्वर्णमयस्य इन्दुस्वरूपस्य चेति भाजनस्य पात्रस्य अन्तर्गते अन्तः स्थिते । चन्द्रे कर्पूरे एव इन्दाविति च । 'घनसारश्चन्द्रसंज्ञ' इत्यमरः । नीराजनापदं नीराजनस्थानम् । उपनीते प्रापिते सति । इदं समस्तजनमानसस्य परमाह्लादसहिततया जननमित्यर्थः । न विचित्रं नाश्चर्यम् । 'चदि आह्लादने' इत्यस्माद्धातोर्निष्पन्नचन्द्रपदशक्त्या सर्वाह्लादकरचन्द्रपात्रस्थितसर्वाह्लादकरचन्द्रपदार्थे नीराजनतां प्राप्ते सर्वेषामाह्लादो नैवाश्चर्यकर इति भावः ॥ ८ ॥

तावद् वादित्रसङ्घान् पटहमुरलिकाकाहलोत्तुङ्गभेरी-
मुख्यानेकीभवन्निर्मलमधुररवान् वादयन्ते विदग्धाः ।
तत्तन्नादेषु देवान् दिवि समुपगतानुत्सवश्रीदिदृक्षून्
कुर्वन्तो मोदलज्जाकुतुकभरमिलद्विस्मयान्धानजस्रम् ॥

अथास्यां कर्पूरनीराजनायां विरतायां सकलोऽपि जन-स्तदुत्थितमतिसौरभसहितं जगत्पवित्रं धूमं हस्तयुगलेनादायाक्षिपुटमधिवासयन् कामपि परमानन्ददशामनुभुङ्क्ते ॥ ९ ॥

तावदिति । तावद् नीराजनाकाले । विदग्धाः समर्थाः, वादित्रवादनसमर्था इत्यर्थः । उत्सवश्रियं दिदृक्षून् द्रष्टुमिच्छून् । दिवि आकाशे । समुपगतान् सम्प्राप्तान् । तत्तन्नादेषु पटहादिशब्देषु । अजस्रं, मोदभरेण प्रथमं श्रुतमात्रे माधुर्यप्रतीत्या सन्तोषातिशयेन, लज्जाभरेण तदनन्तरं नैते अस्मदीयाः किन्त्वन्यदीया अस्मद्वादित्रातिशायिनश्च इति ज्ञानाल्लज्जातिशयेन, कुतुकभरेण च मधुरतरवाद्यध्वनिश्रवणेच्छया कौतुकातिशयेन च मिलन् युक्तः यः विस्मयः एतादृशमधुरतरवाद्यध्वनेः पूर्वमश्रुतत्वाद् अद्भुतं, तेन अन्धान् इतिकर्तव्यताज्ञानशून्यान् । कुर्वन्तः सन्तः, पटहः मुरलिका काहलः उत्तुङ्गा उन्नता भेर्यश्च वाद्यविशेषा एते मुख्याः प्रधानानि येषां ते तादृशाः अनेकीभवन्तः नानाप्रकारीभवन्तः निर्मला निर्दोषाः मधुराः कर्णामृतप्रायाश्च ये रवाः शब्दास्ते येषां ते तादृशाः पटहमुरलिकाकाहलोत्तुङ्गभेरीमुख्याश्च ते अनेकीभवन्निर्मलमधुररवाः तादृशान् । वादित्रसङ्घान् वाद्यसमूहान् । 'चतुर्विधमिदं वाद्यं वादित्रातोद्यनामकमि'त्यमरः । वादयन्ते वादितान् कुर्वन्ति ॥ ८ ॥

अथेति । अथ अस्यां कर्पूरनीराजनायां, विरतायां समाप्तायाम् । सकलः समस्तः । जनः अपि । तदुत्थितं तस्मात् कर्पूरतेजसः उत्थितम् उद्भूतम् । अतिसौरभेण सहितं युक्तम् । जगत्पवित्रं जगच्छुद्धिकरम् । धूमं, हस्तयुगलेन पाणियुग्मेन । आदाय स्वीकृत्य । अक्षिपुटं नेत्रपुटम् । अधिवासयन् सुरभीकुर्वन् सन् । कामपि अनिर्वचनीयामित्यर्थः । परमानन्ददशां परमानन्दावस्थाम् । अनुभुङ्क्ते ॥ ९ ॥

तदनु विरते वादित्रघोषे सुमनोहरकण्ठनादवन्दिजनाकलितनुतिः स भगवान् पुनरपि विविधवाद्यकोलाहलेन प्रदक्षिणचतुष्टयरूपां घोषयात्रां तनोति ॥ १० ॥

द्वितीयोत्सवदिने तु स एव भगवाननुपमकारुण्यवात्सल्यमुखानन्तगुणनिकरनिकेतनीभूतः श्रीपद्मनाभोऽनन्तसंज्ञं वाहनवरेण्यमलङ्करोति ॥ ११ ॥

तदानीं वाहनोपरि विलसतो निखिलजगदीश्वरस्यास्य भगवतस्तस्य बिलसतः फणनिकराः सितच्छत्रीभवन्ति ॥ १२ ॥

---

तदन्विति । तदनु, वादित्रघोषे वाद्यघोषे । विरते निवृत्ते सति । सुमनोहरः अतीव मनोहरः यः कण्ठनादः कण्ठशब्दः स येषां तादृशैः वन्दिजनैः स्तुतिपाठकजनैः कलिता कृता नुतिः स्तुतिः यस्य तादृशः । सः भगवान् श्रीपद्मनाभः । पुनरपि स्तुतिपाठानन्तरमपि । विविधानि नानाप्रकाराणि यानि वाद्यानि तेषां कोलाहलेन कलकलेन सह । 'कोलाहलः कलकल' इत्यमरः । प्रदक्षिणचतुष्टयरूपां घोषयात्रां, तनोति कुरुते ॥ १० ॥

द्वितीयदिनं वर्णयति — द्वितीयेति । द्वितीयं यदुत्सवदिनं तस्मिंस्तु । भगवान्, अनुपमाः उपमारहिताः कारुण्यवात्सल्यमुखाः दयावात्सल्यप्रभृतयः अनन्ता असंख्या इत्यर्थः ये गुणास्तेषां निकरस्य समूहस्य निकेतनीभूत आवासभूतः । सः श्रीपद्मनाभ एव, अनन्तसंज्ञितम् अनन्त इति संज्ञायुक्तम् । वाहनवरेण्यं वाहनश्रेष्ठम् । अलङ्करोति भूषयति । तदधिरोहतीत्यर्थः ॥

तदानीमिति । तदानीं तस्य, बिलसतः बिले गुहायां सन् विद्यमान इति व्युत्पत्त्या सर्पस्येत्यर्थः । बिलेशयो हि सर्पः । 'दन्दशूको बिलेशय' इत्यमरः । वाहनभूतस्यानन्तस्येति यावत् । फणानिकराः फणसमूहाः । वाहनोपरि वाहनोपरिभागे । विलसतो विशेषेण लसतः शोभमानस्य, विराजमानस्येत्यर्थः । निखिलजगदीश्वरस्य सर्वलोकनाथस्यास्य, भगवतः श्रीपद्मनाभस्य । सितच्छत्रीभवन्ति श्वेतच्छत्रीभवन्तीत्यर्थः । अनन्तस्यातिधवलत्वात् तत्फणासहस्रं पद्मनाभस्य श्वेतच्छत्रवदाचरतीत्यर्थः ॥ १२ ॥

उद्वेलानन्दभाराः कतिचन विलसद्दिव्यवासःपरीताः
पाटीरालिप्तदेहा रुचिरतरकलापान्विता वृन्दशस्ते ।
स्यानन्दूरेश्वरस्य त्रिभुवनहृदयाह्लादिनीं घोषयात्रा-
मुद्वीक्ष्याग्रे चरन्ति स्फुटतरपरमानन्दपीयूषमग्नाः ॥ ७ ॥

अथ तदानीं परमभागवताः केचनानिर्वचनीयभक्ति-भारविगलदानन्दबाष्पधारासंभृतनयनपुटाः सुमनोहरनामा-वलीमयसुमनोगणकलितदिव्यस्तवमाल्यानि तस्य भगवतः सरसीरुहनाभस्य चरणसरसिजयोरुपहारीकुर्वन्ति ॥ १३ ॥

उद्वेलेति । उद्वेलः वेलालङ्घी अतिप्रवृद्ध इत्यर्थः आनन्दभारः सन्तोषातिशयो येषां तादृशाः । विलसन्ति शोभमानानि दिव्यानि च यानि वासांसि वस्त्राणि तैः परीता वेष्टिताः । पाटीरेण चन्दनेन आलिप्ताः रूषिताः देहाः शरीराणि येषां तादृशाः । रुचिरतराः अतीव मनोहराः ये कलापा भूषणानि, 'कलापो भूषणे बर्हे' इत्यमरः, तैरन्विताः सहिताश्च । कतिचन केचन । जना इति शेषः । त्रिभुवनस्य हृदयं चित्तम् आह्लादयति प्रसादयतीति त्रिभुवनहृदयाह्लादिनी तादृशीम् । स्यानन्दूरेश्वरस्य श्रीपद्मनाभस्य । घोषयात्राम्, उद्वीक्ष्य दृष्ट्वा । स्फुटतरः सुव्यक्तः परम उत्कृष्टश्च यः आनन्दस्तन्मये पीयूषे अमृते मग्नाः सन्तः । ते वृन्दशः सङ्घशः । अग्रे घोषयात्रापुरोभागे । चरन्ति ॥ ७ ॥

अथेति । अथ, तदानीं घोषयात्राकाले । अनिर्वचनीयः निर्वक्तुमशक्यः यः भक्तिभारस्तेन हेतुना विगलन्ती निःष्यन्दमाना या आनन्दबाष्पधारा सन्तोषाश्रुधारा तया सम्भृताः सम्पूर्णाः नयनपुटा येषां तादृशाः । परमभागवताः परमा उत्कृष्टा भागवता भगवद्भक्ताः । केचन केचित् । जना इति शेषः । भगवतस्तस्य सरसीरुहनाभस्य, चरणसरसिजयोः पादारविन्दयोः । सुमनोहरा या नामावल्यः नामसमूहाः तत्स्वरूपाणां सुमनसां पुष्पाणाम् । 'स्त्रियः सुमनसः पुष्पमि'त्यमरः । गणेन समूहेन कलितः कृतः बद्ध इति च दिव्य उत्तमश्च यः स्तवः स्तुतिः तन्मयानि माल्यानि मालाः । 'माल्यं मालास्र-

तृतीयोत्सवदिने तु स भगवान् कमलावदनकमलमधुकरः कमलनाभः कमलवाहनमधिरुह्य निखिलभक्तनिकरं परमाह्लादसमन्वितं कलयति ॥ १४ ॥

सौवर्णोत्तमदण्डचामरगणैः संवीजितो भूसुरैः
पार्श्वद्वन्द्वविराजितैः प्रविलसत्यम्भोजनाभो ह्ययम् ।
येषां पाण्डरतां निरीक्ष्य हृदयाविर्भूतलज्जाभरात्
सञ्जातानननीलिमा हिमकरो गीतः कलङ्कीत्यलम् ॥ ८ ॥

जावि'त्यमरः । उपहारीकुर्वन्ति उपदीकुर्वन्ति । भक्तजनाः स्तुवन्तीति भावः ॥ १३ ॥

तृतीयोत्सवेति । कमलायाः श्रीभगवत्याः वदनकमलस्य मुखारविन्दस्य मधुकरः भ्रमरः, लक्ष्मीवदनशोभावहो भूत्वा तत्रत्याधरमधुरसास्वादकर इति भावः । भगवान् सः, कमलनाभः श्रीपद्मनाभः । तृतीयोत्सवदिने तु, कमलवाहनं कमलनामकं वाहनम् । अधिरुह्य, निखिलाः समस्ता ये भक्ताः तेषां निकरं समूहम् । परमेणोत्कृष्टेनाह्लादेन सन्तोषेण समन्वितं सहितम् । कलयति करोति ॥ १४ ॥

सौवर्णेति । अयम्, अम्भोजनाभः श्रीपद्मनाभः हि । पार्श्वद्वन्द्वे पार्श्वयुग्मे विराजितैः शोभितैः । भूसुरैः ब्राह्मणैः कर्तृभिः । सौवर्णाः स्वर्णमयाः उत्तमाश्च दण्डा येषां तादृशानां चामराणां गणैः समूहैः करणैः । संवीजितः सम्यग् वीजितः सन् । प्रविलसति प्रकर्षेण शोभते । हिमकरः चन्द्रः । येषां चामराणाम् । पाण्डरतां धावल्यम् । निरीक्ष्य दृष्ट्वा । हृदये मनसि आविर्भूतः उत्पन्नः यः लज्जाभरः लज्जातिशयः तस्माद्धेतोः । अलम् अधिकम् । सञ्जात उत्पन्नः आनननीलिमा मुखमालिन्यं यस्य तादृशः सन् । कलङ्की कलङ्कवान् । इति, गीतः उक्तः । चन्द्रमध्ये दृश्यमानः कलङ्कस्तु एतच्चामरधावल्यदर्शनसञ्जातलज्जाभरहेतुकमुखमालिन्यमेवेति भावः । उत्प्रेक्षा, सा च व्यञ्जकाप्रयोगाद् गम्या ॥ ८ ॥

अथ पृष्ठभागे स भगवान् विश्वभुवनभागावितत यशोमण्डलानुकारिणा कलधौतमयायतदण्डश्वेतच्छत्रत्रितयेनाञ्चितो विराजते ॥ १५ ॥

किञ्चानुपमेयसुमहितानुभावस्यास्य भुवनत्रयव्याप्तं यश एव श्वेतातपत्रात्मना त्रिधा परिणतमिव विभाति ॥ १६॥

आनीलायतखञ्जरीटनयनाः सिन्दूरताम्राधर-
व्याप्तात्यन्तमनोज्ञमन्दहसिताः स्वर्णाभवर्णाः स्त्रियः ।
हस्ताग्रोद्धृतचारुदीपकलिकास्ताः पृष्ठतः श्रीपते-
रस्यायान्ति विमोहयन्त्य इह वै यूनां निकामं कुलम् ॥ ९॥

अथेति । स भगवान् श्रीपद्मनाभः । विश्वेषु समस्तेषु भुवनभागेषु विततं विस्तृतं यद् यशोमण्डलं तदनुकरोति विडम्बयतीति तदनुकारी तादृशेन। कलधौतमयाः स्वर्णमयाः; 'कलधौतं रूप्यहेम्नोरि'त्यमरः, आयता दीर्घाश्च ये दण्डास्ते येषां तादृशानां श्वेतच्छत्राणां सितच्छत्राणां त्रितयेन । पृष्ठभागे, अञ्चितः पूजितः सन् । विराजते शोभते ॥ १५ ॥

किञ्चेति । किञ्च, अनुपमेयः सुमहितः च यः अनुभावः प्रभावः स यस्य तादृशस्य । अस्य श्रीपद्मनाभस्य । भुवनत्रये लोकत्रये व्याप्तम् । यश एव, श्वेतच्छत्रात्मना श्वेतच्छत्ररूपेण । त्रिधा परिणतमिवेत्युत्प्रेक्षा । विभाति शोभते ॥ १६ ॥

आनीलेति । आनीले कृष्णवर्णे आयते दीर्घे खञ्जरीटो नामाञ्जनाभः पक्षिविशेषः । 'खञ्जरीटस्तु खञ्जन' इत्यमरः । तस्य समाने नयने नेत्रे यासां तादृश्यः । सिन्दूरवत् ताम्रो रक्तः यः अधरः तस्मिन् व्याप्तम् अत्यन्तमनोज्ञं च यन्मन्दहसितं मन्दहासः तत् यासां तादृश्यः । स्वर्णस्य आभेवाभा शोभा यस्य तादृशः यः वर्णः स यासां तादृश्यः । ताः सौन्दर्येण प्रसिद्धा इत्यर्थः । स्त्रियः, हस्ताग्रेण उद्धृताः चारवो मनोहराश्च या दीपकलिकाः कलिकाकारा दीपा याभिः तादृश्यः । 'कलिका कोरकोऽस्त्रियामि'त्यमरः । यूनां यौवनयुक्तपुरुषाणाम् । कुलं समूहम् । निकामम् अधिकम् । विमोहयन्त्यः विशे-

अप्येतासां भुवनसुन्दरीणां करतललालसिताः शिखाजनितधूमसंशोभिता दीपाः भ्रमराविष्टचम्पकस्तबकसाम्यं भजन्ति ॥ १७ ॥

चतुर्थोत्सवदिने तु स भगवानरविन्दनाभो मन्देतरानन्दसान्द्रजननयनचकोरचन्द्रायितमनोहरमूर्तिरान्दोलिकायानं परिष्कुर्वन् विलसति ॥ १८ ॥

अथास्यास्त्वान्दोलिकाया दण्डोऽत्युन्नतं स्थानमाश्रि-

---

षेण मोहयन्त्यश्च सत्यः । इह वै घोषयात्रायाम् । श्रीपतेरस्य श्रीपद्मनाभस्य । पृष्ठतः पृष्ठभागेन । आयान्ति आगच्छन्ति ॥ ९ ॥

अपीति । अपि अपिच भुवनसुन्दरीणां लोकोत्तरसुन्दरीणाम् । एतासां स्त्रीणाम् । करतलेषु लालसिताः शोभिताः । शिखया ज्वालया जनितेन उत्पादितेन धूमेन संशोभिताः सम्यक् शोभिताः । दीपाः, भ्रमरैः आविष्टेन व्याप्तेन चम्पकस्तबकेन चम्पकगुच्छेन साम्यं सादृश्यम् । भजन्ति दधति । नन्वयुक्तमिदं, 'न षट्पदो गन्धफलीमजिघ्रदि'त्यादिनालीनां चम्पकस्पर्शाभावप्रसिद्धेरिति चेत् । न । नह्यलयश्चम्पकं न स्पृशन्तीति नियमः । किन्तु स्पृष्टा म्रियन्ते । तावतैव क्वचिदस्पर्शोक्तिरिति विरोधपरिहारात् । अत एवोक्तं नैषधे—'अलिस्रजा कुड्मलमुच्चशेखरं निपीय चाम्पेयमि'ति ॥ १७ ॥

चतुर्थोत्सवेति । मन्देतरेण महता आनन्देन सान्द्रा ये जनाः तेषां नयनान्येव ये चकोराः चन्द्रिकाभक्षकपक्षिविशेषाः । 'जीवञ्जीवश्चकोरक' इत्यमरः, तेषां चन्द्रायिता चन्द्रवदाचरिता नयनानन्दकरीति यावत् , मनोहरा च या मूर्तिः शरीरं सा यस्य तादृशः । भगवान् सः, अरविन्दनाभः श्रीपद्मनाभः । चतुर्थोत्सवदिने तु, आन्दोलिकायानम् आन्दोलिकाख्यं यानं वाहनं, शिबिकामित्यर्थः । परिष्कुर्वन् अलङ्कुर्वन् , तदधिरुह्येत्यर्थः । विलसति शोभते ॥

अथेति । अथ, अस्याः श्रीपद्मनाभाधिरूढायाः । आन्दोलिकायाः शिबिकायाः । दण्डः तद्धारणार्थं वेणुना निर्मितः दण्डविशेषः तु । अत्युन्नतं अतीव ऊर्ध्वभागस्थितम् । स्थानं महत् पदमिति च । आश्रितः भजन्नपि ।

तोऽप्यवनतो विराजते, नैवेदं चित्रमस्य समवाप्तमहावंशसम्भवस्य ॥ १९ ॥

अथ तदानीं,

दीपस्तम्भकुलानि यत्र दिननाथाभाहराण्यद्भुता-
न्यप्याक्रान्तविरिञ्चलोकशिखराण्याप्तानि शेषालयम् ।
राजन्ते निशि तावदात्तकुतुकं लोकैः सदा लक्षिता-
न्यन्योन्यं बत पश्यतेति च मिथः सम्भाषमाणैः परम् ॥

---

अवनतः नम्रः विनीत इति च । विराजते शोभते । महापदस्थितानां प्रायेण विनीतत्वं न सम्भवति । तथाचास्य विनीतत्वमाश्चर्यकरमस्य शोभाकरं चेति भावः । नैवेति । समवाप्तः सम्प्राप्तः लब्ध इत्यर्थः महति उन्नते शुद्ध इति च वंशे वेणौ कुले इति च सम्भव उत्पत्तिर्येन तादृशस्य । अस्य दण्डस्य । एतद् महापदाश्रितत्वेऽपि अवनतत्वम् । नैव चित्रं नैवाश्चर्यकरमित्यर्थः । परिशुद्धकुलजातानां महापदलाभेऽपि विनीतत्वं भवत्येवेति भावः ॥ १९ ॥

अथेति । अथ, तदानीं घोषयात्राकाले ।

दीपस्तम्भेति । दिननाथस्य आदित्यस्य आभाहराणि शोभाहराणि आदित्यादप्यधिकतेजोवन्तीत्यर्थः । अद्भुतानि आश्चर्यकराणि । आक्रान्तानि व्याप्तानि विरिञ्चलोकस्य सत्यलोकस्य शिखराणि शृङ्गाणि यैस्तादृशानि । अथवा आक्रान्तो विरिञ्चलोकः सत्यलोको यैस्तादृशानि यानि शिखराणि अग्राणि तानि येषां तादृशानीत्यर्थः । शेषालयं पातालमपि । 'अधोभुवनपातालबलिसद्मरसातलम् । नागलोक' इत्यमरः । अनन्तपुरमिति च । आप्तानि प्राप्तानि । दीपस्तम्भकुलानि दीपस्तम्भसमूहाः । यूयं पश्यत बत आश्चर्यम् इति, मिथः अन्योन्यम् । परं सम्भाषमाणैः, लोकैः जनैः । सदा लक्षितानि आलोक्यमानानि । निशि तावद् घोषयात्राकाले, यत्र स्यानन्दूरपुरे । राजन्ते शोभन्ते ॥ १० ॥

किञ्चाशेषभुवनभागविशदीकरणचणप्रकाशादस्माद् दीपस्तम्भकुलादुत्थितो धूमो दिवि व्याप्य सुधाकरमण्डलमध्यमीषदसितं करोति ॥ २० ॥

पञ्चमोत्सवदिने तु स भगवान् प्रपञ्चितासदृशकरुणारसाम्भोधिः पञ्चबाणजनकः श्रीपद्मनाभो निजदयिततमविहङ्गकुलवरेण्यवाहनमारूढो विलसति ॥ २१ ॥

अथ तदानीमुत्सवनिरीक्षणत्वरमाणजनसमूहस्तु तस्य भगवतश्चरणसेवकाभ्युदयसाम्यमनुकुर्वन् प्रतिदिनमेधमानोऽपि गरुडवाहनविराजमानं भगवन्तमवलोकितुमपरिगणितसम्बाधः सम्मिलति ॥ २२ ॥

---

किञ्चेति । किञ्च, अशेषाणां समस्तानां भुवनभागानां विशदीकरणे निर्मलीकरणे समर्थो यः प्रकाशः स यस्य तादृशात् । अस्मात्, दीपस्तम्भकुलात् दीपस्तम्भसमूहात् । उत्थितः उत्पन्नः । धूमः, दिवि आकाशे । व्याप्य, सुधाकरमण्डलस्य चन्द्रमण्डलस्य मध्यम् । ईषदसितं किञ्चित्कृष्णवर्णं । करोति ॥ २० ॥

पञ्चमोत्सवेति । प्रपञ्चितासदृशकरुणारसाम्भोधिः विस्तृतानुपमदयापयोनिधिः । पञ्चबाणस्य मदनस्य जनकः पिता । अनेन निरुपमसौन्दर्यं व्यज्यते । भगवान्, सः श्रीपद्मनाभः । पञ्चमोत्सवदिने तु, निजदयिततमः निजभक्ततमः यः विहङ्गकुलवरेण्यः गरुडः तद्रूपं वाहनम् । आरूढः सन् विलसति शोभते ॥ २१ ॥

अथेति । अथ, उत्सवस्य निरीक्षणार्थं त्वरमाणः ससम्भ्रमः जनसमूहः तु । तस्य, भगवतः श्रीपद्मनाभस्य । चरणसेवकानां पादारविन्दाश्रयिणां भक्तानामित्यर्थः । अभ्युदयं श्रेयः । अनुकुर्वन् विडम्बयन् सन् । तस्यापि प्रतिदिनैधमानत्वादिति भावः । प्रतिदिनं दिनं प्रति । एधमानः वर्धमानः अपि । गरुडवाहने गरुडात्मकवाहने । विराजमानं शोभमानम् । भगवन्तं श्रीपद्मनाभम् । अवलोकितुं द्रष्टुम् । तदानीं पञ्चमोत्सवकालिकघोषयात्रा

अथ तावत् सुविमलतपश्चर्यानिष्णातसनकमुखयोगिजनहृदयारविन्दमध्यविहारिकलहंसायिते प्रफुल्लराजीवकान्तिमदसर्वङ्कषे सन्ततं पयोधिनन्दिनीकोमलकराम्बुजाकलितसंलालनसुखिते विलसत्कलशकुलिशसरोजादिमनोहराङ्कविराजमाने त्रिभुवनान्तरालस्थितध्वान्तान्तकरणचुञ्चुमणिगणोत्तंसखचितनवजाम्बूनदमयवरमञ्जीरमुखरे लसन्नन्दनोद्या-

---

अपरिगणितः अनल्पः सम्बाधः सम्मर्दः यस्य तादृशः सन् । सम्मिलति समागच्छतीत्यर्थः ॥ २२ ॥

अथेति । अथ तदानीम् । सुविमलस्यातीव निर्मलस्य तपसः समाधेः चर्यायां चरणेऽनुष्ठान इत्यर्थः निष्णाताः तत्पराः सनकमुखाः सनकप्रभृतयश्च ये योगिजनाः तेषां हृदयानामेवारविन्दानां मध्ये विहर्तुं क्रीडितुं शीलमस्येति तथा तादृशः यः कलहंसस्तद्वदाचरिते, योगिजनध्यानविषये इत्यर्थः । प्रफुल्लम् उत्फुल्लं यद् राजीवं पद्मं तस्य कान्त्या शोभया यः मदः गर्वः तस्य सर्वङ्कषे विनाशकरे इत्यर्थः । पद्मादप्यतिमनोहरे इति यावत् । सन्ततं सर्वदा । पयोधिनन्दिन्याः महालक्ष्म्याः कोमलाभ्यां मनोहराभ्यां कराम्बुजाभ्याम् अम्बुजसदृशाभ्यां कराभ्याम् आकलितं कृतं यत् संलालनं संवाहनमित्यर्थः तेन सुखिते सुखं प्राप्ते । विलसन्तः शोभमानाः कलशकुलिशसरोजादयः कुम्भवज्रपद्मप्रमुखाः मनोहराश्च ये अङ्काः चिह्नानि तैः विराजमाने शोभमाने । त्रिभुवनस्य त्रैलोक्यस्यान्तराले मध्ये स्थितं यद् ध्वान्तमन्धकारः तस्यान्तकरणे विनाशकरणे समर्थानां मणिगणानां रत्नसमूहानां ये उत्तंसाः शिरोलङ्काराः मणिगणश्रेष्ठा इत्यर्थः ते खचिताः प्रत्युप्ताः ययोस्तादृशौ नवजाम्बूनदमयौ तप्तस्वर्णमयौ । 'कार्तस्वरं जाम्बूनदमष्टापदोऽस्त्रियामि'त्यमरः । वरौ श्रेष्ठौ च यौ मञ्जीरौ नूपुरौ ताभ्यां मुखरे शब्दायमाने । लसत् शोभमानं यत् नन्दनोद्यानं नन्दननामकमुद्यानम् । 'नन्दनं वनमि' त्यमरः । तस्य भूषणायितः अलङ्कारवदाचरितः यः गीर्वाणानोकहः कल्पवृक्षः तस्य पल्लववत् किसलयवत् प्रविलसिते प्रकर्षेण शोभिते । तस्य भगवतः

नभूषणायितगीर्वाणानोकहपल्लवप्रविलसिते तस्य भगवतश्च-रणे परमधन्यस्यास्य शकुन्तकुलावतंसस्य करतलयोर्विराजेते ॥ २३ ॥

अथ तस्मिन्नवसरे सञ्जातसकृद्दर्शनानामपि मानवानां नयनयुगली कृतार्थतरैव ॥ २४ ॥

तावन्निस्तुलमोदनिश्चलतमस्वर्वासिवामेक्षणा-
हस्तप्रान्तनिरर्गलप्रविगलन्मन्दारसूनव्रजैः ।
सामोदो विलसत्ययं सकुतुकं श्रीपद्मनाभो हरिः
सौरभ्येण जगत्त्रयं सुमहता संवासयद्भिर्नवैः ॥ ११ ॥

---

श्रीपद्मनाभस्य । चरणे पादौ । परमधन्यस्य अतीव सुकृतिनः । शकुन्तकुलावतंसस्य पक्षिसमूहश्रेष्ठस्य । 'शकुन्तशकुनद्विजा' इत्यमरः । अस्य गरुडस्य । करतलयोः, विराजेते शोभेते ॥ २३ ॥

अथेति । अथ, तस्मिन्, अवसरे समये । तस्मिन् घोषयात्राकाले इत्यर्थः । सञ्जातम् उत्पन्नं सकृद्दर्शनं पद्मनाभविषयकैकवारावलोकनं येषां तादृशानामपि । मानवानां मनुष्याणाम् । नयनयुगली नेत्रयुग्मम् । कृतार्थतरैव अतीव सफलैव । एवं पद्मनाभविषयीकरणमेव नेत्रयुग्मस्य फलमिति भावः ॥ २४ ॥

तावदिति । तावत् हरिः, अयं श्रीपद्मनाभः । सुमहता अतीवोत्कृष्टेन । सौरभ्येण जगत्त्रयं संवासयद्भिः सम्यग्वासयद्भिः । नवैः नूतनैः । निस्तुलेन तुलारहितेन मोदेन सन्तोषेण निश्चलतमाः अतीव निष्कम्पाः याः स्वर्वासिवामेक्षणाः देवस्त्रियस्तासां हस्तप्रान्ताभ्यां हस्ताग्राभ्यां निरर्गलं निष्प्रतिबन्धं यथा तथा अनवरतमविच्छिन्नमित्यर्थः प्रविगलन्ति यानि मन्दारसूनानि कल्पवृक्षपुष्पाणि तेषां व्रजैः समूहैः । सामोदः ससौरभ्यः सन् । 'आमोदो हर्षगन्धयोरि'ति विश्वः । सकुतुकं सकुतूहलं यथा तथा । विलसति शोभते ॥ ११ ॥

किञ्च परमानन्दरसनीरधिमग्नानां दिविषदामामोद-द्योतकभेरीनिनादोऽप्युपरि विजृम्भते ॥ २५ ॥

षष्ठोत्सवदिने तु स भगवान् सान्द्रानन्दनिलयश्चे-न्दिरारमणोऽरविन्दनाभो निरुपमशोभासंयुतमिन्द्रवाहनमल-ङ्कुर्वन् विलसति ॥ २६ ॥

योऽसौ निस्तुलकान्तिवाहनतिलकः स्वमहसा मदं नुदति काञ्चनमहीधरस्य ॥ २७ ॥

अथ तावच्चिरवाञ्छितात्पेतरसुकृतलभ्यभगवद्दर्शन-

---

किञ्चेति । किञ्च, परम उत्कृष्टः यः आनन्दः तत्स्वरूपे नीरधौ समुद्रे मग्नानाम् । दिविषदां देवानाम् । आमोदद्योतकः हर्षसूचकः भेरीनिनादः भेरी-शब्दः अपि । उपरि ऊर्ध्वभागे आकाशे । विजृम्भते वर्धते ॥ २५ ॥

षष्ठोत्सवेति । सान्द्रानन्दनिलयः परमानन्दनिवासस्थानभूतः । इन्दि-रारमणः लक्ष्मीवल्लभः । भगवान् च अयम्, अरविन्दनाभः श्रीपद्मनाभः । षष्ठो-त्सवदिने तु, निरुपमया निस्तुलया शोभया संयुतं युक्तम् । इन्द्रवाहनम् । अलङ्कुर्वन् परिष्कुर्वन्, अधिरुह्येत्यर्थः । विलसति शोभते ॥ २६ ॥

योऽसाविति । यः असौ, निस्तुला निरुपमा कान्तिः शोभा यस्य तादृशः वाहनतिलकः वाहनश्रेष्ठः स्वमहसा स्वतेजसा । काञ्चनमहीधरस्य महामेरोः मदं गर्वम् । नुदति दूरीकरोति इत्यर्थः । महामेरोरप्यधिकतेजस्वी भवतीति भावः । अत्रत्ययच्छब्दस्य पूर्वगद्यस्थितेन्द्रवाहनमित्यत्राध्याहृततच्छ-ब्देन सम्बन्धो योज्यः ॥ २७ ॥

अथेति । अथ तावत् घोषयात्राकाले । चिरवाञ्छितं चिरकालादारभ्य *इच्छितम् अल्पेतरेण महता सुकृतेन पुण्येन लभ्यं लब्धुं शक्यं च यद् भगव-द्दर्शनं श्रीपद्मनाभावलोकनं तत्र यत् कुतूहलं कौतुकं तस्माद्धेतोः । अहमहमि-कया परस्पराहङ्कारेण सह । 'अहमहमिका तु सा स्यात् परस्परं यो भवेदहङ्कारः'

---

* इच्छाविषयीकृतम् । इच्छाशब्दादितच्प्रत्ययेन साध्यम् ।

कुतूहलादहमहमिहकयापततां जनानामपरिमितः समूहो बद्ध-कक्ष्यविविधकञ्चुकिजननिवारितोऽपि नैवापसरति ॥ १८ ॥

नीलाम्भोदालिराजत्कुटिलकचभराबद्धनानाप्रसून-
स्रग्जालामोदभारेण तु युवहृदयं मोहयन्त्यो नितान्तम् ।
सिन्दूराताम्रदन्तच्छदनवरुचयस्तावदायान्ति योषा
यास्ता लावण्यपूर्णा अपि मधुरतराशेषचेष्टा लसन्ति ॥
एता यौवनरूपगर्विततमा युक्ता वरैः स्वैर्वरैः
पाटीरद्रवलिप्तहाटकघटप्रस्पर्ध्युरोजद्वयाः ।

---

इत्यमरः । आपतताम् आगच्छताम् । जनानाम्, अपरिमितोऽनल्पः । समूहः, बद्धकक्ष्याः सन्नद्धा इत्यर्थः विविधा नानाप्रकाराः च ये कञ्चुकिजनाः वेत्र-पाणयस्तैर्निवारितः निरुद्धः अपि । नैवापसरति नैवापगच्छति । तस्य भगव-द्दर्शनकुतूहलमतीवाश्चर्यकरमित्यपिशब्दस्वारस्यम् ॥ १८ ॥

**नीलाम्भोदे**ति । नीलाम्भोदालिवत् नीलमेघसमूहवत् राजन् शोभ-मानः तद्वत् कृष्णवर्ण इत्यर्थः कुटिलो वक्राग्रश्च यः कचभरः केशसमूहः तत्राबद्धम् आ समन्ताद् बद्धं यद् नानाप्रसूनस्रग्जालं नानापुष्पविरचितं स्रग्जालं मालासमूहः तस्यामोदभारेण सौरभ्यातिशयेन । युवहृदयं यौवनयुक्तपुरुषचेतः । नितराम् अत्यन्तम् । मोहयन्त्यः वशीकुर्वत्य इत्यर्थः । सिन्दूरवदाताम्रा दन्त-च्छदस्य ओष्ठस्य नवरुचिः अभिनवकान्तिः यासां तादृश्यः च । या, योषाः स्त्रियः । 'स्त्री योषिदबला योषे'त्यमरः । तु तावद् घोषयात्राकाले । आयान्ति आगच्छन्ति । लावण्येन सौन्दर्येण लवणत्वेनेति च पूर्णाः अपि । मधुरतराः अतीव मधुरा मनोहराः, मधुररसवत्यश्चेति । अशेषाः समस्ताश्च याश्चेष्टाः व्या-पाराः यासां तादृश्यः सत्यः । लसन्ति शोभन्ते । लवणरसपूर्णा अपि मधुर-रसवत्य इति विरोधः । सौन्दर्यसम्पूर्णाः मनोहरतरचेष्टावत्यश्चेति विरोधप-रिहारः । विरोधाभासालङ्कारः ॥ १९ ॥

**एता** इति । यौवनेन तारुण्येन रूपेण सौन्दर्येण च गर्विततमाः अतीव गर्विष्ठाः । वरैः श्रेष्ठैः । स्वैः आत्मीयैः । वरैः भर्तृभिः । युक्ताः सहिताः । पाटीरद्रवेण चन्दनपङ्केन लिप्तं रूषितं हाटकघटेन स्वर्णकुम्भेन सह प्रस्पर्धि

रराजद्रजनीशरम्यवदना दृष्ट्वा रमानायकं
मग्ना निस्तुलमोदरूपजलधौ तावद् भवन्ति द्रुतम् ॥

सप्तमोत्सवदिने तु स भगवान् सारसनाभोऽलोकसाधारणैतन्महोत्सवालोकनसकुतूहलसमागतविविधजनसमूहेषु प्रतिदिनं विवृद्धिमत्सु चतुर्थोत्सवदिवसानागतानां पथि स्वकृतं विलम्बं विचिन्त्यात्मानमेव धिक्कुर्वतां जनानां नयनकुलस्य जन्मसाफल्यं दातुमिव पुनरप्यान्दोलिकावाहनं कृतार्थीकरोति ॥ २९ ॥

---

प्रकर्षेण स्पर्धालु च यद् उरोजद्वयं कुचयुग्मं तत् यासां तादृश्यः । रराजत् अतीव शोभमानः यः रजनीशः चन्द्रः तद्वद् रम्यं मनोहरं वदनं मुखं यासां तादृश्यश्च । एता योषाः । तावद् घोषयात्राकाले । रमानायकं श्रीपद्मनाभम् । दृष्ट्वा, निस्तुलः निरुपमः यः मोदः हर्षस्तद्रूपे जलधौ समुद्रे । द्रुतं मग्ना भवन्ति ॥ १३ ॥

सप्तमोत्सवेति । प्रतिदिनं दिनं प्रति । विवृद्धिमत्सु वर्धमानेषु लोकसाधारणो न भवतीत्यलोकसाधारणः स्यानन्दूरपुरव्यतिरिक्तप्रदेशेषु अश्रुतदृष्टपूर्व इत्यर्थः । तादृशस्य एतस्य महोत्सवस्यालोकने दर्शने सकुतूहलाः सकौतुकाः सन्तः समागताः प्राप्ताः विविधा नानाप्रकाराश्च ये जनास्तेषां समूहेषु मध्ये । चतुर्थोत्सवदिने अनागतानाम् अप्राप्तानाम् । पथि मार्गे । स्वकृतं स्वैरात्मभिः कृतं । विलम्बं विचिन्त्य, आत्मानं स्वमेव । धिक्कुर्वताम् अहो अस्माभिर्मार्गे विलम्बितत्वात् चतुर्थोत्सवदिने आन्दोलिकावाहनमारुह्य घोषयात्रां कुर्वाणो भगवान् श्रीपद्मनाभो न दृष्टः । अतो वयमतीव निर्भाग्या इति आत्मानमेव विनिन्दतामित्यर्थः । जनानां, नयनकुलस्य नेत्रसमूहस्य । जन्मसाफल्यं जननसफलतां दातुम्, इवेत्युत्प्रेक्षा । नयनकुलस्य जन्मसाफल्यम् आन्दोलिकाधिरूढश्रीपद्मनाभदर्शनेनैवेति भावः । भगवान् सः, सारसनाभः श्रीपद्मनाभः । पुनरपि सप्तमोत्सवदिने तु, आन्दोलिकावाहनं शिबिकायानं कृतार्थीकरोति सफलयति, तदधिरोहतीत्यर्थः । श्रीपद्मनाभारोहणेनैव तस्य साफल्यमिति भावः ॥ २९ ॥

अथ तस्मिन्निह वाहनवरे विराजमानं भगवन्तं विलोक्य सकलोऽपि जनः कमप्यानन्दातिरेकमनुभुङ्क्ते ॥ ३० ॥

अथ तदानीं निजकण्ठनालोदितारावमाधुर्यन्यक्कृतसहकारसालाग्रभागसन्निषण्णमत्तकोकिलसमुदायो व्यावल्गत्तरकराङ्गुलीसम्पर्कजनितविश्वजनकर्णसुखापादकनिनादवीणानिस्सरद्विविधश्रुतिमण्डलोद्भिन्नस्वरनिकरो मधुरतरहरिचरितमयसाहित्यगानेन दिवि लसन्तं हाहाहूहूमुखगन्धर्वनिकरमपि विस्मयेर्ष्याकलुषीभूतं कुर्वाणो गायकसमुदायः समुल्लसति ॥ ३१ ॥

---

अथेति । इह घोषयात्रायाम् । तस्मिन्, वाहनवरे वाहनश्रेष्ठे, आन्दोलिकायामित्यर्थः । विराजमानं शोभमानं भगवन्तं श्रीपद्मनाभं विलोक्य दृष्ट्वा । सकलः जनः अपि, कमपि अनिर्वचनीयमित्यर्थः । आनन्दातिरेकम् आनन्दातिशयम् । अनुभुङ्क्ते ॥ ३० ॥

अथेति । अथ, तदानीं घोषयात्राकाले । निजादात्मीयात् कण्ठनालादुदितस्योत्पन्नस्य आरावस्य शब्दस्य माधुर्येण मधुरतया श्राव्यत्वेनेत्यर्थः न्यक्कृतः तिरस्कृतः अधःकृत इत्यर्थः सहकारसालस्य चूतवृक्षस्याग्रभागे सन्निषण्णः स्थितः मत्तानां कोकिलानां यः समुदायः समूहः स येन तादृशः । व्यावल्गत्तराणामतीव चञ्चलानां कराङ्गुलीनां सम्पर्केण सम्बन्धेन करणेन जनितः उत्पादितः विश्वजनानां सकलजनानां कर्णयोः सुखापादकः आनन्दसम्पादकश्च यः निनादः शब्दः स यस्याः तादृशी या वीणा तस्याः निस्सरन्तीनां निर्गच्छन्तीनां विविधानां नानाप्रकाराणां "चतुश्चतुश्चतुश्चैव षड्जमध्यमपञ्चमाः । द्विर्द्विर्निषादगान्धारौ त्रिस्त्रिर्ऋषभधैवतौ" । इति सप्तस्वपि स्वरेषु सम्भूय द्वाविंशतिविधानामित्यर्थः । श्रुतीनां स्वरारम्भकावयवानां शब्दविशेषाणाम् । श्रुतिलक्षणं च "प्रथमश्रवणाच्छब्दः श्रूयते भासमात्रतः । सा श्रुतिः सम्परिज्ञेया स्वरावयवलक्षणा" । मण्डलेभ्यः समूहेभ्यः उद्भिन्नः सम्भूतः स्वरनिकरः स्वराणां निषादादीनां समूहो येन

कल्याणी विश्वरम्या नवरसभरिता कुर्वती तुष्टिमन्त-
र्नित्यं नीलाम्बरीयानुजरुचिरकथासारयुक्ता वरेण्या।
सारङ्गादीन् मृगानप्यहह विदधती मोदपीयूषमग्ना-
नेतेषां गायकानां लसति निरुपमा कापि गीतिर्मनोज्ञा ॥

तादृशः । "निषादर्षभगान्धारषड्जमध्यमधैवताः। पञ्चमश्चेत्यमी सप्त तन्त्रीकण्ठोत्थिताः स्वराः" इत्यमरः। श्रुत्यारब्धमनुरणनं स्वरः । तदुक्तं रत्नाकरे— "श्रुत्यनन्तरभावी यः शब्दोऽनुरणनात्मकः। स्वतो रञ्जयति श्रोतुश्चित्तं स स्वर उच्यते ।" इति । मधुरतरं यद् हरिचरितं श्रीपद्मनाभचरित्रं तन्मयस्य साहित्यस्य गानेन । दिवि आकाशे । लसन्तं शोभमानम् । हाहाहूहूप्रमुखानां गन्धर्वाणां निकरं समूहमपि । 'हाहा हूहूश्चैवमाद्या गन्धर्वा' इत्यमरः । विस्मयेन अनन्यसाधारणगानमाधुर्यजनिताद्भुतेन ईर्ष्यया स्वकीयगानाद् अतिशयितत्वज्ञानजनितासूयया च कलुषीभूतं कलुषितं कुर्वाणः, गायकसमुदायः गायकसमूहः । समुल्लसति शोभते ॥ ३१ ॥

कल्याणीति । कल्याणी मङ्गलकारिणी । विश्वेषां सर्वेषां रम्या मनोहरा । नवभिः नवैर्वा रसैर्भरिता पूरिता । अन्तः अन्तर्भागे । मनसीत्यर्थः । नित्यं, तुष्टिं सन्तोषं । कुर्वती जनानामिति शेषः । नीलाम्बरीयस्य नीलाम्बरसम्बन्धिनः अनुजस्य नीलाम्बरानुजस्येत्यर्थः, श्रीकृष्णस्येति यावत्, रुचिरा मनोहरा या कथा तस्याः सारेण युक्ता सहिता । वरेण्या श्रेष्ठा । सारङ्गादीन् हरिणप्रमुखान् । मृगानपि । मोद एव पीयूषे अमृते मग्नान् । विदधती कुर्वाणा । निरुपमा निस्तुला । मनोज्ञा, एतेषां गायकानां, कापि अनिर्वचनीयेत्यर्थः । गीतिः गानं । लसति शोभते । अहह अद्भुतम् । 'अहहेत्यद्भुते खेद' इत्यमरः । अत्र गानस्य प्रस्तुतत्वात् कल्याणीनवरसनीलाम्बरीसारङ्गकापीत्यादिरागनाम्नामपि प्रकृतार्थाविरोधितया अक्लेशेन च प्रकटितत्वात् चमत्कारातिशयविशिष्टमुद्रालङ्कारः । "सूच्यार्थसूचनं मुद्रा प्रकृतार्थपरैः पदैः" इति लक्षणात् ॥ १४ ॥

अथामुं महोत्सवमालोक्य निस्तुलानन्दभारभरितो मुनिमण्डलः सान्द्रतरानन्दमन्दिरायितममुं भगवन्तमम्भोजनाभं विमलतराभिर्गीर्भिरभिषिञ्चति ॥ ३२ ॥

एकत्र समस्तबृन्दारकबृन्दपरिवृतः सहस्राक्षो निजनयननलिनसहस्रविस्रवदानन्दबाष्पो भगवन्तं संस्तौति ॥३३॥

अष्टमोत्सवदिने च भगवानम्भोजनाभस्तुङ्गतरगाङ्गेयरूपविहङ्गपुङ्गववाहनमेवालङ्कुर्वन्नात्मनिरीक्षणसञ्जातानङ्गविकारस्य दिविषदङ्गनाजनस्य हृदयेषु कामपि सुधावृष्टिमादधानो विलसति ॥ ३४ ॥

अथेति । अथ अमुं महोत्सवम्, आलोक्य दृष्ट्वा । निस्तुलेन निरुपमेन आनन्दभारेण भरितः । मुनिमण्डलः ऋषिसमूहः । सान्द्रतरस्य अतीव सान्द्रस्य आनन्दस्य मन्दिरायितं निलयभूतं । भगवन्तम्, अमुम्, अम्भोजनाभं श्रीपद्मनाभं । विमलतराभिः अतीव निर्मलाभिः गीर्भिः अभिषिञ्चति, स्तौतीत्यर्थः ॥ ३२ ॥

एकत्रेति । एकत्र, समस्तैः सकलैः बृन्दारकबृन्दैः देवसमूहैः परिवृतः सहस्राक्षः इन्द्रः । निजानां नयननलिनानां नलिनोपमनेत्राणामित्यर्थः । सहस्राद् विस्रवन्निष्यन्दमानः यः आनन्दबाष्पः सन्तोषजन्याश्रु स यस्य तादृशः सन् । भगवन्तं श्रीपद्मनाभं । संस्तौति सम्यक् स्तुतिं करोति ॥ ३३ ॥

अष्टमोत्सवेति । भगवान्, अम्भोजनाभः श्रीपद्मनाभः । अष्टमोत्सवदिने च तुङ्गतरम् अत्युन्नतं गाङ्गेयरूपं स्वर्णमयं विहङ्गपुङ्गववाहनं गरुडवाहनमेव । अलङ्कुर्वन्, आत्मनिरीक्षणेन स्वावलोकनेन सञ्जातः अनङ्गविकारः कामविकारो यस्य तादृशस्य । दिविषदङ्गनाजनस्य देवस्त्रीजनस्य । हृदयेषु चित्तेषु । कामपि अनिर्वचनीयामित्यर्थः । सुधावृष्टिं लक्षणया आनन्दवर्षम् आदधानः कुर्वाणश्च सन् विलसति शोभते ॥ ३४ ॥

तदानीं तस्य तु भगवतः साक्षादिन्दिरारमणस्य पुरतः स्वकान्तितिरस्कृतहेमशिखरिशिखरो जाम्बूनदमयः कुम्भः सन्निहितो भवति ॥ ३५ ॥

सोऽयं हेममयस्तदा स्वमहसा प्रद्योतिताशाचयः
कुम्भः संभृतकौतुकैः किल जनैर्विन्यस्तवित्तोत्करः ।
राजत्यस्य जगद्गुरोरिह पुरो भक्त्या नतैस्तत्पद-
द्वन्द्वाम्भोरुहयोः समस्तपरितापच्छेदनिष्णातयोः ॥ १५ ॥

अथ तावदेतादृशानन्यसाधारणोत्सवश्रियं निरीक्ष्यानन्दाम्बुधिमग्नो विदूरागतो जनसमूहो विस्मित्य विस्मित्येतस्ततो भ्रमति ॥ ३६ ॥

---

तदानीमिति । तदानीम् अष्टमोत्सवदिनघोषयात्रारम्भकाले । साक्षात् प्रत्यक्षभूतस्य । इन्दिरारमणस्य लक्ष्मीभर्तुः । तस्य, भगवतः श्रीपद्मनाभस्य । पुरतः पुरोभागे तु । स्वया आत्मीयया कुम्भसम्बन्धिन्येत्यर्थः कान्त्या तिरस्कृतं निराकृतम् अधःकृतमित्यर्थः हेमशिखरिणः महामेरोः शिखरं शृङ्गं येन तादृशः । जाम्बूनदमयः स्वर्णमयः । कुम्भः, सन्निहितो निक्षिप्तो भवति ॥ ३५ ॥

सोऽयमिति । तदा, हेममयः स्वर्णमयः । स्वमहसा स्वतेजसा । इह भूमौ । प्रद्योतितः प्रकर्षेण प्रकाशितः आशाचयः दिक्समूहो येन तादृशः । सः अयं कुम्भः, समस्तानां परितापानां सन्तापानां छेदे विनाशने निष्णातयोः निपुणयोः । तत्पदद्वन्द्वाम्भोरुहयोः द्वन्द्वभूतयोरम्भोरुहयोरिव तत्पदयोः श्रीपद्मनाभपदयोः । भक्त्या, नतैः नमस्कुर्वद्भिः । सम्भृतकौतुकैः जनैः, विन्यस्तः निक्षिप्तः वित्तोत्करः धनसमूहो यस्मिन् तादृशः सन् । जगद्गुरोः जगन्नाथस्य । अस्य श्रीपद्मनाभस्य । पुरः पुरोभागे । राजति शोभते किल ॥१५॥

अथेति । अथ, तावद् घोषयात्राकाले । विदूराद् दूरदेशात् । आगतः प्राप्तः । जनसमूहः, एतादृशी अनन्यसाधारणा च या उत्सवश्रीः उत्सवलक्ष्मीः तां निरीक्ष्य दृष्ट्वा । आनन्दाम्बुधौ सन्तोषसागरे मग्नः । विस्मित्य विस्मित्य इतस्ततः, भ्रमति चलति ॥ ३६ ॥

अथ तदानीं विविधतरवेषाकलननिपुणाः केचन समस्तजनान् विस्मयसस्मितान् कुर्वन्ति ॥ ३७ ॥

नानावादित्रजालोदितनिखिलजगद्व्याप्तपीयूषधारा-
तुल्यारावातिसक्तश्रवणपुटयुगाः सान्द्रसन्तोषमग्नाः ।
प्रत्यग्रानेकसूनोद्गतपरिमलसंसक्तनासाश्च मूर्तौ
लोकेशस्येह मग्नाक्षियुगललसिताश्चापि लोका भवन्ति ॥

किञ्चैते जनाः परमानन्दावहेष्वमीषु वस्तुष्वर्पितहृदयत्वादितिकर्तव्यताशून्या जायन्ते ॥ ३८ ॥

अथ केचनाशनपानादिषु निरतत्वेनेषत्सञ्जातविलम्बाः क्षुधा विवशाः स्तनन्धयाः स्वजननीसविधमिव सोत्कण्ठाः पलायमानाः समागच्छन्ति ॥ ३९ ॥

**अथेति** । अथ तदानीं, विविधतराणां वेषाणाम आकलने रचने बहुप्रकारेण वेषप्रच्छादने इत्यर्थः निपुणाः समर्थाः । केचन समस्तजनान्, विस्मयेन अद्भुतेन सस्मितान् समन्दहासान् । कुर्वन्ति ॥ ३७ ॥

**नानावादित्रेति** । इह लोकाः जनाः । नानावादित्राणां नानाविधानां वादित्राणां वाद्यानां जालात् समूहात् उदित उत्पन्नो निखिलेषु जगत्सु व्याप्तः पीयूषधारया अमृतधारया तुल्यः सदृशश्च यः आरावः शब्दः तस्मिन् अति अत्यन्तं सक्तं तत्परं श्रवणपुटयुगं येषां तादृशाः । प्रत्यग्राणि नूतनानि अनेकानि नानाप्रकाराणि च यानि सूनानि पुष्पाणि तेभ्यः उद्गते उद्भूते परिमले सौरभ्ये संसक्ता आसक्ता नासा नासिका येषां तादृशाः । लोकेशस्य श्रीपद्मनाभस्य । मूर्तौ शरीरे । मग्नेन अक्षियुगलेन नेत्रयुग्मेन लसिताः अपि सन्तः । सान्द्रे निबिडे सन्तोषे मग्ना भवन्ति ।' ११ ॥

**किञ्चेति** । किञ्च एते जनाः, परमानन्दावहेषु परमानन्दसम्पादकेषु । अमीषु, वस्तुषु पदार्थेषु । अर्पितहृदयत्वात् न्यस्तचित्तत्वात् । इतिकर्तव्यतया कर्तव्यताप्रकारेण शून्याः रहिताः । जायन्ते भवन्ति ॥ ३८ ॥

**अथेति** । अथ केचन, अशनपानादिषु, निरतत्वेन तत्परत्वेन हे-

केचिदथास्मिन्नेव स्यानन्दूरपुरे चिरेण वसद्भिर्नीय-मानास्ताननुयान्तश्चरन्ति ॥ ४० ॥

इति स्यानन्दूरपुरवर्णनप्रबन्धे उत्सवप्रशंसा नाम

षष्ठः स्तबकः ।

---

तुना । ईषत्सञ्जातविलम्बाः सन्तः क्षुधा विवशाः परवशाः । स्तनन्धया बालाः । स्वजननीसाविधं स्वमातृसमीपमिव । सोत्कण्ठाः इच्छाविशेषसहिताः । पलायमाना विद्रवन्तश्च सन्तः । समागच्छन्ति सम्प्राप्नुवन्ति ॥ ३९ ॥

**केचिदिति** । अथ केचित् अस्मिन्नेव स्यानन्दूरपुरे, चिरेण चिरका-लादारभ्य । वसद्भिर्जनैरिति शेषः । नीयमानाः, तान् नेतॄनित्यर्थः । अ-नुयान्तः अनुगच्छन्तश्च सन्तः । चरन्ति ॥ ४० ॥

इति स्यानन्दूरपुरवर्णनप्रबन्धव्याख्यायां

षष्ठः स्तबकः ।

## अथ सप्तमः स्तबकः ।

नवमोत्सवदिने तु स भगवानम्भोरुहनाभः सत्रभोजिजनपरमानन्ददायकः पत्त्रिवरेण्यवाहनमलङ्कुर्वन् विलसति ॥

तस्मिन्नथ वासरे पूर्वदिनेष्विव घोषयात्रया श्रीबलिमण्डपमलंकुर्वन्नप्याखेटयात्रामिषात् पश्चिमद्वारमार्गेण निशि निजालयाद् बहिर्निःसरन् चिरविधृतस्वनिरीक्षणकौतुकानामालयान्तरागन्तुमनर्हाणां नयनानि शिशिरीकुरुते ॥ २ ॥

द्रक्ष्यामो वयमद्य विश्वजगतां नाथं रमावल्लभं
पक्षीन्द्रांसविराजमानममलं श्रीपद्मनाभं हरिम् ।

**नवमोत्सवेति** । भगवान् सः, अम्भोरुहनाभः श्रीपद्मनाभः । नवमोत्सवदिने, पत्त्रिवरेण्यवाहनं गरुडवाहनम् । 'पतत्रिपत्त्रिपतगे'त्यमरः । अलङ्कुर्वन्, तदारूढ इत्यर्थः । विलसति शोभते ॥ १ ॥

**तस्मिन्निति** । अथ, अम्भोरुहनाभ इत्यत्रापि योज्यम् । तस्मिन् वासरे नवमोत्सवदिन इत्यर्थः । पूर्वदिनेष्विव प्रथमोत्सवदिनमारभ्याष्टमोत्सवपर्यन्तदिवसेष्विवेत्यर्थः । घोषयात्रया श्रीबलिमण्डपमलङ्कुर्वन् अपि, आखेटो मृगया । 'आखेटो मृगया स्त्रिया'मित्यमरः । तदर्थं या यात्रा तन्मिषात् तद्व्याजेन । निशि रात्रौ । पश्चिमद्वारमार्गेण निजालयाद् , बहिः बहिर्भागे । निस्सरन् निर्गतः सन् । चिरविधृतं चिरकालादारभ्य विधृतं स्वनिरीक्षणे आत्मावलोकने यत् कौतुकं तद् यैः तादृशानाम् । आलयान्तः आलयान्तर्भागे । आगन्तुं प्राप्तुं प्रवेष्टुमित्यर्थः । अनर्हाणाम् अयोग्यानां, जात्या किञ्चिदधमानामित्यर्थः । नयनानि नेत्राणि । शिशिरीकुरुते, शीतलीकुरुते, आनन्दयतीत्यर्थः । आखेटयात्रामिषादित्यत्र मिषशब्दात् परमकारुणिकस्य श्रीपद्मनाभस्यालयबहिर्गमनम् आलयान्तर्भागागमनानर्हजननयनानन्ददानार्थमेव, न तु मृगयार्थमित्यपह्नवः ॥ २ ॥

**द्रक्ष्याम इति** । अद्य वयं, विश्वेषां सर्वेषां जगतां । नाथं स्वामिनं । रमावल्लभं लक्ष्मीपतिं । पक्षीन्द्रस्य गरुडस्य अंसे भुजशिरसि विराजमानं

**इत्येवं कथयत्सु लोकनिकरेषूच्चैर्मिथः सस्पृहं**
**राजत्यम्बुजनाभ एष तु तमो निघ्नन् यथैवोडुराट् ॥ १ ॥**

**अथ तदानीं चिरविधृतभगवद्दर्शनकुतूहलो जनसमूहः परमानन्दनिमग्नतां दधाति ॥ २ ॥**

**अथ तावत् सङ्ख्यातीतजननिकरकरोद्धृतकरदीपिकासमुदिता रुचिः सूचिभेद्यतिमिरमयमत्तवारणघटासु मृगेन्द्रलीलामावहन्ती निशीथं दिवसंमन्यं रचयति ॥ ४ ॥**

---

शोभमानम् । अमलं निर्मलं श्रीपद्मनाभं, द्रक्ष्यामः अवलोकयिष्यामः । इति एवं, लोकनिकरेषु जनसमूहेषु । सस्पृहम् उच्चैः मिथः अन्योन्यं कथयत्सु सत्सु एषः अम्बुजनाभः श्रीपद्मनाभः तु । उडुराट् चन्द्रः । यथा तथैव, तमः अज्ञानम् अन्धकारं च । निघ्नन् निवारयन् सन् । राजति शोभते ॥ १ ॥

**अथेति** । अथ, तदानीम् आखेटयात्राकाले । चिरं चिरकालं विधृतं भगवद्दर्शने यत् कुतूहलं कौतुकं तत् येन तादृशः । जनसमूहः परमानन्दनिमग्नतां दधाति ॥ २ ॥

**अथेति** । अथ तावत्, सङ्ख्यातीतानां निस्सङ्ख्यानामित्यर्थः जनानां निकरस्य समूहस्य करैरुद्धृता याः करदीपिकाः ताभ्यः समुदिता उत्पन्ना । रुचिः कान्तिः । सूचिभेद्यं सूच्या कण्टकेन भेत्तुं योग्यं यत् तिमिरम् अन्धकारम् । सूचिभेद्यमित्यनेन विशेषणेन तिमिरस्य नैबिड्यं सूचितम् । तन्मया ये मत्तवारणाः मत्तगजाः । तमसि मत्तवारणत्वारोपस्तु कार्ष्ण्यरूपसाधर्म्यात् । तेषां घटासु घटनासु । मृगेन्द्रलीलां सिंहलीलाम् । आवहन्ती कुर्वाणा सती । सिंहा यथा मत्तवारणघटासु गत्वा क्षणेन तद्विनाशं कुर्वन्ति, तथा तमस्समूहे गत्वा तद्विनाशकरी सतीत्यर्थः । निशीथम् अर्धरात्रम् । 'अर्धरात्रनिशीथावि'त्यमरः । दिवस इति मन्यते आत्मानामिति दिवसंमन्यः तादृशं, दिवससदृशमित्यर्थः । रचयति करोति । निशीथस्याप्यशेषत एवान्धकारनिवारणे दिवसंमन्यत्वं भवत्येवेति भावः ॥ ४ ॥

अपिचैवमनया शोभया समस्तभुवनेषु नष्टतमःसु स्वर्भानुरपि नामसाम्याच्चकितस्त्रिभुवनदीपौ शशिदिवाकरौ ग्रसितुमपि बिभेति ॥ ५ ॥

अथ तावदवलम्बितमृगयागमनत्वात् समागतनिखिलजनसमूहो विधृतमौनश्चरति ॥ ६ ॥

किञ्चैतत्करदीपिकासमुदिता कान्तिर्जगन्मोहिनी
राराजीत्यनुबिम्बिता खलु तदा भूषामणीनां गणे ।
लक्ष्मीकान्ततनौ धृते विदधती चामेयया शोभया
नेत्राणीह दिवौकसां तु नितरां सम्मीलितानि ध्रुवम् ॥ २ ॥

अपिचेति । अपि च किञ्च अनया करदीपिकासमुदितयेत्यर्थः । शोभया रुच्या । समस्तभुवनेषु सर्वलोकेषु । नष्टतमस्सु विगतान्धकारेषु सत्सु । स्वर्भानुः राहुः । नामसाम्यात् तमोरूपनामैक्यादित्यर्थः । चकितः भीतः सन् । सकलभुवनगततमोविनाशिनी इयं करदीपिकासमुदितरुचिः तमःशब्दवाच्यं मामपि विनाशयेद्वेति भीतः सन्नित्यर्थः । त्रिभुवनदीपौ त्रैलोक्यप्रदीपायितौ । शशिदिवाकरौ चन्द्रसूर्यौ । ग्रसितुमपि, बिभेति भीतो भवति । भीत्या बहिर्न निर्गच्छतीत्यर्थः । सम्बन्धातिशयोक्तिः ॥ ५ ॥

अथेति । तावत्, समागतः सम्प्राप्तः निखिलः जनसमूहः । अवलम्बितमाश्रितं मृगयार्थं यद् गमनं तद् येन सः अवलम्बितमृगयागमनः तादृशत्वात् । विधृतम् अवलम्बितं मौनम् अभाषणं येन तादृशः सन् । चरति गच्छति ॥ ६ ॥

किञ्चेति । किञ्च तदा खलु, एताभ्यः करदीपिकाभ्यः समुदिता उत्पन्ना । जगन्मोहिनी जगन्मनोहारिणी । इह, लक्ष्मीकान्तस्य श्रीपद्मनाभस्य तनौ शरीरे । धृते, भूषामणीनां भूषणरत्नानां गणे समूहे । अनुबिम्बिता प्रतिबिम्बिता च कान्तिः प्रभा तु । अमेयया मातुमशक्यया । शोभया, दिवौकसां देवानां । नेत्राणि, नितराम् अत्यन्तं सम्मीलितानि निमीलितानि । ध्रुवं, विदधती कुर्वती सती । राराजीति अतीव शोभते ॥ २ ॥

अप्येषा रुचिरधोभुवनेषु च वितता तत्र च सान्द्रान्धकारनिर्मूलनक्षमनिस्तुलरुचिनिकेतनीभूतरत्नजालगर्वितमहाभुजगफणानिकरान्मन्दाक्षावाङ्मुखान् कुरुते ॥ ७ ॥

किञ्च भगवद्घोषयात्रार्थमपसारिततृणकण्टकशर्करादिषु विकीर्णविशदवालुकासु रथ्यासूभयपार्श्वयोर्विलसन्त्यः क्रमुकनालिकेररम्भासमलङ्कृताः प्रदीप्तविविधदीपमालिकाप्रकाशमानास्त्वालयपङ्क्तयो मदं हरन्ति पुष्पकविमानस्य ॥ ८ ॥

अपिच तत्तत्सदनवासिनो जनास्त्वद्य निखिलजग-

---

**अपीति** । अपि अपि च । एषा, रुचिः कान्तिः । अधोभुवनेषु पातालादिषु च । वितता विस्तृता । तत्र पातालादिषु च । सान्द्रान्धकारस्य अन्धतमसस्य निर्मूलने विनाशने क्षमा शक्ता निस्तुला निरुपमा च या रुचिः कान्तिस्तस्याः निकेतनीभूतानि वासस्थानभूतानि यानि रत्नानि तेषां जालेन समूहेन गर्विताः महाभुजगानां महासर्पाणां ये फणानिकराः तान् । मन्दाक्षेण लज्जया । 'मन्दाक्षं ह्रीस्त्रपा व्रीले'त्यमरः । अवाङ्मुखान् अधोमुखान् । कुरुते ॥ ७ ॥

**किञ्चेति** । किञ्च, भगवतः श्रीपद्मनाभस्य घोषयात्रार्थम् अपसारिताः दूरीकृताः तृणकण्टकशर्कराः याभ्यस्तादृशीषु । शर्करा क्षुद्रपाषाणविशेषः । विकीर्णा विक्षिप्ताः विशदा धवलाश्च वालुकाः सिकता यासु तादृशीषु । रथ्यासु वीथिषु । 'रथ्या प्रतोली विशिखे'त्यमरः । उभयपार्श्वयोः पार्श्वद्वयेऽपीत्यर्थः । विलसन्त्यः शोभमानाः । क्रमुकैः पूगफलैः नालिकेरैः रम्भाभिश्च समलङ्कृताः सम्यगलङ्कृताः । प्रदीप्ता विविधा नानाविधाश्च याः दीपमालिकाः दीपपङ्क्तयस्ताभिः प्रकाशमानाः । आलयपङ्क्तयो गृहावल्यस्तु । पुष्पकविमानस्य पुष्पकाख्यव्योमयानस्य । मदं गर्वं हरन्ति अपनुदन्ति । पुष्पकविमानादप्यधिकमनोहरा भवन्तीति भावः ॥ ८ ॥

**अपिचेति** । अपि च, तत्तत्सदनवासिनः तत्तद्भवनस्थिताः । 'निशान्तवस्त्यसदनभवनागारमन्दिरमि'त्यमरः । जनास्तु, निखिलजगदीश्वरः स-

दीश्वरो भगवानम्भोजनाभो ह्यस्मद्गृहमार्गेणायातीति कौ-तुकेन सस्पर्धं यथाशक्ति स्वगृहानलङ्कुर्वन्ति ॥ ९ ॥

गेहेष्वेतेषु रम्येष्वतिविमलगवाक्षान्तसन्दृश्यमाना-
मेयश्रीयुक्तराकातुहिनकरमदच्छेदिवक्त्रास्तरुण्यः ।
सोत्कण्ठा घोषयात्राश्रियमिह नयनाभ्यां प्रपातुं नितान्तं
लक्ष्मीकान्तस्य लोकेशितुरपि दयितैः स्वैः समेता लसन्ति ॥

अथ पुष्पबाणवल्लभामन्दाक्षसन्दायिन्यो ह्येता महोत्सवनिरीक्षणसमागतसमस्तजनसमूहं स्मरपारवश्यनिश्चेष्टं कुर्वन्ति ॥ १० ॥

कललोकनाथः । भगवान्, अम्भोजनाभः श्रीपद्मनाभः हि । अद्य अस्मिन् दिने । अस्माकं गृहमार्गेण भवनसमीपमार्गेण । आयाति, इति एवम्प्रकारेण । कौतुकेन कुतूहलेन हेतुना । सस्पर्धं समत्सरं यथा तथा । यथाशक्ति शक्त्यनुगुणं स्वगृहान् स्वस्वभवनानि । अलङ्कुर्वन्ति भूषयन्ति ॥ ९ ॥

गेहेष्विति । रम्येषु मनोहरेषु । एतेषु रथ्योभयपार्श्वस्थितेषु । गेहेषु गृहेषु । अतिविमलैः अतीव निर्मलैः गवाक्षान्तैः गवाक्षमध्यैः सन्दृश्यमानानि सम्यगवलोक्यमानानि अमेयया श्रिया शोभया युक्तानि सहितानि अत एव राकातुहिनकरस्य पूर्णचन्द्रस्य मदच्छेदीनि गर्वनाशकराणि ततोऽपि मनोहराणीत्यर्थः यानि वक्त्राणि मुखानि तानि यासां तादृश्यः । लोकेशितुः जगन्नाथस्य । लक्ष्मीकान्तस्य श्रीपद्मनाभस्य । घोषयात्राश्रियं घोषयात्रालक्ष्मीं नयनाभ्यां नेत्राभ्यां नितान्तम् अत्यन्तं प्रपातुं प्रकर्षेण पातुं सोत्कण्ठा इच्छासहिताः । स्वैः आत्मीयैः । दयितैरपि दयितैश्च । समेता युक्ताः । तरुण्यः स्त्रियः । लसन्ति शोभन्ते ॥ ३ ॥

अथेति । अथ, पुष्पबाणवल्लभायाः रतीदेव्या मन्दाक्षसन्दायिन्यः लज्जासन्दायिन्यः, रतीदेव्या अप्यधिकसौन्दर्यशालिन्य इत्यर्थः । एताः स्त्रियः हि । महोत्सवस्य निरीक्षणार्थमवलोकनार्थं समागताः सम्प्राप्ताः समस्ता ये

नानाहेतिसमूह[?]ाजितकरा वीराः परानात्मनः
कुर्वन्तः [?] वि[?]तानिह परं नामश्रुतावाहवे ।
अस्याग्रे जग[?]ीश्वरस्य मिलि[?]ाः सर्वे ह्यमी सञ्चर-
न्त्यारात् सर्वजनांस्तु *[?]स्मययुतानाशु प्रकुर्वन्ति च ॥

एवमस्यां घोषयात्रायां सम्मिलितेषु समस्तजनेषु कलितमौनमुद्रेषु निभृतपदं सञ्चरत्सु स भगवानम्भोजनाभः केलिमृगयार्थं नीरन्ध्रतरमहीरुहसान्द्रविपिनानुकारिणि परिष्कृतप्रदेशे निजपरिजननिवहावृतो निखिलजननयनानन्ददायकमूर्तिर्विलसति ॥ ११ ॥

---

जनास्तेषां समूहम् । स्मरपारवश्येन कामपारवश्येन निश्चेष्टं निर्व्यापारं, स्वावलोकनमात्रपरमिति यावत् । कुर्वन्ति सर्वानपि मोहयन्तीत्यर्थः ॥ १० ॥

नानेति । नानाप्रकारिणीनां हेतीनामायुधानां समूहेन राजिताः शोभिताः करा येषां तादृशाः । इह, परान् शत्रून् । आहवे युद्धे । आत्मनः, परं केवलं । नामश्रुतौ नामश्रवणे । विद्रुतान् पलायितान् । कुर्वन्तः खलु, एतेन तेषां भीषणत्वमुक्तम् । सर्वे अमी, वीराः शूराः हि । मिलिताः सर्वेऽपि समं सङ्गत्येत्यर्थः । जगदीश्वरस्य, अस्य श्रीपद्मनाभस्य । अग्रे पुरोभागे । आरात् समीपे । सञ्चरन्ति । सर्वजनान् तु आशु, विस्मययुतान् विस्मयशालिनः । प्रकुर्वन्ति प्रकर्षेण कुर्वन्ति च ॥ ४ ॥

एवमिति । निखिलानां जनानां नयनयोः नेत्रयोः आनन्दसन्दायिनी सन्तोषप्रदा मूर्तिः शरीरं यस्य तादृशः । भगवान् सः, अम्भोजनाभः श्रीपद्मनाभः । अस्यां घोषयात्रायाम् एवं, सम्मिलितेषु समागतेषु । समस्तजनेषु, कलितमौनमुद्रेषु स्वीकृतमौनेषु । निभृतपदं निःशब्दपदविन्यासं यथा तथा । सञ्चरत्सु सत्सु । नीरन्ध्रतरा अतीव निबिडाः ये महीरुहाः वृक्षाः तैः सान्द्रं निबिडं यद् विपिनं तदनुकारिणि तत्सदृशे । केलिमृगयार्थं लीलामृगयायै ।

---

*विस्मयवशानिति मूलसम्मतः पाठः ।

तदानीं निस्तुलभूतदयावारांनिधिः स भगवानरविन्द-नाभो वध्यमृगस्थाने कल्पितं नालिकेरफलं निजचरणभृत्येन बाणदलितं कारयन्. परमानन्दमाविन्दते ॥ १२ ॥

अथ तावत् त्रिभुवनसुन्दरयौवतसहितजलक्रीडार्थावतीर्णकार्तवीर्यधरणीरमणविस्तृतबाहुसहस्रनिरुद्धोन्मुक्तविशृङ्खलतमभङ्गचलनसशब्दीभूतरेवाजलप्रवाहानुकारी मुहुर्मुहु-

---

परिष्कृते अलङ्कृते प्रदेशे । निजेन आत्मीयेन परिजननिवहेन परिकरसमूहेन आवृतः परिवृतः सन् । विलसति शोभते ॥ ११ ॥

**तदानीमिति** । निस्तुला या भूतदया तस्या वारांनिधिः सुमुद्रः । भगवान् सः, अरविन्दनाभः श्रीपद्मनाभः वध्यमृगस्थाने कल्पितं वध्यमृगप्रतिनिधित्वेन निक्षिप्तमित्यर्थः । नालिकेरफलं, निजचरणभृत्येन निजचरणदासेन । एतत्प्रबन्धकर्तुर्महाराजस्य यशःप्रतापादिगुणप्राप्तानेकनामसद्भावेऽपि स्वनाम्नः स्वेन साक्षादसङ्कीर्तनीयतया भक्त्यतिशयेन च **श्रीपद्मनाभदासे**त्यादिप्रसिद्धतरनिजनामैकदेशभूतश्रीपद्मनाभदासपदापरपर्यायं प्रकरणात् श्रीपद्मनाभवाचकनिजशब्दघटितनिजचरणभृत्येनेत्येतत् पदमुक्तमिति ध्येयम् । तथाच 'नामैकदेशे नामग्रहणमि'ति न्यायात् **श्रीपद्मनाभदासवञ्चिपालरामवर्मकुलशेखरभूपालक**नामधेयेनैतत्प्रबन्धकर्त्रा महाराजेनैवेत्यर्थः । बाणदलितं बाणच्छिन्नं कारयन्, परमानन्दम् उत्कृष्टसन्तोषम् । आविन्दते लभते । अत्र भूतदयावारांनिधित्वेन साक्षान्मृगस्थाने प्रतिनिधिकल्पनमिति ॥ १२ ॥

**अथेति** । अथ, तावद् नालिकेरविदलनानन्तरकाले । त्रिभुवनसुन्दरेण लोकोत्तरसौन्दर्यवता यौवतेन युवतिवृन्देन सहितो युक्तः सन् जलक्रीडार्थमवतीर्णः कृतावतरणः अर्थाद् रेवायां यः कार्तवीर्यधरणीरमणः कार्तवीर्यनृपः तस्य विस्तृतं विशालं यद् बाहुसहस्रं भुजसहस्रं तेन पूर्वं निरुद्धो निवारितः अनन्तरमुन्मुक्तो विशृङ्खलतमानाम् अतीवानवरतप्रसारिणां भङ्गानां वीचीनां चलनेन सशब्दीभूतश्च यः रेवाजलप्रवाहः नर्मदाजलनिर्झरः। 'रेवा तु नर्मदे'-

रतिनिपुणकञ्चुकिजननिकरेण सगलहस्तिकम् अपसरतापसरतेति वदता निवारितोऽप्यनिवृत्तो विरम विरम पद्मनाभं सकृद्विलोक्य व्रजाम इत्यभिभाषमाणः सन्तोषसान्द्रोऽपरिमितजनसमूहो विलसति ॥ १३ ॥

ये ये वादित्रनादाः परमिह विरताः पूर्वमाखेटयात्रा-
प्रस्तावे सर्वलोकेष्वपि कलितमिथोमौनमुद्रेष्वथैते ।
आरब्धास्त्वेककाले त्रिभुवनगतलोकश्रवांसि प्रकामं
कुर्वन्तो हन्त राजन्त्यमृतरसझरीसम्भृतानीह तावत् ॥

---

त्यमरः । तमनुकरोति विडम्बयतीति तथा तद्वदतिशीघ्रतया गच्छन्तित्यर्थः । अनेन बाहुल्यवेगातिशयावुक्तौ । कार्तवीर्यस्तु लीलार्थं बाहुसहस्रेण नर्मदानदीजलं निवार्य स्वभार्यादिभिः सह जलक्रीडाविधानावसाने पूर्वं बाहुसहस्रनिरुद्धजलं मुञ्चति स्मेति पुराणप्रसिद्धिः । सगलहस्तिकं गलहस्तोऽस्ति यस्मिन्कर्मणि तद् गलहस्तिकं क्षेपणकर्म तेन सहितं यथा तथेति निवारणक्रियाविशेषणम् । अपसरतापसरत गच्छत गच्छत । इति वदता, अतिनिपुणा ये कञ्चुकिजनाः तेषां निकरेण समूहेन । मुहुर्मुहुः पुनःपुनः । निवारितः अपि, अनिवृत्त अनपसृतः । विरम विरम पद्मनाभं सकृद् एकवारं विलोक्य दृष्ट्वा । व्रजामः गच्छामः । इति एवंप्रकारेण । अभिभाषमाणः सम्भाषमाणः । सन्तोषेण सान्द्रः, निबिडतरसन्तोषविशिष्ट इत्यर्थः । अपरिमितः अनल्पः जनसमूहः । विलसति शोभते ॥ १३ ॥

ये ये इति । पूर्वम्, इह अस्मिन् आखेटयात्राप्रस्तावे मृगयागमनप्रसङ्गे । सर्वलोकेषु समस्तजनेषु अपि । कलितमिथोमौनमुद्रेषु स्वीकृतान्योन्यमौनेषु सत्सु । ये ये, वादित्रनादाः वाद्यशब्दाः । परं निःशेषतयेत्यर्थः । विरता निवृत्ताः अभवन्निति शेषः । अथ मृगयानन्तरं । तावद् एते पूर्वविरताः । वादित्रनादास्तु । एककाले एकक्षणे, युगपदेवेत्यर्थः । आरब्धाः, त्रिभुवनगतानां त्रैलोक्यस्थितानां लोकानां जनानां श्रवांसि श्रवणानि । 'श्रवणं श्रव' इत्यमरः । इह प्रकामम् अधिकम् । अमृतरसझर्या अमृतरसप्रवाहेन सम्भृतानि

एवमपरिमितगायकवन्दिजननर्तकमुखानेकजनसमूहसमावृतपार्श्वः स भगवानम्बुजनाभश्चारुतरचामरतालवृन्तनिवहसंवीज्यमानो दिवि सकुतूहलं समागतैरानन्दभारसम्भृतैः सवनाशनपुरस्सरैर्जय विजयीभवेत्यभिष्टूयमानः शुभ्रतरसुधाक्षालितात्युन्नतविविधराजसदनमार्गे विलसन् पथि स्थितस्य स्वकान्तिसुधापानातृप्तनयनस्य जननिकरस्य तात्कालिकीमीषत्तृप्तिं दातुमिव मध्ये मध्ये किञ्चित्किञ्चिद् विलम्ब्य निजालयं प्रतिविशति ॥ १४ ॥

पूरितानि । कुर्वन्तः च सन्तः राजन्ति शोभन्ते । हन्तेति हर्षे । 'हन्त हर्षेऽनुकम्पायामि'त्यमरः ॥ ५ ॥

**एवमिति** । एवम् अपरिमिता अनल्पाः ये गायका वन्दिजनाः स्तुतिपाठकजनाः नर्तकाश्च तन्मुखानां तत्प्रभृतीनामनेकेषां बहूनां च जनानां समूहेन समावृतौ परिवृतौ पार्श्वौ यस्य तादृशः । भगवान् सः, अम्बुजनाभः श्रीपद्मनाभः । चारुतराणाम् अतीव मनोहराणां चामराणां बालव्यजनानां तालवृन्तानां व्यजनानां च निवहेन समूहेन सम्यग् वीज्यमानः । सकुतूहलं सकौतुकं यथा तथा । दिवि आकाशे । समागतैः सम्प्राप्तैः । आनन्दभारेण सन्तोषातिशयेन सम्भृतैः पूरितैः । सवनाशनाः देवाः पुरस्सराः प्रमुखा येषां तैः । जय सर्वोत्कर्षेण वर्तस्व । विजयी भव विजयशाली भव । इति एवंप्रकारेण । अभिष्टूयमानः स्तूयमानः । शुभ्रतरया अतीव श्वेतया सुधया लेपविशेषेण । 'सुधा लेपोऽमृतमि'त्यमरः, क्षालितानि लिप्तानि अतीवोन्नतानि विविधानि नानाप्रकाराणि च यानि राजसदनानि सौधाः तेषां मार्गे, तत्समीपमार्ग इत्यर्थः । विलसन् शोभमानः । पथि मार्गे । स्थितस्य, स्वकान्तिः आत्मशोभैव या सुधा अमृतं तस्याः पानेन अतृप्तानि तृप्तिमप्राप्तानि नयनानि नेत्राणि यस्य तादृशस्य । जननिकरस्य जनसमूहस्य ; तात्कालिकीं तत्कालभवाम् । ईषत्तृप्तिम् अल्पीयसीं तृप्तिं । दातुम्, इवेत्युत्प्रेक्षा । मध्ये किञ्चित्किञ्चिद् विलम्ब्य, निजालयं निजमन्दिरम् । प्रतिविशति ॥ १४ ॥

धन्या नूनमहो वयं त्रिजगतां नाथो रमावल्लभो
ह्यद्यासौ चरितार्थतां खलु दृशां कारुण्यसिन्धुर्व्यधात् ।
इत्येवं तु मुदा मिथः कथयतां नृणां वचांस्यादरा-
च्छ्रुत्वा सिद्धगणाः प्रहृष्टमनसः श्लाघामिहातन्वते ॥ ६ ॥

ततस्तु निजमन्दिरं प्रतिगतो भगवानम्बुजनाभो निजविमानवरमव्रजन्नेकशिलामण्डप एव विश्रान्त इव ससुखं निद्राति ॥ १५ ॥

निद्राणो बहिरेष भाति जगतां नाथो हि लक्ष्मीपति-
स्त्वायातो मृगयाश्रमात् प्रविकसत्सौरभ्यसूनाञ्चितः ।

---

धन्या इति । कारुण्यसिन्धुः दयासमुद्रः । त्रिजगतां नाथः त्रैलोक्याधिपतिः । असौ, रमावल्लभः श्रीपद्मनाभः खलु । अद्य अस्मिन् दिने । दृशां नेत्राणां । चरितार्थतां कृतार्थतां । व्यधात् चकार । हि यस्मात् । तस्माद् वयं, धन्याः सुकृतिनः । भवाम इति शेषः । नूनं निश्चयः इत्येवं, मुदा सन्तोषेण सह । मिथः अन्योन्यं । कथयतां वदतां । नृणां नराणां । वचांसि, आदरात् सादरं । श्रुत्वा, प्रहृष्टमनसः सन्तुष्टचित्ताः । सिद्धगणाः सिद्धसङ्घाः । इह, श्लाघां स्तुतिम् । आतन्वते कुर्वते । एते जना अतीव भाग्यशालिन इति श्लाघन्त इति भावः ॥ ६ ॥

ततस्त्विति । ततस्तु, निजमन्दिरं स्वगृहं । प्रतिगतो भगवान्, अम्बुजनाभः श्रीपद्मनाभः । विश्रान्तः क्लान्तः, इवेत्युत्प्रेक्षा । निजविमानवरं स्वविमानश्रेष्ठम् । अव्रजन् अप्रविष्टः । एकशिलामण्डपे पूर्वोक्तैकशिलामण्डपे एव । ससुखं यथा तथा । निद्राति स्वपिति ॥ १५ ॥

भगवतो बहिःशयनमुत्प्रेक्षते — **निद्राण** इति । जगतां लोकानां । नाथः, मृगया आखेटः सैव यः श्रमः आयासस्तस्मात् । ल्यब्लोपे पञ्चमी । मृगयारूपं श्रमं विधायेत्यर्थः । आयातः आगतः । प्रविकसत् प्रसरदित्यर्थः सौरभ्यं येषां तादृशैः सूनैः पुष्पैराञ्चितः अलङ्कृतः । एषः, लक्ष्मीपतिः श्रीप-

लक्ष्म्या नूनमिहान्ययोषिदभिकं चाशङ्क्य रोषान्धया
कान्तं रुद्धगतिः कवाटघटनादित्थं वयं मन्महे ॥ ७॥

इति स्यानन्दूरपुरवर्णनप्रबन्धे मृगयावर्णनं नाम

**सप्तमः स्तबकः ।**

---

ञ्जनाभः तु । कान्तं भर्तारम् । इह अस्मिन् लोके । अन्यस्यां योषिति स्त्रियाम् अभिकं कामनं । 'कमनः कामनोऽभिक' इत्यमरः । आशङ्क्य विभ्रम्य रोषेण ईर्ष्याकृतकोपेन अन्धया परवशया । लक्ष्म्या श्रीभगवत्या । कवाटघटनात् कवाटपिधानात् । रुद्धा प्रतिबद्धा गतिः अन्तःप्रवेशो यस्य तादृशः सन् । बहिः हि विमानबहिर्भाग एव । निद्राणः निद्रां कुर्वाणः । भाति शोभते । नून निश्चयः । 'नूनं तर्केऽर्थनिश्चये' इत्यमरः । वयम्, इत्थम् एवम्प्रकारेण । मन्महे सम्भावयामः । उत्प्रेक्षालङ्कारः ॥ ७ ॥

इति स्यानन्दूरपुरवर्णनप्रबन्धव्याख्यायां

सप्तमः स्तबकः ।

# अथाष्टमः स्तबकः ।

दशमोत्सवदिने तु स भगवानाशादशकमपि स्वमात्रशेषं तन्वतासङ्ख्येयेन जनसमूहेन संवृतः पक्षीन्द्रवाहन एव विराजमानः प्रतिदिनं निजघोषयात्रया कृतार्थीभूते श्रीबलिमण्डपे विलसन् पुनरिह वारिधौ स्नातुं कृतनिश्चयो निजालयपश्चिमद्वारमार्गेणैव प्राग्वद् बहिर्निस्सरति ॥ १ ॥

अथ तदानीमेतत्स्यानन्दूराविदूरस्थितविविधालयवर्तिनो देवाश्चास्य भगवतः पद्मनाभस्य सेवार्थमुद्युक्ताः सहर्षमत्युत्तमभूषणवसनाद्यलङ्कारद्विगुणीभूतरुचयस्तुङ्गतममातङ्गपुङ्गवसमधिरूढाश्चागत्यामुमनुयातुं सन्नद्धास्तिष्ठन्ति ॥ २ ॥

---

दशमोत्सवदिन इति । सः, भगवान् श्रीपद्मनाभः । दशमोत्सवदिने तु, आशादशकं दिग्दशकमपि । स्वमात्रम् आशादशकमेव शेषो यस्य तथा । तन्वता कुर्वता, निश्शेषेण सर्वदिग्भ्य आगतेनेत्यर्थः । असंख्येयेन संख्यातुमशक्येन । जनसमूहेन, संवृतः परिवृतः । पक्षीन्द्रवाहने गरुडवाहने एव । विराजमानः शोभमानः । प्रतिदिनं दिनं प्रति । निजया घोषयात्रया । कृतार्थीभूते श्रीबलिमण्डपे, विलसन् शोभमानः । पुनः अनन्तरम् । इह, वारिधौ समुद्रे । स्नातुं कृतनिश्चयः सन्, प्राग्वत् नवमोत्सवदिनवत् । निजालयस्य पश्चिमद्वारमार्गेण पश्चिमगोपुरद्वारा । बहिः, निस्सरति निर्गच्छति ॥ १ ॥

अथेति । अथ, तदानीं वारिधिस्नानगमनारम्भावसरे । एतस्य स्यानन्दूरपुरस्य अविदूरे समीपे स्थितेषु विविधेषु नानाप्रकारेषु आलयेषु क्षेत्रेषु स्थिता देवाः रुद्रादिदेवाः च । भगवतः अस्य श्रीपद्मनाभस्य सेवार्थं सहर्षं ससन्तोषम् । उद्युक्ताः अत्युत्तमैर्भूषणवसनादिभिः भूषणवस्त्राद्यैः अलङ्कारैर्द्विगुणीभूता द्विगुणिता रुचिः कान्तिः येषां तादृशाः । तुङ्गतमा अत्युन्नताः ये मातङ्गपुङ्गवाः गजश्रेष्ठास्तेषु समधिरूढाः च सन्तः । आगत्य, अमुं श्रीपद्मनाभम् । अनुयातुमनुगन्तुं । सन्नद्धास्तिष्ठन्ति ॥ २ ॥

अथ तदानीं हरिनिरीक्षणसंत्वरमाणा यथाशक्तिसमलङ्कृतविग्रहाः सङ्ख्याविहीननरनारीजनाः सकलरथ्याचत्वरादिप्रदेशांस्तथालङ्कुर्वन्ति, यथोपरिभागाद् विकीर्णस्तिलोऽप्यधो न पतति ॥ ३ ॥

किञ्चामी जनास्तु भगवद्दर्शनमयमहोत्सवसंसक्तहृदया योगिन इव तदेकध्याननिमग्ना भवन्ति ॥ ४ ॥

भक्तैर्भूरिदयापयोनिधिरिति स्त्रीभिश्च पञ्चायुधो
देवौघैर्वियति स्थितैर्निजपरीतापप्रणाशीति च ।
क्रूरैर्दानवपुङ्गवैर्निजकुलारण्याग्निरित्यानतैः
सिद्धैरर्थ इति श्रुतेस्तु भगवानालक्षितो भात्यसौ ॥ १ ॥

---

अथेति । अथ तदानीं हरिनिरीक्षणार्थं श्रीपद्मनाभदर्शनार्थं सन्त्वरमाणाः सम्यक्त्वरमाणाः । यथाशक्ति शक्त्यनुगुणं सम्यगलंकृता भूषिता विग्रहाः शरीराणि येषां तादृशाः । संख्याविहीनाः असंख्या नरनारीजनाः । सकलान् रथ्याचत्वरादीन् प्रदेशान् । तथा, अलङ्कुर्वन्ति निबिडीकुर्वन्तीत्यर्थः । उपरिभागाद् ऊर्ध्वभागात् । विकीर्णो विक्षिप्तः । तिलः अपि । यथा येन प्रकारेणालङ्कृतं चेदित्यर्थः । अधः न पतति ॥ ३ ॥

किञ्चेति । किञ्च अमी जनाः तु । भगवद्दर्शनमये श्रीपद्मनाभावलोकनस्वरूपे महोत्सवे संसक्तहृदयाः आसक्तचित्ताः सन्तः । योगिन इव ऋषय इव तस्य श्रीपद्मनाभस्य एकस्यैव ध्याने केशादिपादपर्यन्तविषयकनिरन्तरस्मरणे निमग्ना नितरां मग्नाः । भवन्ति ॥ ४ ॥

भक्तैरिति । असौ भगवान् श्रीपद्मनाभः तु । भक्तैः, भूरिदयापयोनिधिः भूरिकृपासमुद्रः । इति एवम्प्रकारेण । स्त्रीभिः, पञ्चायुधः काम इति च । वियति आकाशे । स्थितैः, देवौघैः देवसमूहैः । निजस्य आत्मीयस्य देवौघसम्बन्धिनः परीतापस्य सन्तापस्य प्रणाशी विनाशकर इति च । क्रूरैः पापैः । 'नृशंसो घातुकः क्रूरः पापः' इत्यमरः । दानवपुङ्गवैः असुरश्रेष्ठैः ।

अथास्य भगवतः पङ्कजनाभस्य तनुविधृतकटकमकुटाङ्गदकेयूरहारकाञ्चीमुखविविधकलापकलापसङ्गतानर्घतममणिगणकिरणस्तोमाद् दिवसनाथे समवाप्तपराजये तदीयदयिताभिर्दशभिराशाभिरपि निजरमणपराजयसञ्जाताधिभरेण सोच्छ्वासं निरीक्षितो निःश्वासोदितसमीरसम्पर्कमालिनीभूत इव सदा विभात्यासां दर्पणभूतस्तुषारकिरणः ॥ ५ ॥

---

निजकुलस्य निजवंशस्यैवारण्यस्य वनस्याग्निः । इति, आनतैः प्रणतैः । सिद्धैः सिद्धिं प्राप्तैः । श्रुतेः वेदस्य । अर्थस्तात्पर्यविषयः परब्रह्मेति च । आलक्षितः दृष्टः सन् । भाति शोभते । उल्लेखालङ्कारः । 'बहुभिर्बहुधोल्लेखादेकस्योल्लेख इष्यते' इति लक्षणात् ॥ ४ ॥

अथेति । अथ, दिवसनाथे सूर्ये । भगवतः अस्य, पङ्कजनाभस्य श्रीपद्मनाभस्य । तनौ शरीरे । 'स्त्रियां मूर्तिस्तनुस्तनूरि'त्यमरः । विधृताः कटकः वलयः । 'कटको वलयोऽस्त्रियामि'त्यमरः । मकुटं किरीटं । 'मकुटं किरीटमि'त्यमरः । अङ्गदं केयूरम् एतयोर्हस्ताभरणविशेषयोः किञ्चिद्वैलक्षण्यमनुसृत्यैवमुक्तिः । हारः मुक्तावली । 'हारो मुक्तावली'त्यमरः । काञ्ची सारसनं च एतन्मुखाः एतदादयो विविधाः नानाप्रकाराश्च ये कलापाः भूषणानि तेषां कलापे समूहे । 'कलापो भूषणे बर्हे तूणीरे संहतेऽपि च' इत्यमरः । संगताः स्थिताः प्रत्युप्ता इत्यर्थः अनर्घतमा अतीवानर्घाश्च ये मणिगणा रत्नसमूहाः तेषां किरणस्तोमाद् रश्मिपुञ्जात् सकाशात् । समवाप्तः सम्प्राप्तः पराजयो भङ्गो यस्य तादृशे सति । 'रणे भङ्गः पराजय' इत्यमरः । तदीयदयिताभिः आदित्यसम्बन्धिनीभिः प्रियाभिः । आशानां स्त्रीलिङ्गत्वात् स्त्रीत्वमारोप्यते । दशभिः दशसंख्याकाभिः । आशाभिर्दिग्भिः अपि । निजस्य आत्मीयस्य रमणस्य भर्तुः सूर्यस्येत्यर्थः पराजयेन हेतुना सञ्जात उत्पन्नो य आधिभरः तापातिशयस्तेन हेतुना । सोच्छ्वासं सदीर्घश्वासं यथा तथा । निरीक्षितः अवलोकितः । आसां दिशां । दर्पणभूतः, तुषारकिरणश्चन्द्रः । निःश्वासोदितस्य दीर्घश्वासरूपेणोत्पन्नस्य समीरस्य वायोः सम्पर्केण मलिनीभूतः इव । सदा, विभाति शोभते । चन्द्रकलङ्के दिगङ्गनादीर्घश्वाससम्पर्कजनितमालिन्योत्प्रेक्षणादुत्प्रेक्षालङ्कारः । चन्द्रे दर्पणत्वारोपाद् रूपकं चेति तयोः सङ्करः ॥५॥

किञ्च, अक्षीणामोदलक्ष्मीनित्यनिवासायिते सुविशाले ऽस्य भगवतो वक्षसि विराजमानो मुक्ताहारश्चानिर्वाच्यां कामपि सुषमां धत्ते ॥ ६ ॥

यद्याकाशतरङ्गिणीह निपतेद् द्वेधा विभिन्ना जवा-
दानीलान्ननु वासवाद्रिशिखराच्चन्द्रांशुगौरद्युतिः ।
तावत् साम्यमसौ भजेत लसता हारेण मुक्तामये-
नास्य श्रीरमणस्य वक्षसि लसच्छ्रीवत्सलक्ष्माङ्किते ॥ २ ॥
किञ्चास्योभयपार्श्वयोर्विलसता लोकेन संवीजितो
रम्यश्चामरसञ्चयः कलयते कान्तिं जगन्मोहिनीम् ।

---

किञ्चेति । किञ्च अक्षीणामोदाया अनल्पहर्षाया इत्यर्थः लक्ष्म्याः श्रीभगवत्याः नित्यनिवासायिते नित्यनिवासभूते । सुविशाले सुतरां विस्तीर्णे । अस्य, भगवतः श्रीपद्मनाभस्य । वक्षसि वक्षःप्रदेशे । विराजमानः शोभमानः । मुक्ताहारः मौक्तिकमाला च । अनिर्वाच्यां निर्वक्तुमशक्यां । कामपि काञ्चित् । सुषमां, धत्ते दधाति ॥ ६ ॥

यद्दीति । चन्द्रांशुवद् गौरी धवला । 'अवदातः सितो गौर' इत्यमरः । द्युतिः कान्तिर्यस्याः तादृशी । आकाशतरङ्गिणी गङ्गा । आनीलाद् अतीव कृष्णवर्णात् । वासवाद्रेः इन्द्रनीलाचलस्य शिखरात् शृङ्गात् । द्वेधा उभयथा । विभिन्ना प्रवाहद्वयरूपेणेत्यर्थः । जवाद् वेगेन । इह निपतेद् यदि, तावत् ननु । नन्वित्यवधारणे, तदैवेत्यर्थः । असौ आकाशतरङ्गिणी । लसता शोभमानेन । श्रीवत्सेनैव लक्ष्मणा चिह्नेन अङ्किते चिह्निते । अस्य श्रीरमणस्य श्रीपद्मनाभस्य । वक्षसि, लसता शोभमानेन । मुक्तामयेन हारेण, साम्यं तौल्यं । भजेत लभेत । अभूतोपमालङ्कारः ॥ २ ॥

किञ्चेति । किञ्च, अस्य श्रीपद्मनाभस्य । उभयपार्श्वयोः पार्श्वद्वयेऽपीत्यर्थः । विलसता शोभमानेन । लोकेन जनेन । संवीजितः सञ्चालितः । रम्यः मनोहरः । चामरसञ्चयः चामरसमूहः । जगन्मोहिनीं, कान्तिं शोभां । कलयते करोति । अथ च दिवि आकाशे । संस्थितः, अम-

यां दृष्ट्वा दिवि संस्थितः करतलस्रस्तप्रसूनोत्कर-
स्तुष्टेश्चामरसञ्चयोऽथ लभते पारं परं नैव हि ॥ ३ ॥

अथ परिजनकराग्रसंवीज्यमानास्त्वमी चामरगणा मानससरःपरिसरकेलिकुतूहलोड्डीयमानराजहंसलीलां दधते ॥

तत्र च परमसुगन्धावहचन्दनागरुघनसारादिचूर्णपरिमिलितानेकधूपयष्टिविलसद्वामकरतलैर्जनैरितरकरविधूतव्यजनसमीरणोत्क्षिप्तो धूपः समस्तककुभः सुरभीकुरुते ॥ ८ ॥

आमोदेन समस्तलोकनिवहं त्वामोदयन्नञ्जसा
दिव्यादेष तु धूपयष्टिनिवहाज्जातो हि धूपोत्करः ।

---

रसञ्चयः देवसमूहः । यां कान्तिं । दृष्ट्वा, करतलेभ्यः स्रस्तः गलितः प्रसूनोत्करः पुष्पसमूहो यस्य तादृशः सन् । तुष्टेः सन्तोषस्य । परं पारं, नैव लभते नैव प्राप्नोति हि ॥ ३ ॥

अथेति । अथ, परिजनस्य परिवारस्य कराग्रैः संवीज्यमानाः । अमी, चामरगणाः चामरसमूहास्तु । मानससरसः मानसाख्यतटाकस्य परिसरे पर्यन्तभूमौ । 'पर्यन्तभूः परिसर' इत्यमरः । या केलिः क्रीडा तत्र यत् कुतूहलं कौतुकं तेन हेतुना उड्डीयमानानाम् उद्गच्छतां राजहंसानां लीलां विलासं । दधते ॥ ७ ॥

तत्र चेति । तत्र च परममुत्कृष्टं सुगन्धं सौरभ्यम् आ समन्तात् वहन्ति प्रापयन्तीति तथा तादृशाः ये चन्दनागरुघनसारादयः तेषां चूर्णैः परागैः परिमिलितानां सुरभीकृतानाम् अनेकेषां धूपानां सम्बन्धिन्यः या यष्टयः धूपधारणदण्डाः ताभिर्विलसन्ति शोभमानानि वामकरतलानि सव्यहस्ततलानि येषां तादृशैः । जनैः, इतरकरेषु दक्षिणहस्तेषु विधूतानाम् धृतानां व्यजनानां तालवृन्तानां समीरणैर्वायुभिः उत्क्षिप्तः उत्थापितः । धूपः समस्तककुभः सर्वदिशः । सुरभीकुरुते संवासयति ॥ ८ ॥

आमोदेनेति । आमोदेन सौरभ्येण । समस्तलोकनिवहं सकलजनसमूहं । तुश्चार्थे । अञ्जसा वेगेन । 'द्रागझटित्यञ्जसाह्नाय'त्यमरः । आमोदयन्

चित्रं व्याप्य दिवं जवेन कुरुते सौरभ्यहृष्टाशयान्
विश्वानद्भुतसंभृतान् सुमनसोऽप्यानीलरम्यच्छविः ॥

अपि केचिदसङ्ख्येयविविधध्वजदण्डपताकालसितकरतलाः सकुतूहलमस्य भगवतः पुरो यान्तस्तदीयसेवामहाभाग्यं लभन्ते ॥ ९ ॥

पताकासङ्घोऽयं परिजनकराग्रेषु लसितः
समीरेणोद्धूतो विचलदरुणाग्रोऽथ सहसा ।
दधानान् कान्त्या तु स्मयमहह मन्दारविटपि-
प्रवालानुच्चैराह्वयत इव युद्धाय तरसा ॥ ५ ॥

हर्षयन् , सुरभीकुर्वन्निति च । दिव्याद् उत्तमात् । धूपयष्टिनिवहात्, जात उत्पन्नः । हि आनीला कृष्णवर्णा रम्या मनोहरा च छविः कान्तिर्यस्य तादृशः । एषः, धूपोत्करो धूपसमूहः तु । जवेन वेगेन । दिवं स्वर्गं व्याप्य, विश्वान् समस्तान् । अद्भुतसम्भृतान् आश्चर्यभरितान् । सौरभ्यहृष्टाशयान् सौरभ्येण सन्तुष्टमनसः । कुरुते चित्रम् । सुमनःशब्दस्य पुष्पपरत्वे विशेषणद्वयं लिङ्गविपरिणामेन योज्यम् । स्वतः सुरभीणां पुष्पाणामप्याश्चर्यहृष्टाशयत्वसम्पादनमाश्चर्यमेवेति भावः ॥ ४ ॥

**अपीति** । अपि अपि चेत्यर्थः । असंख्येयाभिः संख्यातुमशक्याभिः विविधाभिः ध्वजदण्डेषु विद्यमानाभिः पताकाभिः वैजयन्तीभिः लसितानि शोभितानि करतलानि येषां तादृशाः । केचित् , सकुतूहलं सकौतुकं यथा तथा । अस्य, भगवतः श्रीपद्मनाभस्य पुरः पुरोभागे । यान्तः गच्छन्तः । तदीया श्रीपद्मनाभसम्बन्धिनी सेवैव महाभाग्यं तद्, लभन्ते ॥ ९ ॥

**पताकेति** । अथ, परिजनस्य परिवारजनस्य कराग्रेषु लसितः शोभितः । समीरेण वायुना । उद्धूतः कम्पितः । विचलत् चञ्चलम् अरुणं रक्तवर्णं च अग्रं प्रान्तभागो यस्य तादृशः । अयं पताकासङ्घः तु, कान्त्या शोभया । स्मयं गर्वं । दधानान्, मन्दारविटपिनः कल्पवृक्षस्य प्रवालान् किसलयानि । युद्धाय युद्धं कर्तुं । सहसा बलेन । तरसा वेगेन । उच्चैः, आह्वयते आह्वानं करोति । इवेत्युत्प्रेक्षा । अहह अद्भुतम् ॥ ५ ॥

अथ तदानीं मुरलीमृदङ्गपणवभेरीशङ्खकरतालमुखानेकवादित्रनिकरेभ्यो युगपदुदितः संराव एकीभूय निखिलभुवनान्तरालमपि नादामृताम्बुधितरङ्गाभिषिक्तं वितनुते ॥ १०॥

अपिच तावदसाधारणैतद्धोषयात्रानिरीक्षणकौतुकाद् दिवि समुपागतस्य बृन्दारकबृन्दस्य रसनेन्द्रियाय नित्यसञ्जातसुधापानमहोत्सवेन सासूयं श्रवणेन्द्रियं तदधिकयानया नादसुधया सुतृप्तं रचयति ॥ ११ ॥

मत्तप्रौढगजेन्द्रजातविलसत्कुम्भप्रभेदे रतः
पञ्चास्योऽपि रुषाविलः श्रुतिसुखं त्वेतं निशम्य स्वनम् ।

---

अथेति । अथ तदानीं, मुरली मृदङ्गः पणवः भेरी शङ्खः करतालः हस्ततालः एतन्मुखानामेतत्प्रभृतीनाम् अनेकेषां बहूनां वादित्राणां वाद्यानां निकरेभ्यः समूहेभ्यः । युगपदेकदैव । उदित उत्पन्नः । संरावः शब्दः । एकीभूय, निखिलभुवनान्तरालं सकलजगदन्तरालम् अपि । नादामृताम्बुधेः नादामृतसमुद्रस्य तरङ्गेषु वीचिषु अभिषिक्तं मग्नं । वितनुते कुरुते ॥ १० ॥

अपिचेति । अपिच तावत्, अत्रापि संराव इत्यनुषज्यते । असाधारणायाः निरुपमायाः एतस्या घोषयात्रायाः निरीक्षणे अवलोकने यत् कौतुकं तस्माद्धेतोः । दिवि आकाशे । समुपागतस्य सम्प्राप्तस्य । बृन्दारकबृन्दस्य देवसमूहस्य । रसनेन्द्रियाय जिह्वेन्द्रियाय । नित्यं सञ्जातं यत् सुधापानम् अमृतपानं तद्रूपेण महोत्सवेन हेतुना । सासूयमसूयासहितं । श्रवणेन्द्रियं श्रोत्रेन्द्रियं । तदपि बृन्दारकबृन्दस्यैव । तदधिकया तस्माद् अमृतादप्यधिकया उत्कृष्टरसवत्या । अनया वादित्रजालोदिताय । नादसुधया शब्दामृतेन । सुतृप्तं सुतरां तृप्तं । रचयति करोति ॥ ११ ॥

मत्तेति । रुषा कोपेन । आविलः कलुषः । मत्ताः प्रौढा उत्कृष्टाश्च ये गजेन्द्रास्तेषां जातस्य समूहस्य विलसतां शोभमानानां कुम्भानां मस्तकानां प्रभेदे विदारणे रतस्तत्परः । पञ्चास्यः सिंहः अपि । नानाविधेभ्यः वाद्यवरेण्येभ्यः वाद्यश्रेष्ठेभ्यः जातम् उत्पन्नं । श्रुतिसुखं श्रोत्रानन्दकरम् । एतं, स्वनं

नानावाद्यवरेण्यजातमवशस्तत्रैव दत्ताशयो
नूनं चित्रसमाकृतिर्भवति वै निश्चेष्टभूतः स्वयम् ॥ ६ ॥

अथ तथैव नीरसीभूतोऽप्यनोकहोऽपि बाल्य इव सञ्जातकिसलयः पुष्पितः फलितो भवति ॥ १२ ॥

किञ्चैतन्निनदामृतं बहुजनश्रोत्राध्वना सङ्गतं
चित्ते तत्र च संभृतं च बहिरुद्गन्तुं यतं संभ्रमात् ।
मन्ये निस्सरति स्म मन्दहसितव्याजेन चेदं पुन-
र्विश्वेषां वदने निरर्गलपरीतोषादतीवाकुले ॥ ७ ॥

---

शब्दं । निशम्य श्रुत्वा । अवशः पराधीनः । तत्र स्वने एव । दत्ताशयः निहितचित्तः । स्वयं, निश्चेष्टभूतः निश्चलः सन्नित्यर्थः । चित्रसमाकृतिः आलेख्योपमाकारः । वैशब्द एवकारार्थकः । भवति, नूनं निश्चयः । अनेन नादस्य सिंहावासगिरिगुहापर्यन्तप्राप्तिः रोषकलुषितमनसः सिंहस्यापि आनन्दपारवश्येन निश्चेष्टत्वोक्त्या अतीव मनोहरत्वं च द्योत्यते ॥ ६ ॥

अथेति । अथ, तथैव यथा सिंहस्य निश्चेष्टतया चित्रसमाकारत्वरूपं चित्रत्वमुक्तं तथैवेत्यर्थः । नीरसीभूतः शुष्क इत्यर्थः । अनोकहः वृक्षः अपि 'अनोकहः कुटः सालः' इत्यमरः । जात्येकवचनमेतत् । शुष्का अनोकहा अपीत्यर्थः । बाल्ये शैशवावस्थायामिव । सञ्जातकिसलयः उत्पन्नप्रवालः । पुष्पितः सञ्जातपुष्पः । फलितः सञ्जातफलः । भवति । एतदपि वादित्रस्वनश्रवणादेव । अनेन नादस्यातिमनोहरत्वात् सकलाप्यायनकरत्वं व्यज्यते ॥ १२ ॥

किञ्चेति । किञ्च अपिच । एतत्, निनदामृतं नादसुधा । बहूनां जनानां श्रोत्राध्वना श्रोत्रद्वारा । चित्ते मनसि । सङ्गतं, तत्र च चित्ते च । सम्भृतं सम्पूर्णं । यतं बद्धं च भवतीति शेषः । अस्यामृतत्वेन दुर्लभतया बहिर्निर्गमनं मा भूदिति चित्त एव निरुद्धमिति यावत् । पुनः अन्तर्निरोधानन्तरं । विश्वेषां सर्वेषां । वदने, निरर्गलात् विशृङ्खलाद् निरवधिकादित्यर्थः परीतोषात् सन्तोषाद्धेतोः । अतीव अधिकम् । आकुले व्याकुले सति । प्रमादेन विवृते सतीत्यर्थः । इदं नादामृतं । संभ्रमात् अन्तः संभ्रान्तिजन्यपरि-

अग्रे चास्य रमापतेरिह करेणूढो महादुन्दुभिः
स्वेनेह स्तनितोपमेन तु रवेणाक्रान्तदिङ्मण्डलः ।
नृणां नूनमजानतां परमिमं यात्रोत्सवं सूचय-
त्यानन्दामृतमग्नविश्वजनताश्लाघ्यं त्रिलोकेशितुः ॥ ८॥

कैश्चिच्चाञ्जनशैल इत्यथ परैर्जातस्वरूपो द्विषां
दुष्कीर्त्तेः समवाय इत्यथ जनैरन्यैस्तमस्सञ्चयः ।
अन्यैः पीनतमो घनाघन इति व्याशङ्किता भासते
विश्वेशस्य पुरो गताथ करिणी मन्दं चरन्त्युच्छ्रिता ॥ ९॥

---

भ्रमाद्धेतोः । मन्दहसितव्याजेन मन्दहासमिषात् । बहिः, उद्गन्तुं यातुं निस्सरति निर्गच्छति । स्मेति पादपूरणे । इति मन्ये । यद्वा सम्भ्रमाद् बहिरुद्गन्तुं यतम् उद्यतं निनदामृतमिति योजना । अत्र मिषपदेन मन्दहासितत्वनिह्नवात् तत्रैव नादामृतत्वोत्प्रेक्षणाच्चोत्प्रेक्षाशिरस्कापह्नवालङ्कारः ॥ ७ ॥

अग्रे चेति । इह अस्मिन् घोषयात्राकाले । रमापतेः श्रीवल्लभस्य श्रीपद्मनाभस्य । अग्रे पुरोभागे । करेणूढः हस्तिनीभृतः । स्तनितोपमेन मेघनिर्घोषसदृशेन । स्वेन आत्मीयेन । रवेण शब्देन तु । इह, आक्रान्तं व्याप्तं दिङ्मण्डलं दिक्समूहो येन तादृशः । महान् दुन्दुभिः भेरी । परम् उत्कृष्टम् । आनन्दामृते मग्ना विश्वा अशेषा च या जनता जनसमूहः तया श्लाघ्यं स्तुत्यं । त्रिलोकेशितुः श्रीपद्मनाभस्य । यात्रोत्सवं यात्रारूपम् उत्सवम् । अजानतां, नृणां नराणां, घोषयात्रादर्शनार्थं सन्नद्धानामपि भगवान् प्रस्थित इत्यजानतां जनानामित्यर्थः । इमं यात्रोत्सवमित्यर्थः । सूचयति प्रकटयति । नूनं निश्चयः ॥ ८ ॥

कैश्चिदिति । अथ, विश्वेशस्य श्रीपद्मनाभस्य । पुरः अग्रभागे । गता विद्यमाना । मन्दं, चरन्ती चङ्क्रम्यमाणा । उच्छ्रिता उन्नता । करिणी हस्तिनी । कैश्चिद् जनैः । अञ्जनशैलः अञ्जनपर्वतः । इति, अथ, परैः अन्यैः । द्विषां शत्रूणां । दुष्कीर्त्तेः अपकीर्त्तेः । जातस्वरूपः मूर्तिमानित्यर्थः । समवायः समूहः । इति, 'समवायश्चयो गण' इत्यमरः । अपकीर्त्तेः कार्ष्ण्यात्

अपिचेयं हस्तिनी विशालतममस्तकाग्रभागविराजमानेन जपाकुसुमवर्णानुकारिणा चञ्चलदुकूललसितेन ललाटपट्टेन सद्यःसमुदितमार्तण्डरश्मिसम्पर्कभासमानवासवोपलशिखरिसानुप्रदेशकान्तिमनुकरोति ॥ १३ ॥

अथ तावद् दारुणहेतिप्रहारविदग्धतरदुर्धर्षरिपुमण्डलविध्वंसनधुरीणा पाटलतरकञ्चुकावृता निरुपमशस्त्राभ्यासपारङ्गता निपुणसेनानायकनिकुरुम्बानीता वाहिनी चासं-

---

करेणुसादृश्यम् । तस्य कार्ष्ण्यं च कविकुलसिद्धान्तः । अथ, अन्यैः अपरैः । तमस्सञ्चयः अन्धकारसमूहः । इति अन्यैः, पीनतमः अतीव पीवरः । घनाघनः वार्षिकमेघः । इति च, व्याशङ्किता विशेषेणाशङ्किता सती । भासते शोभते ॥ ९ ॥

अपिचेति । अपिच, विशालतमे अतीव विस्तृते मस्तकाग्रभागे विराजमानेन शोभमानेन । जपाकुसुमस्य बन्धूकपुष्पस्य वर्णम् अनुकरोति विडम्बयतीति जपाकुसुमवर्णानुकारी तादृशेन रक्तवर्णेनेत्यर्थः । चञ्चलेन च दुकूलेन आस्तरणप्रान्ते वस्त्रकृतालङ्कारविशेषेण लसितेन शोभितेन । ललाटपट्टेन ललाटे विद्यमानास्तरणेन । उपलक्षिता, इयं, हस्तिनी करिणी । सद्यःसमुदितस्य तत्क्षणोदितस्येत्यर्थः मार्तण्डस्य सूर्यस्य रश्मेः किरणस्य सम्पर्कात् सम्बन्धाद् भासमानः शोभमानः वासवोपलशिखरिणः इन्द्रनीलरत्नमयपर्वतस्य यः सानुप्रदेशः प्रस्थप्रदेशः तस्य कान्तिम् । अनुकरोति विडम्बयति ॥ १३ ॥

अथेति । अथ तावद्, दारुणाभिः भयङ्करीभिः हेतिभिः यः प्रहारः संयुगः तस्मिन् विदग्धतरा अतीव समर्था अत एव दुर्धर्षस्य दुर्जयस्य रिपुमण्डलस्य शत्रुसमूहस्य विध्वंसने विनाशने धुरीणा धूर्वहा, निपुणेत्यर्थः । पाटलतरैः अतीव रक्तवर्णैः कञ्चुकैः तनुच्छदैः आवृता संवृता । निरुपमस्य निस्तुलस्य शस्त्राभ्यासस्य पारङ्गता पारगामिनी, सम्पूर्णशस्त्राभ्यासेत्यर्थः । निपुणाः समर्था ये सेनानायकाः सेनापरिवृढाः तेषां निकुरुम्बेन समूहेन ।

ख्येयत्वान्मन्दिरपश्चिमद्वारमारभ्यावारिधितीरं निश्चलेव लसति ॥ १४ ॥

अप्यस्याः खलु वीराग्रेसरासङ्ख्यभटप्रचुराया विजयद्योतकदुन्दुभिमुखविविधवादित्रघोषमुखरीभूताया वाहिन्याः सन्दर्शनमात्रेणैव विस्मयसाध्वसभरितः पदात् पदं चलितुमप्यक्षमो भवति निकटागमनानर्हो जनसमूहः ॥ १५ ॥

एवमेष भगवानम्भोजनाभो विविधवन्दिजनपरिजननटभटमुखैः समेतः सकलजननयनेन्दीवरकलितपरिपूजनः पश्चिमदुर्गद्वारबहिर्भागं शनैः शनैरलङ्करोति ॥ १६ ॥

---

'निकुरुम्बं कदम्बकमि'त्यमरः । आनीता च । वाहिनी सेना । 'वाहिनी पृतना चमूरि'त्यमरः । असंख्येयत्वात् संख्याराहित्यत्वाद्धेतोः । मन्दिरस्य श्रीपद्मनाभालयस्य पश्चिमद्वारं पश्चिमगोपुरम् । आरभ्य, आवारिधितीरं समुद्रतीरपर्यन्तं निश्चला अचञ्चला इवेत्युत्प्रेक्षा । लसति शोभते ॥ १४ ॥

अपीति । अपि अपिचेत्यर्थः । वीराग्रेसरैः वीरश्रेष्ठैः असंङ्ख्यैः अनवधिकैः भटैः योधैः प्रचुरायाः समृद्धायाः । विजयद्योतकेन जयसूचकेन दुन्दुभिमुखानां भेरीप्रभृतीनां विविधानां नानाप्रकाराणां च वादित्राणां वाद्यानां घोषेण कोलाहलेन मुखरीभूतायाः शब्दायमानायाः । वाहिन्याः सेनायाः । सन्दर्शनमात्रेणैव अवलोकनमात्रेणैव । विस्मयेन अद्भुतेन साध्वसेन भयेन च भरितः पूरितः । निकटागमने समीपप्राप्तौ अनर्हः अयोग्यः । जनसमूहः, पदात् स्थानात् । पदं स्थानम् । 'पदं व्यवसितित्राणस्थानलक्ष्माङ्घ्रिवस्तुष्वि'त्यमरः । चलितुं गन्तुमपि । अक्षमः अशक्तः । भवति । अधिष्ठितस्थलात् स्थलान्तरं गन्तुमशक्तो भवतीत्यर्थः, स्तब्धो भवतीति यावत् ॥ १५ ॥

एवमिति । विविधा नानाप्रकाराः ये वन्दिजनाः स्तुतिपाठकजनाः परिजनाः सेवकजनाः नटा नर्तका भटा योधाश्च एतन्मुखैरेतत्प्रभृतिभिः । नयनैः नेत्रैरेवेन्दीवरैः अम्बुजैः करणैः कलितं कृतं परिपूजनमर्चनं यस्य तादृशः, सकलजनैरप्यवलोक्यमान इति यावत् । भगवानेषः, अम्भोजनाभः

त्रैलोक्यान्तरवासिनां किल नृणां शङ्कां ददानस्तदा
किं ब्रह्माण्डकटाहभेदनरवः किं शैलयोर्युध्यतोः ।
क्षुब्धस्याम्बुनिधेः किमेष निनदस्त्रासावहो वैरिणां
राराजीत्यथ सूचयंस्तु विजयं चोच्चैः खधूमारवः ॥ १० ॥

धूमानां निकरस्तदा निरुपमस्तस्माज्जवादुद्गतः
सम्प्राप्तश्च दिवौकसां तु निलयं व्याप्याथ तत्र ध्रुवम् ।
शक्रं नेत्रसहस्रगर्भपतितः कुर्वन्नलं व्याकुलं
सोत्कण्ठं तनुते स्म हैहयमहीपालेन्द्रदोःसम्पदि ॥ ११ ॥

श्रीपद्मनाभः । एवं शनैः शनैः मन्दं मन्दं । गत्वेति शेषः । पश्चिमदुर्गद्वारस्य पश्चिमवप्रद्वारस्य । बहिर्भागम् अलङ्करोति बहिर्भागं गच्छतीत्यर्थः ॥ ९ ॥

त्रैलोक्येति । अथ, त्रैलोक्यस्यान्तरे अवकाशे वासिनां स्थितानां त्रैलोक्यस्थितानामित्यर्थः । नृणां जनानाम् । एष श्रूयमाणः । निनदः शब्दः ब्रह्माण्डकटाहस्य ब्रह्माण्डभाण्डस्य भेदनरवः विदारणशब्दः । भवतीति शेषः । किमिति वितर्के । युध्यतोः युद्धं कुर्वतोः । शैलयोः पर्वतयोः । रव इत्यत्रापि योज्यम् । किं । क्षुब्धस्याम्बुनिधेः रवः किम् । इति एवम्प्रकारिकां । शङ्कां संशयं । ददानः उत्पादयन्नित्यर्थः । वैरिणां शत्रूणां । त्रासावहः भयजनकः । विजयं, सूचयन् प्रकटयन् । उच्चैः महान् खधूमस्य लोहयन्त्रविशेषस्य आरवः शब्दः तु । तदा भगवतः पश्चिमदुर्गद्वारबहिर्गमनवेलायां । राराजीति किल अतिशयेन शोभते खलु ॥ १० ॥

धूमानामिति । तदा, तस्मात् खधूमात् । जवाद् वेगेन । उद्गतः ऊर्ध्वं गतः । निरुपमः निस्तुलः, अतीव सान्द्र इति यावत् । धूमानां, निकरः समूहः तु । दिवौकसां देवानां । निलयं गृहं स्वर्गं । सम्प्राप्तः गतः । तत्र च स्वर्गे च । व्याप्य प्रसृत्य । अथ व्याप्त्यनन्तरं । शक्रमिन्द्रं । नेत्रसहस्रस्य गर्भे अन्तर्भागे पतितः संगत इत्यर्थः । अर्थात् शक्रस्य । अलमधिकं । व्याकुलं दीनं । कुर्वन् सन् । अत एव हैहयमहीपालेन्द्रस्य कार्तवीर्यार्जुनस्य या

हस्तीन्द्राः कतिचित् स्वमस्तकतटैः स्पृष्टान्तरिक्षाङ्कणा
 राराजत्सजलाम्बुदालिविलसद्वर्णाः कुथैरावृताः ।
दन्ताग्रैकनिघर्षपातितलसन्मन्दारसूनव्रजा
 यात्रायां विलसन्ति विश्वजगतां नाथस्य पद्मापतेः ॥ १२ ॥

तत्र च समागतेष्वसंख्येयेषु जनेषु समस्तरथ्याभागानभेदेन निबिडीकुर्वत्सु सत्सु पुनरप्यागच्छन्तो जनाः

---

दोःसम्पद् भुजसम्पत् तस्यां सहस्रबाहुत्वे इति यावत् । सोत्कण्ठं सेच्छं । तनुते कुरुते । स्मशब्दः पादपूरणे । ध्रुवं निश्चयः । अयमाशयः — यदा धूमनिकरः स्वर्गे व्याप्य शक्रस्य नेत्रसहस्रगर्भे प्रविशति, तदा त्वतीव परितप्तः शक्रः स्वनेत्रसहस्राच्छादनोद्युक्तोऽपि करद्वयेन नेत्रसहस्रमाच्छादयितुमपारयन् सन् हैहयमहीपालवन्ममापि सहस्रबाहुत्वमस्ति चेत् तद्बाहुसहस्रेण युगपदेतन्नेत्रसहस्रनिगूहनं सम्भवति खलु । अतो ममापि सहस्रबाहुत्वं भूयादित्युत्कण्ठत इति ॥ ११ ॥

हस्तीन्द्रा इति । विश्वजगतां नाथस्य सर्वलोकेश्वरस्य । पद्मापतेः श्रीपद्मनाभस्य । यात्रायां, स्वमस्तकतटैः स्वमस्तकप्रदेशैः करणैः । स्पृष्टम् अन्तरिक्षाङ्कणं भुवर्लोकप्रदेशो यैः तादृशाः । राराजताम् अतीव शोभमानानां सजलाम्बुदानां सजलजलदानां कृष्णमेघानामित्यर्थः या आलिः समूहः तद्वद् विलसन् शोभमानः यः वर्णः कृष्णवर्ण इत्यर्थः स येषां तादृशाः । कुथैः गजपृष्ठास्तरणैः । 'प्रवेण्यास्तरणं वर्णः परिस्तोमः कुथो द्वयोरि'त्यमरः । दन्ताग्रैः दन्तप्रान्तभागैः करणैः एकः यः निघर्षः संघर्षः तेन पातिताः भ्रंशिता लसन्तः शोभमानाश्च ये मन्दारसूनव्रजाः कल्पवृक्षकुसुमसमूहाः ते यैस्तादृशाः । कतिचित् केचन । हस्तीन्द्राः गजश्रेष्ठाः । विलसन्ति शोभन्ते ॥ १२॥

तत्र चेति । तत्र च यात्रायां च । समागतेषु सम्प्राप्तेषु । असंख्येयेषु जनेषु, समस्तरथ्याभागान् सकलरथ्याप्रदेशान् । अभेदेन एकप्रकारेणैव । निबिडीकुर्वत्सु ससंघर्षान् कुर्वत्सु इत्यर्थः । सत्सु । पुनरपि रथ्याभागनिबिडीकरणानन्तरमपि । आगच्छन्तः प्राप्नुवन्तः जनाः सकुतूहलं यथा तथा विटपिनां वृक्षाणां कुड्यानां भित्तीनां । 'भित्तिः स्त्री कुड्यमि'त्यमरः । अग्रा-

सकुतूहलं विटपिकुड्याग्रादिषु समधिरूढाश्च पङ्कजनाभपद्पङ्केरुहसन्दर्शनेन रहितपङ्कतां निश्शङ्कमवाप्नुवन्ति ॥ १७॥

किञ्चास्यां भगवतः पद्मनाभस्य घोषयात्रायां समस्तजनेषु समलङ्कृतविग्रहेषु पथि स्थितास्तरवोऽपि विशदतोरणमालिकालङ्कृता विलसन्ति ॥ १८ ॥

अथ तत्र तु करलसितनिस्त्रिंशनिस्तुलभटजनसमधिरूढा विविधवर्णोज्ज्वलास्तुरङ्गमाश्चास्याग्रे सोत्साहं चरन्ति ॥

पवमानसमानजवाः सहसा नवहेमविभूषणलालसिताः ।
पदलम्बितकिङ्किणिमञ्जुरवाः पुरतोऽस्य हरेः प्रचरन्ति हयाः ॥

दिषु उपरिभागेषु । सम्यगधिरूढाश्च सन्तः पूर्वमागतैरावृतत्वादधोभागे तलाभावादिति भावः । पङ्कजनाभस्य श्रीपद्मनाभस्य पदपङ्केरुहयोः पादारविन्दयोः सन्दर्शनेन सम्यगवलोकेन । रहितपङ्कतां विगतपापत्वम् । अवाप्नुवन्ति निष्पापा जायन्ते इत्यर्थः । निःशङ्कं शङ्का नास्तीत्यर्थः । अर्थाभावेऽव्ययीभावः ॥ १७ ॥

किञ्चेति । किञ्च अपि च । भगवतः पद्मनाभस्य अस्यां घोषयात्रायां समस्तजनेषु, सम्यगलंकृतो भूषितो विग्रहः शरीरं येषां तादृशेषु सत्सु। पथि मार्गे । स्थिताः, तरवः वृक्षा अपि । विशदैः तोरणैरेव मालाभिः मालिकाभिः अलंकृता भूषिताः सन्तः । विलसन्ति शोभन्ते ॥ १८ ॥

अथेति । अथ, तत्र घोषयात्रायां । करे लसिताः शोभिताः निस्त्रिंशाः खड्गा येषां तादृशैः निस्तुलैः निरुपमैश्च भटजनैः सम्यगधिरूढाः । विविधैर्वर्णैरुज्ज्वला दीप्ताः । तुरङ्गमा अश्वाश्च । अस्य श्रीपद्मनाभस्य । अग्रे पुरोभागे । सोत्साहमुत्साहसहितं यथा तथा । चरन्ति ॥ १९ ॥

पवमानेति । हरेः, अस्य श्रीपद्मनाभस्य । पुरतः पुरोभागे । पवमानेन लक्षणया वायुवेगेन समानः तुल्यः जवः वेगः येषां तादृशाः । नवैः नूतनैर्हेमविभूषणैः स्वर्णमयाभरणैः लालसिता अतीव शोभिताः । पदेषु पादेषु लम्बि-

**मृदुपातचलद्गलसंस्थतनूरुहसञ्चयरम्यतमो नितराम् ।**
**सकलां जनतां मुदितां कलयन् विलसत्यतितुङ्गतुरङ्गगणः ॥**
**खुरकूटविमर्दनजातरजोभरसंभृतविश्वजगन्निवहाः ।**
**मिलिताः शतशो रुचिरावरणैर्लसिताश्च चरन्ति तुरङ्गवराः ॥**

**एवमस्य भगवतः पङ्कजनाभस्य घोषयात्रायां सरभसं चरतां तुरङ्गमाणां खुरकुद्दालविमर्दनेन रजश्च पूर्वोक्तमणिगणरोचिषा तमश्च दिगन्तराण्ययासीत् । न चेदं चित्रं सत्त्वैकमूर्तेः सान्निध्यविशेषात् ॥ २० ॥**

---

तानां किङ्किणीनां क्षुद्रघण्टिकानां मञ्जुरवा मनोहरशब्दा येषां तादृशाश्च । हयाः अश्वाः । सहसा वेगेन । प्रचलन्ति गच्छन्ति । तोटकवृत्तम् 'इह तोटकमम्बुधिसैरि'ति लक्षणात् ॥ १३ ॥

**मृदुपातेति** । मृदुभिः मन्दैः पातैः धावनैः चलन्ति चञ्चलानि गलसंस्थानि गलस्थितानि यानि तनूरुहाणि रोमाणि तेषां सञ्चयेन समूहेन सटाकुलेनेत्यर्थः रम्यतमः अतीव मनोहरः । सकलां समस्तां । जनतां जनसमूहं । नितरामधिकं । मुदितां सन्तुष्टां । कलयन् कुर्वन् । अतितुङ्गानाम् अत्युन्नतानां तुरङ्गानामश्वानां गणः समूहः । विलसति शोभते ॥ १४ ॥

**खुरकूटेति** । खुरकूटैः कूटाकारैः खुरैः शफैः । 'शफं क्लीबे खुरः पुमानि'त्यमरः । कूटो नामायःपिण्डविशेषः तद्वन्निष्ठुरैः खुरैरित्यर्थः यद् विमर्दनं कुट्टनं तेन जात उत्पन्नः यः रजोभरः धूलीसमूहः तेन सम्भृताः सम्पूरिताः विश्वजगन्निवहाः अशेषलोकसमूहा यैस्तादृशाः । शतशः सङ्घशः । मिलिताः युक्ताः । रुचिरैर्मनोहरैः आवरणैराच्छादनैः । लसिताः शोभिताश्च । तुरङ्गवराः अश्वश्रेष्ठाः । चरन्ति गच्छन्ति ॥ १५ ॥

**एवमिति** । भगवतः अस्य, पङ्कजनाभस्य श्रीपद्मनाभस्य । घोषयात्रायाम्, एवम् उक्तप्रकारेण । सरभसं सवेगं यथा तथा । चरतां तुरङ्गमाणाम् अश्वानां । खुरकुद्दालैः कुद्दालाकृतिभिः खुरैः यद् विमर्दनं कुट्टनं तेन हेतुना । रजः धूलिः रजोगुणश्च । पूर्वोक्तस्य मणिगणस्य

अथ तत्र खलु पार्श्वद्वन्द्वसंस्थितकुड्याग्रभागविराजमाना[1]: सजलजलदसविधस्फुरत्पीयूषमयूखसुषमानिर्मूलनविद्यापारीणाननसरोरुहाः पञ्चमीचन्द्रसान्द्रशोभावहल्ललाटतटलालसितसिन्दूरतिलकशोणिम्ना विराजमानाः पाटलबिम्बफलपरिहसननिरताधरमणिविकासदरीदृश्यमानमुकुरशकलरुचिशकलीकरणनिपुणदन्ताङ्कुराः कर्णयुगलविलसद्धाटकमयताटङ्करुचा समस्तयुवहृदयमानन्दयन्त्यो रुचिरकम्बुसमानग्रीवामध्यविलसद्रेखात्रितयमनोहराः सुविशालरुचिम-

रत्नसमूहस्य भूषणखचितरत्नसमूहस्येत्यर्थः रोचिषा कान्त्या हेतुना । तमः अन्धकारं तमोगुणश्च । दिगन्तराणि अन्यदिशः । अयासीदगमत् । नचेति । सत्त्वैकमूर्तेः सत्त्वगुणप्रधानस्येत्यर्थः । सान्निध्यविशेषात् सामीप्यातिशयाद्धेतोः । इदं रजस्तमसोः दिगन्तरगमनमित्यर्थः । न च चित्रं नैवाश्चर्यमित्यर्थः। सत्त्वगुणप्रधानसान्निध्ये सति रजस्तमोगुणयोर्दिगन्तरगमनस्याश्चर्यलेशोऽपि नास्तीत्यर्थः ॥ २० ॥

अथेति । अथ, तत्र खलु घोषयात्रायां । पार्श्वद्वन्द्वे पार्श्वयुगले संस्थितयोर्विद्यमानयोरित्यर्थः कुड्ययोर्भित्त्योः । 'भित्तिः स्त्री कुड्यमि'त्यमरः । अग्रभागे उपरिभागे विराजमानाः शोभमानाः । उभयपार्श्वस्थितकुड्यबहिःस्थितास्तदुपरिभागेन दृश्यमानाश्चेत्यर्थः । सजलः यः जलदः मेघः कृष्णमेघ इत्यर्थः तस्य सविधे समीपे स्फुरतः प्रकाशमानस्य पीयूषमयूखस्य चन्द्रस्य सुषमायाः शोभायाः निर्मूलनस्यैव विद्यायाः पारीणानि पारङ्गतानि आननसरोरुहाणि सरोरुहसदृशानि आननानि यासां तादृश्यः । सजलजलदेत्यादिचन्द्रविशेषणात् केशभारशोभाविशिष्टत्वमाननस्याक्षेपाल्लभ्यते । पञ्चमीचन्द्रस्य सान्द्रा निबिडा या शोभा कान्तिः तामावहन्ति बिभ्रतीति तथा तादृशेषु ललाटतटेषु फालप्रदेशेषु लालसितानाम् अतीव शोभमानानां सिन्दूरतिलकानां शोणिम्ना रक्तवर्णेन विराजमानाः शोभमानाः । पाटलस्य बिम्बफलस्य बिम्बाख्यफलविशेषस्य परिहसने हेलने निरतः आसक्तः बिम्बफलादप्यधिकमनोहर

1. विराजमानसजलेति समस्तपदपाठः श्रेयान् ।

णिहारकण्ठाभरणसञ्जाताकुण्ठसुषमवक्षःप्रदेशलसितोत्तुङ्गस्तनकलशद्युत्यैरावतमस्तकयुगलमवनतं रचयन्त्यो मनोहरतरकदलीस्तम्भडम्भापहोरुद्वयाः सुरुचिरचरणकञ्जाशिञ्जानमणिमञ्जीरमञ्जुलारावास्त्वपरिमिता मत्तकाशिन्यः स्वकटाक्षभङ्ग्या क्षणेन निखिलजनसमूहं दर्पकविशिखकुलस्य लक्षीभूतं कुर्वन्ति ॥ २१ ॥

---

इत्यर्थः यः अधरमणिः मणिसदृशः अधरः तस्य विकासेन ईषद्धासेनेत्यर्थः दरीदृश्यमानाः स्पष्टतया बहिरवलोक्यमानाः मुकुरशकलानां दर्पणखण्डानां रुचेः शोभायाः शकलीकरणे विनाशन इत्यर्थः निपुणाः समर्थाश्च ये दन्ताङ्कुराः अङ्कुरसदृशा दन्ताः ते यासां तादृश्यः। कर्णयुगलेषु विलसतां शोभमानानां हाटकमयानां स्वर्णमयानां च । 'हिरण्यं हेम हाटकमि'त्यमरः । ताटङ्कानां कर्णाभरणानां रुचा कान्त्या । समस्तानां यूनां यौवनयुक्तपुरुषाणां हृदयं चित्तम् । आनन्दयन्त्यः सन्तोषयन्त्यः । रुचिराः मनोहराः कम्बुसमानाः शङ्खाकृतयश्च या ग्रीवाः गलाः तासां मध्येषु विलसद्भिः शोभमानैः रेखात्रितयैः रेखात्रयैः मनोहराः । सुविशाला सुतरां विस्तृता अधिकेत्यर्थः रुचिः येषां तादृशैः मणिहारमयैः कण्ठाभरणैः सञ्जाता उत्पन्ना अकुण्ठा अन्यूना च या सुषमा शोभा सा येषां तादृशा ये वक्षःप्रदेशाः तेषु लसितानां शोभितानाम् उत्तुङ्गानाम् उन्नतानां स्तनकलशानां कलशोपमानां स्तनानां द्युत्या शोभया । ऐरावतस्य मस्तकयुगलं मस्तकयुग्मम् । अवनतं विनम्रं । रचयन्त्यः कुर्वन्त्यः । ऐरावतमस्तकादप्यधिकोन्नतमनोहरकुचकुम्भयुग्मवत्त्वात् तस्य लज्जावहा इत्यर्थः । मनोहरतरस्यातीव मनोहरस्य कदलीस्तम्भस्य रम्भास्तम्भस्य डम्भं गर्वम् अपहन्ति विनाशयतीति डम्भापहं कदल्या एकान्तशैत्यवत्त्वादिदोषसत्त्वात् ततोऽपि मनोहरमित्यर्थः यद् ऊरुद्वयमूरुयुग्मं तद् यासां तादृश्यः । सुरुचिरेषु अतीव मनोहरेषु चरणकञ्जेषु पादपङ्कजेषु शिञ्जानानां शब्दं कुर्वतां मणिमयानां च मञ्जीराणां नूपुराणां मञ्जुलारावः मनोहरशब्दो यासां तादृश्यः । अपरिमिताः अनल्पाः । मत्तकाशिन्यः स्त्रियः तु । स्वकटाक्षभङ्ग्या आत्मीयकटाक्षशोभया, अवलोकनवैचित्र्येणेत्यर्थः ।

एताः पङ्कजलोचनाः खलु तदा लक्ष्मीपतेरद्भुतां
यात्रां वीक्ष्य पयोनिधेस्तटमनु प्रेमास्मितार्द्रेक्षणाः ।
स्वान्तोत्पन्नमिमाः कुतूहलमहो सोढुं त्वशक्ताः परं
भाषन्ते च मिथस्सरोजलसितं वक्त्रं विवृत्याबलाः ॥ १६ ॥

बाले! पश्य रमापतिं त्रिजगतां नाथं मुदामेयया
चायान्तं विनतासुतस्य सुमहास्कन्धाधिरूढं हरिम् ।
व्योमस्थायिसमस्तदेवनिकरैः संस्तूयमानं कर-
स्रस्तस्वर्विटपिप्रसूननिकरैरङ्घ्रिद्वयाम्भोजयोः ॥ १७ ॥

निखिलजनसमूहं, क्षणेन वेगेन । दर्पकविशिखकुलस्य कामशरसमूहस्य । लक्षीभूतं शरव्यभूतं । कुर्वन्ति एतासां विलोकनमात्रेण सर्वेऽपि कामपरवशा भवन्तीति भावः ॥ २१ ॥

**एता** इति । पङ्कजलोचनाः एताः स्त्रियः खलु तदा, लक्ष्मीपतेः श्रीपद्मनाभस्य । अद्भुतां, पयोनिधेः समुद्रस्य । तटं तीरमनु, तीरं लक्षीकृत्येत्यर्थः । यात्रां वीक्ष्य, प्रेमास्मितार्द्रेक्षणाः प्रेम्णा स्नेहेन स्मितेन मन्दहसितेन च आर्द्राणि शीतलानि ईक्षणान्यवलोकनानि यासां तादृश्यो, भवन्तीति शेषः । इमा अबलाः, स्वान्तोत्पन्नं हृदयसम्भूतं । परमुत्कृष्टं । कुतूहलं कौतुकं । सोढुम्, अशक्ताः अपारयन्त्यः सत्यः । सरोजलसितं कमलसुन्दरं । वक्त्रं मुखं । विवृत्य तिर्यक्कृत्य । मिथः अन्योन्यं । भाषन्ते च, अहो आश्चर्यम् । अत्राबलाशब्दस्य विशेष्यस्य कुतूहलसहनाशक्तौ बलराहित्यरूपकारणाभिप्रायगर्भितत्वात् परिकराङ्कुरालङ्कारः, 'साभिप्राये विशेष्ये तु भवेत् परिकराङ्कुरः' इति लक्षणात् ॥ १६ ॥

भाषणप्रकारमेवाह — **बाले** इति । बाले! त्वं त्रिजगतां नाथं, विनतासुतस्य गरुडस्य । सुमहति अतीव विशाले स्कन्धे भुजाशिरसि अधिरूढं सन्तम् । अमेयया अनल्पया । मुदा सन्तोषेण । आयान्तमागच्छन्तं । हरिम्, अङ्घ्रिद्वयाम्भोजयोः अङ्घ्रिद्वयात्मना परिणतयोः अम्भोजयोः । करेभ्यः

विरम विरम वक्तुं नायमवसरः सकलजगदीश्वरं भगवन्तं विलोक्य निजनयनयुगं कृतार्थीकरोमीति तावत् काचिद् भणति ॥ २२ ॥

अपरा तु भगवतस्तनुलसितेषु मणिहारप्रसूनादिष्वेव दत्तदृष्टिः परिहृतनयनसम्मीलना चिरतरं प्रतिमावन्निश्चेष्टतां दधाति ॥ २३ ॥

काचिदथ स्मरकोटिप्रतिमल्लकान्तिकेलिसौधायितं भगवतो रूपधेयं निरीक्ष्य तदेकनिमग्नाशया योगिनामपि दुर्लभां कामपि ब्रह्मानन्ददशामनुभुङ्क्ते ॥ २४ ॥

---

स्रस्ता गलिताः स्वर्विटपिप्रसूननिकराः कल्पवृक्षकुसुमसमूहाः येषां तादृशैः । व्योमस्थायिनाम् आकाशस्थितानां समस्तानां देवानां निकरैः समूहैः । संस्तूयमानं सम्यक् स्तूयमानं । रमापतिं श्रीपद्मनाभं । पश्य विलोकय ॥ १७ ॥

विरमेति । तावत् तदा । काचित्, विरम विरम सम्भाषणाद् निवर्तस्व निवर्तस्व । अयमवसरः समयो वक्तुं न अयं न सम्भाषणकाल इत्यर्थः । किन्तु, सकलजगदीश्वरं सर्वलोकनाथं । भगवन्तं श्रीपद्मनाभं । विलोक्य निजनयनयुगं, कृतार्थीकरोमि सफलं करोमि । भगवद्दर्शनेनैव नेत्रसाफल्यमिति भावः । इति, भणति वदति ॥ २२ ॥

अपरेति । अपरा अन्या तु । भगवतः श्रीपद्मनाभस्य । तनौ शरीरे लसितेषु शोभितेषु । मणिहारप्रसूनादिषु एव, दत्तदृष्टिः निहितदृष्टिः । परिहृतनयनसम्मीलना निर्निमेषेत्यर्थः । चिरतरं चिरकालं । प्रतिमावत् सालभञ्जिकावत् । निश्चेष्टतां निर्व्यापारत्वं । दधाति वहति ॥ २३ ॥

काचिदिति । अथ काचित्, स्मरकोटेः कोटिसंख्याकानां स्मराणामित्यर्थः प्रतिमल्ला प्रतिभटा सदृशीत्यर्थः या कान्तिस्तस्याः केलिसौधायितं क्रीडास्थानभूतं निरुपमकान्तिनिधानमित्यर्थः । भगवतः श्रीपद्मनाभस्य । रूपधेयम् आकृतिं । निरीक्ष्य दृष्ट्वा । तस्मिन् रूपधेये एकत्रैव निमग्न आ-

अथ तत्र च निर्मलसुधाक्षालिता निजशिखरसंस्पृष्ट-पयोधरमण्डला हर्म्यगणा विभान्ति ॥ २५ ॥

अस्माभिस्तु सुधामयैः स्वयमयं साम्यं दधानो हृदि
स्पष्टं हन्त सुधाकरः परमतो जेष्याम एनं क्षणात् ।
मत्वैवं हि विभिद्य जातसुषिरं चक्रुर्निजाग्रेण तं
सौधास्त्वम्बरनीलिमा बिलगतो बिम्बे विधोर्दृश्यते ॥१८॥

अथ विविधवितानमालिकासुरभिलधूपबहलपरिमली-भूताश्चामी सौधाः पटुतरकारुजननिर्मितविविधचित्रकुलैः

---

शयो यस्यास्तादृशी सती । योगिनामपि, दुर्लभां दुःखेन लब्धुं शक्यां । कामप्यनिर्वचनीयामित्यर्थः । ब्रह्मानन्ददशां मोक्षावस्थाम् । अनुभुङ्क्ते अनुभवति ॥ २४ ॥

अथेति । अथ, तत्र च मार्गे च । निर्मलया सुधया लेपविशेषेण क्षालिता रूषिताः । निजैः आत्मीयैः शिखरैः शृङ्गैः संस्पृष्टं सम्यक् स्पृष्टं पयोधरमण्डलं मेघसमूहो यैः तादृशाः । हर्म्यगणाः प्रासादसमूहाः । विभान्ति शोभन्ते ॥ २५ ॥

अस्माभिरिति । सौधास्तु अयं, सुधाकरः चन्द्रः । सुधा लेपविशेषः अमृतमिति च, तन्मयैः । अस्माभिस्तु, साम्यं साम्यबुद्धिमित्यर्थः । सुधामयोऽहं सुधामयैः एतैः सौधैः सम इत्येतादृशमतिमिति यावत् । हृदि हृदये । स्पष्टं दधानः, भवतीति शेषः । हन्त कष्टम् । अतः, एनं चन्द्रं । क्षणात् वेगेन । परमधिकं । जेष्याम इति, मत्वा विचार्य । हीत्यवधारणे । निजाग्रेण निजशृङ्गेणेत्यर्थः । तं चन्द्रं । विभिद्य विदार्य । जातसुषिरमुत्पन्नबिलं । चक्रुः । अत एव बिलगतः, अम्बरनीलिमा आकाशनैल्यं । विधोश्चन्द्रस्य । बिम्बे दृश्यते । चन्द्रमध्ये दृश्यमानकलङ्कस्य सौधकृतबिलगताकाशनैल्यरूपेणोत्प्रेक्षणादुत्प्रेक्षालाङ्करः व्यञ्जकाप्रयोगाद्गम्यः ॥ १८ ॥

अथेति । अथ, विविधाभिः नानाप्रकाराभिः वितानमालिकाभिः वितानेषु विद्यमानाभिः मालिकाभिः मालाभिः सुरभिलैर्धूपैश्च बहलः अधिकः

समस्तजनान् विस्मितान् कुर्वन्ति ॥ २६ ॥

प्रासादेष्वलमेषु निस्तुलगवाक्षान्तःस्थितैः सादरं
निस्सीमाप्रतिमप्रमोदभरितैर्लोकैस्तदा वन्दितः ।
मध्ये किञ्च विलम्ब्य किञ्चन तदीयार्तिं हरन् वीक्षणे-
नानन्दामृतसम्भृतेन भगवानभ्येति रत्नाकरम् ॥ १९ ॥

तत्र तु निजौन्नत्येनावदाततया च कैलासभूधरं धिक्कु-
र्वन्नसंख्यजनसमूहसंवृतो विलसति वालुकामयो गिरिः ॥२७॥

सान्द्र इत्यर्थः परिमलः सौरभ्यं येषां तादृशभूताः च । अमी सौधाः, पटु-तरैरतीव समर्थैः कारुजनैः शिल्पिजनैः निर्मितानि विविधानि नानाप्रकाराणि च यानि चित्राणि तेषां कुलैः समूहैः करणैः । समस्तजनान्, विस्मितान् सञ्जातविस्मयान् । कुर्वन्ति ॥ २६ ॥

प्रासादेष्विति । भगवान् श्रीपद्मनाभः । तदा एषु प्रासादेषु, निस्तुलानां निरुपमानां गवाक्षाणामन्तर्भागे स्थितैः । निःसीमेन निरवधिकेन अप्रतिमेन निरुपमेन प्रमोदेन सन्तोषेण भरितैः पूरितैः । लोकैः जनैः । अलमधिकं । सादरं यथा तथा वन्दितः, किञ्च अपिच । मध्ये मार्गमध्ये । किञ्चन विलम्ब्य, आनन्द एव यदमृतं तेन सम्भृतेन सम्पूरितेन । वीक्षणेन विलोकनेन । तदीयां तत्सम्बन्धिनीं प्रासादस्थितजनसम्बन्धिनीमित्यर्थः आर्तिं । हरन् निवारयन् सन् । रत्नाकरं समुद्रम् । अभ्येति अभिमुखीकृत्य याति ॥ १९ ॥

तत्रत्विति । तत्र मार्गमध्ये तु । निजेनात्मीयेन औन्नत्येन । अवदाततया धवलतया च । कैलासभूधरं कैलासनामकपर्वतं । धिक्कुर्वन् निराकुर्वन् । कैलासाचलोऽपि रजतमयत्वादतीव धवलः । असंख्यानां जनानां समूहेन संवृतः परिवृतः । वालुकामयः वालुकास्वरूपः । गिरिः पर्वतः । विलसति शोभते ॥ २७ ॥

अथ तदानीं फेनिलतमदुग्धाम्भोनिधिकल्लोलशोभावहस्य वालुकामयस्य शिखरिणः शृङ्गमुपाश्रितैरनेकविधैर्जननिवहैः सानन्दं सङ्कीर्तितानुपमगुणगणो भगवान् स्यानन्दूराधिनाथः श्रीसारसनाभस्ततोऽपि व्रजन् यदा वारिधितटं प्राप्नोति, तदा निजतनयाधवस्य भगवतश्चिरकाललब्धनिरीक्षणेनातुलितप्रमोदभारं वहन्निवायं जलनिधिरुद्यत्फेनमयस्मितस्तुङ्गतरङ्गप्रक्षेपेण सूचितसौहृदद्योतकबाहुप्रसारो विलसति ॥ २८ ॥

तावत् सञ्चरणेन तान्ततनवो घर्माम्भसार्द्राननः
वीरास्तत्र तु वाहिनीभटजनाः सर्वेऽपि सिन्धोस्तटे ।

---

अथेति । अथ तदानीं, फेनिलतमस्य अतीव फेनिलस्य दुग्धाम्भोनिधेः क्षीरसमुद्रस्य ये कल्लोला महातरङ्गाः । 'अथोर्मिषु । महत्सूल्लोलकल्लोलावि'त्यमरः । तेषां शोभामावहतीति शोभावहः तादृशस्य । वालुकामयस्य, शिखरिणः पर्वतस्य । शृङ्गं शिखरम् । उपाश्रितैः समाश्रितैः । अनेकविधैः नानाप्रकारैः । जननिवहैर्जनसमूहैः । सानन्दं यथा तथा, सम्यक्कीर्तितः वर्णितः अनुपमानां गुणानां गणः समूहो यस्य तादृशः । भगवान् स्यानन्दूराधिनाथः, श्रीसारसनाभः श्रीपद्मनाभः । ततः वालुकामयगिरिसविधादपि । व्रजन् गच्छन् । यदा, वारिधितटं समुद्रतीरं । प्राप्नोति, तदा अयं, जलनिधिः समुद्रः । निजतनयायाः महालक्ष्म्याः धवस्य भर्तुः । 'धवः प्रियः पतिरि'त्यमरः । भगवतः जामातृभूतस्य श्रीपद्मनाभस्येत्यर्थः । चिरकालेन लब्धं यद् निरीक्षणम् अवलोकनं तेन हेतुना । अतुलितं प्रमोदभारं । वहन्, इवेत्युत्प्रेक्षा । उद्यदुद्भूतं फेनमयं स्मितं मन्दहासो यस्य तादृशः । तुङ्गानाम् उन्नतानां तरङ्गाणां प्रक्षेपेण प्रसारेण । सूचितः ज्ञापितः सौहृदद्योतकः बन्धुतासूचकश्च यः बाहुप्रसारः स येन तादृशः सन् । विलसति शोभते ॥२८॥

तावदिति । तावत्, सञ्चरणेन सञ्चारेण हेतुना । तान्ततनवः क्लान्तशरीराः । घर्माम्भसा स्वेदबिन्दुना । आर्द्रमाननं येषां तादृशाः । वीराः

भक्ष्यैः स्वादुजलैः क्षुधामपि तृषं हन्तापनीय स्वयं
स्वैरालापममी मिथो विदधते वेलानिलानन्दिताः ॥ २० ॥

इति स्यानन्दूरपुरवर्णनप्रबन्धे
अभिषेकयात्रा नामाष्टमः
स्तबकः ।

---

शूराः । सर्वे अमी, वाहिनीभटजनाः सेनाभटजनाः अपि । तत्र, सिन्धोः समुद्रस्य । तटे तीरे तु भक्ष्यैः भक्षणयोग्यपदार्थैः । क्षुधां क्षुधं । 'वष्टि वागुरि-रि'त्यादिना आबन्तता । स्वादुजलैः मधुरोदकैः । तृषं पिपासामपि । स्वयमात्मनैव । अपनीय निवार्य । वेलानिलेन तीरवायुनानन्दिताः सञ्जातानन्दाः सन्तः । मिथः अन्योन्यं । स्वैरालापं, विदधते कुर्वन्ति । हन्तेति हर्षे ॥ २० ॥

इति श्रीस्यानन्दूरपुरवर्णनप्रबन्धव्याख्यायाम्
अष्टमः स्तबकः ।

## अथ नवमः स्तबकः ।

अथ तदानीं सुविस्तृतोऽपि वाहिनीशस्तीरागतामिमां वाहिनीं वोढुमपर्याप्त इत्येव प्रतिभाति पश्यताम् ॥ १ ॥

याते भास्वति पश्चिमाचलभुवं सुव्यक्तरागे हरे-
द्रष्टुं स्नानमहोत्सवं जलनिधौ लोकत्रयाधीशितुः ।
प्राप्तानां कुतुकामृताप्लुतधियां नृणां तदा वारिधे-
स्तीरे निर्मलवालुकाविलसिते बाधस्त्ववाग्गोचरः ॥ १ ॥

अथ तावद्भगवन्तं पङ्कजनाभमनुयान्तस्त्वितरदेवाश्च भगवतः स्नानात् पूर्वमेव स्नाताः सागरतटान्निवृत्य गमनवेलायामविलम्बेनानुयातुं सन्नद्धास्तिष्ठन्ति ॥ २ ॥

---

अथेति । अथ तदानीं, सुविस्तृतः सुतरां विशालोऽपि । वाहिनीशः समुद्रः । पश्यतां द्रष्टृणां । तीरागतां तीरप्राप्ताम् । इमां, वाहिनीं सेनां नदीमिति च । वोढुम्, अपर्याप्तः असमर्थः । इत्येव, प्रतिभाति प्रतीयते । समुद्रादप्यधिकदेशपरिमिता सेनेति भावः ॥ १ ॥

यात इति । तदा, भास्वति सूर्ये । सुव्यक्तः सुतरां व्यक्तः रागो रक्तिमा यस्य तादृशे सति । पश्चिमाचलभुवमित्यत्र स्त्रीलिङ्गमहिम्ना स्त्रीत्वद्योतनात् सुव्यक्तानुराग इति च गम्यते । पश्चिमाचलभुवम् अस्ताचलप्रदेशं । याते सति, लोकत्रयाधीशितुः त्रैलोक्याधिपतेः । हरेः श्रीपद्मनाभस्य । जलनिधौ समुद्रे । स्नानमेव महोत्सवं । द्रष्टुं, निर्मलाभिः धवलाभिः वालुकाभिः सिकताभिः विलसिते शोभिते । वारिधेः समुद्रस्य । तीरे प्राप्तानां, कुतुके कौतुक एवामृते आप्लुता निमग्ना धीः चित्तं येषां तादृशानां । नृणां नराणां । बाधः सम्मर्दः तु । अवाग्गोचरः वाचामविषयः । भवतीति शेषः । तेषां सम्मर्दो वक्तुमशक्य एवेति भावः ॥ १ ॥

अथेति । अथ तावद् भगवन्तं, पङ्कजनाभं श्रीपद्मनाभम् । अनुयान्तः अनुगताः । इतरदेवाः पूर्वोक्ताः अन्यदेवाश्च । भगवतः श्रीपद्मनाभस्य । स्नानात् पूर्वमेव स्नाताः, सागरतटात् समुद्रतीरात् । निवृत्य, गमनवेलायां गमन-

ततस्तु भगवानम्भोरुहनाभो गृहीताम्बुधिस्नानसम्भारसमस्तपरिजनसमूहसमावृतोपान्तः संख्याविहीनदीपकरदीपिकालघुसुषमया विनाशिताप्रतिमातिमिरभारमुदधेस्तटप्रदेशं सनाथीकुरुते ॥ ३ ॥

त्रैलोक्याधिपतिर्यदा जलनिधौ स्नातस्त्रिवारं हरि-
स्त्रैलोक्यस्थितलोकगीतमहिमा सानन्दमम्भोनिधिम् ।
कुर्वन् पूततमं पदाब्जयुगलस्पर्शेन तन्निःसृतं
तीर्थं पुण्यतमं दधत्यपि तदा मूर्ध्ना महान्तो जनाः ॥ २ ॥

काले । अविलम्बेन विलम्बं विना । अनुयातुमनुगन्तुं । सन्नद्धाः बद्धकक्ष्याः सन्तः । तिष्ठन्ति ॥ २ ॥

ततस्त्विति । ततस्तु भगवान्, अम्भोरुहनाभः श्रीपद्मनाभः । गृहीताः अम्बुधिस्नानार्थं ये सम्भाराः उपकरणानि ते यैः तादृशैः समस्तैः परिजनसमूहैः समावृतः परिवृत उपान्तः समीपप्रदेशो यस्य तादृशः सन् । संख्याविहीनानां निरवधिकानां दीपानां करदीपिकानां च अलघ्व्या अनल्पया सुषमया शोभया । विनाशितः अप्रतिमो निस्तुलः अत्यर्थं निबिड इत्यर्थः यस्तिमिरभारः अन्धकारसमूहः स यत्र तादृशम् । उदधेः समुद्रस्य । तटप्रदेशं तीरप्रदेशं । सनाथीकुरुते स्वेन सनाथं कुरुते इत्यर्थः ॥ ३ ॥

त्रैलोक्याधिपतिरिति । त्रैलोक्याधिपतिः, त्रैलोक्यस्थितैः त्रैलोक्यवासिभिः लोकैः जनैः गीतः कीर्तितः महिमा माहात्म्यं यस्य तादृशः । हरिः श्रीपद्मनाभः । पदाब्जयुगलस्पर्शेन पादपद्मयुग्ममेलनेन । अम्भोनिधिं समुद्रं । पूततमम् अतीव शुद्धं । कुर्वन् सन् सानन्दं यथा तथा यदा, जलनिधौ समुद्रे । त्रिवारं स्नातः, भवतीति शेषः । तदा, महान्तो जनाः सज्जनाः । तन्निःसृतं तस्मात् पादपद्मयुगाद् निःसृतं । पुण्यतमम् अतीव पावनतमं । मूर्ध्ना स्वोत्तमाङ्गेन । दधत्यपि वहन्ति च ॥ २ ॥

अथ कलितवारिधिस्नानः स भगवानम्बुजनाभो भद्रतरहारिद्रचूर्णसमलङ्कृततनुर्विविधतरसपर्याविशेषपरम - हृष्टाशयो निर्गतमार्गसञ्चारक्लमैः पूर्वोक्तैर्भटजनादिभिः सकुतूहलमन्वीयमानो दिनकरपराजयप्रदानपटुत्वावहरुचिरतर-दीपरोचिषा विशदीकृतेन वर्त्मना पयोनिधेस्तटान्निजालयं प्रति गन्तुं यदारभते, तदा पूर्वोक्ता एव छत्रचामरतालवृन्त-पताकानिवहवादित्रादयो द्विगुणां शोभां दधते ॥ ४ ॥

भूषारत्नकदम्बबिम्बिततमा कान्तिस्तदानीं हरे-
र्यात्रायां लसमानदीपनिवहाज्जाताखिलामोददा ।

अथेति । अथ, कलितवारिधिस्नानः कृतसमुद्रस्नानः । भगवान् सः, अम्बुजनाभः श्रीपद्मनाभः । भद्रतरेणातीव मङ्गलकारिणा हारिद्रचूर्णेन हरिद्राधूलिना, 'निशाख्या काञ्चनी पीता हरिद्रा वरवर्णिनी'त्यमरः । सम्यगलंकृता तनुः शरीरं यस्य तादृशः । विविधतरैः नानाप्रकारैः वैखानसादिभिरित्यर्थः सपर्याविशेषैः पूजाविशेषैः परमहृष्टोऽतीव सन्तुष्ट आशयः चित्तं यस्य तादृशः । निर्गतः निवृत्तः मार्गसञ्चारेणाध्वगमनेन यः क्लमः श्रमः स येभ्यः तादृशैः । पूर्वोक्तैः भटजनादिभिः सकुतूहलं यथा तथा, अन्वीयमानः अनुगम्यमानः । दिनकरस्य सूर्यस्य पराजयप्रदाने अपजयदाने यत् पटुत्वं सामर्थ्यं तद् आवहतीति धरतीति तथा तादृशेन रुचिरतरेणातीव मनोहरेण च दीपरोचिषा प्रदीपप्रभया । विशदीकृतेन निर्मलीकृतेन, निरन्धकारीकृतेनेत्यर्थः । वर्त्मना मार्गेण । पयोनिधेः समुद्रस्य । तटात् तीरात् । निजालयं प्रति गन्तुं यदारभते, तदा पूर्वोक्ता एव, छत्रचामरतालवृन्तपताकानिवहवादित्रादयः छत्रबालव्यजनव्यजनवैजयन्तीसमूहवाद्यादयः । द्विगुणां शोभां, दधते वहन्ति ॥ ४ ॥

भूषारत्नेति । तदानीं, यात्रायां घोषयात्रायां । लसमानात् शोभमानाद् दीपनिवहाद् दीपसमूहात् । जाता उत्पन्ना । हरेः श्रीपद्मनाभस्य । भूषारत्नानामाभरणप्रत्युप्तमणीनां कदम्बे समूहे, 'निकुरुम्बं कदम्बकमि'त्यमरः । बिम्बि-

अक्ष्णोर्हन्त निमीलनाक्षमतया नूनं करोत्याकुलं
चेतो विश्वसुधाभुजां च दधती विद्युल्लताविभ्रमम् ॥ ३ ॥

एवमस्मिन् भगवत्यम्भोजनाभे निजमन्दिरं प्रति यात्रां समारभमाणे मध्येमार्गं विलसन्तः पूर्वोक्ता एव हर्म्यावतंसाः सुमनोज्ञदीपनिकायद्विगुणीभूतमहसः किमिन्द्रजालमिदमिति समस्तजनैः सविस्मयं वीक्षिता विलसन्ति ॥ ५ ॥

अथ ततोऽपि निर्गत्यानेकजनसमुदायविनतपदारविन्दः स भगवानरविन्दनाभो यदा तु दुर्गद्वारान्तर्विशति,

---

ततमा अतिशयेन प्रतिबिम्बिता । अखिलानां सर्वेषामामोददा सन्तोषप्रदा । विद्युल्लताविभ्रमं तटिद्विलासं । दधती बिभ्राणा । विद्युल्लतासदृशीत्यर्थः । कान्तिर्द्युतिः । अक्ष्णोः नेत्रयोः । निमीलने अक्षमतया अशक्ततया, तेषामनिमेषत्वादिति भावः । विश्वेषां सर्वेषां सुधाभुजां देवानां च । चेतः, आकुलं परवशं । करोति, नूनं निश्चयः । हन्त आश्चर्यम् ॥ ३ ॥

**एवमिति** । भगवति अस्मिन्, अम्भोजनाभे श्रीपद्मनाभे । एवमुक्तप्रकारेण । निजमन्दिरं प्रति यात्रां समारभमाणे सति, मध्येमार्गं मार्गमध्ये । विलसन्तः शोभमानाः । पूर्वोक्ता एव, हर्म्यावतंसाः प्रासादश्रेष्ठाः । सुमनोज्ञानामतीव मनोहराणां दीपानां निकायेन समूहेन द्विगुणीभूतं महस्तेजो येषां तादृशाः । इदं परिदृश्यमानम् । इन्द्रजालमिन्द्रजालविद्या । किमिति समस्तजनैः सविस्मयं यथा तथा, वीक्षिताः विलोकिताश्च सन्तः । पूर्वशोभातः अधिकशोभावहत्वादिन्द्रजालशङ्का । विलसन्ति शोभन्ते ॥ ५ ॥

**अथेति** । अथ, अनेकेषां बहुविधानां जनानां समुदायेन समूहेन विनतं पदारविन्दं यस्य तादृशः । भगवान् सः, अरविन्दनाभः श्रीपद्मनाभः । ततः तस्माद् देशादपि । निर्गत्य निर्गम्य । यदा तु, दुर्गद्वारान्तः दुर्गद्वारान्तर्भागे । विशति प्रविशति । तदा, भगवतः श्रीपद्मनाभस्य । तादृशावस्थायाः दुर्गद्वारान्तःप्रवेशवेलायाः द्योतकः सूचकः । खधूमारवः पुनरपि, प्राग्वद् वारिधि-

तदा भगवतस्तादृशावस्थाद्योतकः खधूमारवः पुनरपि प्राग्वद्विश्वजनकर्णविवरगोचरीभवति ॥ ६ ॥

अथ तत्र तत्र स्थितैर्भगवद्दर्शनकुतूहलानिमीलिताक्षिपुटैर्नरनारीनिकरैः सप्रेमवीक्षणमेवं स्तुतो विलसति स भगवानम्भोरुहनाभः ॥ ७ ॥

निर्भरप्रणयनिश्चलत्रिदशवृन्दगीतमहिमा मुदा
भक्तवर्यशुकनारदादिमुनिवन्द्यमानचरणाम्बुजः ।
स्निग्धहासनवचन्द्रिकाविसरपाण्डरीकृतचराचरः
पश्य विश्वमभिनन्दयन् व्रजति मन्दिरान्तरिह माधवः ॥

---

स्नानगमनवेलायामिव । विश्वेषां सर्वेषां जनानां कर्णविवरस्य श्रोत्रद्वारस्य गोचरीभवति विषयो भवतीत्यर्थः ॥ ६ ॥

अथेति । अथ भगवान्, अम्भोरुहनाभः श्रीपद्मनाभः । तत्र तत्र प्रदेशे स्थितैः । भगवद्दर्शने यत्कुतूहलं तेन हेतुना अनिमीलितमक्षिपुटं येषां तादृशैः । नरनारीनिकरैः, सप्रेमवीक्षणं स्नेहावलोकनसहितं यथा तथा । एवं वक्ष्यमाणप्रकारेण । स्तुतः सन्, विलसति शोभते ॥ ७ ॥

स्तुतिप्रकारमेवाह — निर्भरेति । निर्भरेण भर्तुमशक्येन अधिकेनेत्यर्थः प्रणयेन भक्त्येत्यर्थः निश्चलमचञ्चलं निश्चेष्टमित्यर्थः यत् त्रिदशवृन्दं देवसमूहः तेन गीतः कीर्तितः महिमा माहात्म्यं यस्य तादृशः । भक्तवर्या भक्तश्रेष्ठाः ये शुकनारदादिमुनयः तैर्वन्द्यमानं चरणाम्बुजं यस्य तादृशः । स्निग्धः मसृणः हास एव या नवचन्द्रिका तस्याः विसरेण प्रसारेण पाण्डरीकृतं धवलीकृतं चराचरं स्थावरजङ्गमात्मकं जगद् येन तादृशः । माधवः श्रीपद्मनाभः । मुदा सन्तोषेण । इह, विश्वं सकलम् । अभिनन्दयन् आनन्दयन् । मन्दिरान्तः क्षेत्रान्तर्भागे । व्रजति प्रविशति । पश्य अवलोकय । चतुर्थपादस्तु एतत्स्तुतिसमाप्तिपर्यन्तश्लोकेष्वप्येवमेव द्रष्टव्यः । स्निग्धहासनवचन्द्रिकेत्यत्र रूपकं, पाण्डरीकृतचराचरेत्यत्र तद्गुणश्चेति तयोरङ्गाङ्गिभावेन सङ्करः ॥ ४ ॥

मानसे सरसि कामकेलिरतराजहंसमदहारिणा
तप्तहेममयदिव्यदण्डरुचिसंश्रितेन सकुतूहलम् ।
चामरोत्तमकुलेन सम्प्रति च वीज्यमान इह सादरं
पश्य विश्वमभिनन्दयन् व्रजति मन्दिरान्तरिह माधवः ॥
तालवृन्तमहितातपत्रयुतपाणिभिः परिजनैर्वृतो
नीलनीरजविलोचनाविधृतचारुदीपरुचिभासितः ।
पङ्कजातसदृशायतेक्षणयुगातिपूर्णकरुणारसः
पश्य विश्वमभिनन्दयन् व्रजति मन्दिरान्तरिह माधवः ॥
मङ्गलारवमृदङ्गशङ्खवरशृङ्गचारुपटहोच्चल-
त्कम्रनादमुरलीलसड्डमरुतालदुन्दुभिमुखैः परम् ।

---

**मानस** इति । मानसे मानसाख्ये । सरसि तटाके । कामकेल्यां कामं यथेच्छं केल्यां क्रीडायां रतानां तत्पराणां राजहंसानां मदं गर्वं हरतीति तथा तादृशेन, राजहंसादपि धावल्ययुक्तेनेत्यर्थः । 'राजहंसास्तु ते चञ्चुचरणैर्लोहितैः सिताः' इत्यमरः । तप्तहेममयः तप्तस्वर्णस्वरूपः दिव्यश्च यो दण्डः तस्य रुचा शोभया संश्रितेन आश्रितेन, स्वर्णमयदण्डशोभावतेत्यर्थः । चामरोत्तमानां चामरश्रेष्ठानां कुलेन समूहेन । सम्प्रति च सादरं यथा तथा वीज्यमानः माधवः सकुतूहलं यथा तथा विश्वमभिनन्दयन् मन्दिरान्तः व्रजति पश्य ॥

**तालवृन्ते**ति । तालवृन्तैः व्यजनैः महितातपत्रैः उत्कृष्टच्छत्रैः च युताः सहिताः पाणयो येषां तादृशैः । परिजनैः परिवारैः । वृतः, नीलनीरजवद् इन्दीवरवद् विलोचनानि नेत्राणि यासां तादृशीभिः सुन्दरीभिरित्यर्थः विधृता उद्धृताः चारवश्च ये दीपास्तेषां रुच्या कान्त्या भासितः शोभितः । पङ्कजातेन पद्मेन सदृशे तुल्ये आयते दीर्घे च ईक्षणयुगे नयनयुगले अतिपूर्णः अधिकं पूर्णः करुणारसः यस्य तादृशः । माधवः इह विश्वमभिनन्दयन् मन्दिरान्तः व्रजति पश्य ॥ ६ ॥

**मङ्गलारवे**ति । मङ्गलः शुभावह आरवः शब्दो यस्य तादृशः यः मृदङ्गः शङ्खश्च वरं श्रेष्ठं यत् शृङ्गं शृङ्गाकारवाद्यविशेषः चारुर्मनोहरः यः पटहः उच्चलन् उद्गच्छन् कम्रः मनोहरश्च यः नादः स यस्यास्तादृशी या मुरली

दिव्यवाद्यनिवहैरलं सपदि घुष्यमाणसविधस्त्वसौ
पश्य विश्वमभिनन्दयन् व्रजति मन्दिरान्तरिह माधवः ॥

पञ्चबाणदयितासमानसुरयौवतेन सकुतूहलं
वल्लभैश्च सहितेन कामशरपातविह्वलहृदा मुदा ।
वीक्ष्यमाण इह लज्जयावनतकन्धरं पुलकशालिना
पश्य विश्वमभिनन्दयन् व्रजति मन्दिरान्तरिह माधवः ॥

अर्चितो भवति कल्पवृक्ष इह कामितार्थसमवाप्तये
सोऽप्यमुष्य पदपद्मयोः किरति चात्मनि स्थितसुमावलिम् ।
तादृशः सुमहतां चिरेण हृदि लभ्यपादसरसीरुहः
पश्य विश्वमभिनन्दयन् व्रजति मन्दिरान्तरिह माधवः ॥

---

लसन्तो डमरुश्च तालं कांस्यनिर्मितवाद्यविशेषः दुन्दुभिः भेरी च एते मुखाः प्रथमा येषां तादृशैः । दिव्यैरुत्कृष्टैश्च वाद्यनिवहैः वादित्रजालैः । परं, घुष्यमाणं शब्दायमानं सविधं समीपप्रदेशो यस्य तादृशः । असौ माधवस्तु सपदि इह विश्वमभिनन्दयन् मन्दिरान्तः व्रजति पश्य ॥ ७ ॥

**पञ्चबाणे**ति । वल्लभैः स्वभर्तृभिः । सहितेन, कामशराणां पातेन पतनेन विह्वलं खिन्नं हृत् चित्तं यस्य तादृशेन । पुलकशालिना रोमाञ्चवता । पञ्चबाणदयिता रतिदेवी तया समानेन सदृशेन तद्वत्सुन्दरेणेत्यर्थः, सुरयौवतेन देवस्त्रीसमूहेन । मुदा सन्तोषेण । सकुतूहलं लज्जया हेतुना, अवनतकन्धरं नतग्रीवं च यथा तथा । इह वीक्ष्यमाणः अवलोक्यमानः । माधवः इह विश्वमभिनन्दयन् मन्दिरान्तः व्रजति पश्य ॥ ८ ॥

**अर्चित** इति । कामितार्थसमवाप्तये अभिप्रेतार्थलाभार्थं । कल्पवृक्षः अर्चितः भवति । सोऽपि कल्पवृक्षोऽपि । आत्मनि स्थितां सुमावलिं पुष्पसमूहम् । अमुष्य श्रीपद्मनाभस्य । इह, पदपद्मयोः पद्मसदृशयोः पदयोः । किरति वर्षयति । स्वोत्पन्नपुष्पैरर्चयतीत्यर्थः । तादृशः कल्पवृक्षेणाप्यर्च्यमानपदारविन्द इत्यर्थः । सुमहतां सज्जनानां । चिरेण चिरकालेन । हृदि हृदये । लभ्यं पादसरसीरुहं यस्य तादृशः सज्जनैरपि दुःखेन ध्येयपादारविन्द

कुन्दपुष्पमयदामलालसितकन्धरो भुवनसुन्दरो
दिव्यपत्रिवरपाणियुग्मपरिलालिताङ्घ्रिसरसीरुहः ।
दर्पकायुतरुचिच्छटापरमदर्पनाशनपटुच्छविः
पश्य विश्वमभिनन्दयन् व्रजति मन्दिरान्तरिह माधवः ॥

घोरसङ्गरसमापतद्विमतवारिवाहपवनायितां
वाहिनीं समरशूरनाथसहितां पुरः सपदि चारयन् ।
विश्वलोकशमलाद्रिखण्डनपविः पवित्रगुणसम्भृतः
पश्य विश्वमभिनन्दयन् व्रजति मन्दिरान्तरिह माधवः ॥

वासरेशशतलोभनीयमणियुक्तभूषणरुचा भृशं
वासवानुपमकार्मुकद्युतिमदच्छिदापिच विराजितः ।

---

इति यावत् । माधवः इह विश्वमभिनन्दयन् मन्दिरान्तः व्रजति पश्य ॥ ९ ॥

कुन्दपुष्पेति । कुन्दपुष्पमयेन दाम्ना मालया लालसिता कन्धरा ग्रीवा यस्य तादृशः । भुवनसुन्दरः, दिव्यस्य श्रेष्ठस्य पत्रिवरस्य गरुडस्य पाणियुग्मेन परिलालितम् अङ्घ्रिसरसीरुहं यस्य तादृशः । दर्पकायुतस्य अयुतसंख्याकानां कामानां रुचिच्छटायाः कान्तिसमूहस्य परम उत्कृष्टः यः दर्पः गर्वः तस्य नाशने पटुः समर्था या छविः कान्तिः सा यस्य तादृशः । माधवः इह विश्वम् अभिनन्दयन् मन्दिरान्तः व्रजति पश्य ॥ १० ॥

घोरसङ्गरेति । घोरसङ्गरे भयङ्करयुद्धे समापतन्तः समागच्छन्तः विमताः शत्रव एव ये वारिवाहा मेघास्तेषां पवनायितां वायुभूतां, तन्नाशकारिणीमित्यर्थः । समरे युद्धे शूरैः नाथैः सेनानायकैः सहितां युक्तां । वाहिनीं सेनां । पुरः पुरोभागे । चारयन्, विश्वेषां लोकानां शमलस्य पापस्यैवाद्रेः पर्वतस्य खण्डने पविः कुलिशं । पवित्रैः गुणैः सम्भृतः सम्पूर्णः । माधवः सपदि इह विश्वमभिनन्दयन् मन्दिरान्तः व्रजति पश्य ॥ ११ ॥

वासरेशेति । अपिच किञ्च । वासवस्य इन्द्रस्य अनुपमं यत् कार्मुकं धनुः तस्य द्युत्याः शोभायाः मदच्छिदा गर्वनाशिकया । वासरेशशतवत् आदित्यसमूहवत् लोभनीयैर्मनोहरैर्मणिभिः रत्नैः युक्तानां सहितानां भूषणान(

वाससा च नवजातरूपरुचिभासुरेण किल संवृतः
पश्य विश्वमभिनन्दयन् व्रजति मन्दिरान्तरिह माधवः ॥
स्नानयानमिषतोऽम्बुधौ निखिललोकमात्तकुतुकं विभुः
स्नापयन्नमृतवारिधौ सरसमात्ममूर्तिकलनात् तदा ।
इन्दिराभिगमकौतुकादिव च मन्दहाससहितो जवात्
पश्य विश्वमभिनन्दयन् व्रजति मन्दिरान्तरिह माधवः ॥

एवमपरिमितजननिकायवर्णितविविधविभवः स भगवानरविन्दनाभः स्वपादसंसेवननिरतवाहिनीशसहितया सेनया च सभक्तिभारमवनतपदाम्बुजो निस्तुलानन्दसम्पूर्णद्विजा-

---

रुचा कान्त्या । विराजितः शोभितः । नवजातरूपस्य तप्तस्वर्णस्य रुचिवत् शोभावद् भासुरेण मनोहरेण । वाससा वस्त्रेण, पीताम्बरेणेत्यर्थः । संवृतः किल माधवः इह विश्वम् अभिनन्दयन् मन्दिरान्तः व्रजति पश्य ॥ १२ ॥

**स्नानयानमिषत** इति । अम्बुधौ समुद्रे स्नानयानमिषतः स्नानार्थगमनव्याजेन । आत्तकुतुकं भगवद्दर्शने सकुतूहलमित्यर्थः । निखिललोकं तदा, आत्ममूर्तिकलनात् स्वकीयशरीरप्रदर्शनात् । अमृतवारिधौ आनन्दामृतसमुद्रे । सरसं यथा तथा, स्नापयन् निमज्जयन्नित्यर्थः । दशमोत्सवदिने भगवतो वारिधिगमनं न तु स्नानार्थं, किन्तु स्वदर्शनकुतूहलिजनेभ्यः स्वप्रदर्शनेन तानानन्दामृते स्नापयितुमेवेत्युक्त्या भगवतोऽतिकारुणिकत्वं द्योत्यते । मन्दहाससहितः माधवः इह विश्वमभिनन्दयन् । इन्दिराभिगमे महालक्ष्म्यभिमुखगमने यत्कौतुकं तस्माद्धेतोः इवेत्युत्प्रेक्षा । जवाद् वेगात् । मन्दिरान्तः व्रजति पश्य ॥ १३ ॥

**एवमिति** । एवमुक्तप्रकारेण । अपरिमितेनानल्पेन जननिकायेन जनसमूहेन वर्णिताः विविधाः नानाप्रकाराश्च विभवाः वैभवानि यस्य तादृशः । भगवान् सः, अरविन्दनाभः श्रीपद्मनाभः । स्वपादयोः सम्यक् सेवने निरतैस्तत्परैर्वाहिनीशैः सेनानायकैः सहितया युक्तया । सेनया च, सभक्तिभारं भक्तिभारसहितं यथा तथा । अवनतं पदाम्बुजं पादारविन्दं यस्य तादृशः

तिकुलनिबिडीभूतं निजालयवरान्तर्भागं सानन्दं प्रविशति ॥

अथ तदानीं तेषां द्विजातिवराणां जयविजयेत्यादीनि जगत्पवित्राणि मङ्गलवचनानि मन्दिरान्तर्भागमुद्घोषितं वितन्वते ॥ ९ ॥

तदनु च भगवानम्भोजनाभो यथापूर्वं श्रीबलिमण्डपे त्रिः परिक्रम्य तृतीयपरिक्रमणावसरे निजयात्रानुगतानितरालयेभ्यः समागतान् देवांस्तु यथोचितं विविधप्रसूनफलादिवितरणेन सफलमनोरथान् कलयन् सम्प्रेषयति ॥ १० ॥

सम्प्रेषितेष्वमीषु देवेषु स भगवान् स्वयं सौवर्णध्वजाधस्तले विलसन् ध्वजपताकावरोपणविधानानन्तरं निजालयान्तर्विशति ॥ ११ ॥

---

सन् । निस्तुलेनानन्देन सम्पूर्णैः द्विजातिकुलैः ब्राह्मणसमूहैर्निबिडीभूतं निरन्तरीभूतं । निजस्यालयवरस्यान्तर्भागं निजालयप्राकारान्तर्भागमित्यर्थः । सानन्दं यथा तथा प्रविशति ॥ ८ ॥

अथेति । अथ, तदानीं भगवतो मन्दिरान्तः प्रवेशवेलायामित्यर्थः । तेषामुक्तानां । द्विजातिवराणां ब्राह्मणश्रेष्ठानां जय विजय इत्यादीनि जगत्पवित्राणि मङ्गलवचनानि मन्दिरान्तर्भागम् । उद्घोषितं सशब्दमित्यर्थः । वितन्वते ॥ ९ ॥

तदन्विति । तदनु च भगवान्, अम्भोजनाभः श्रीपद्मनाभः । यथापूर्वं पूर्ववत् । श्रीबलिमण्डपे, त्रिः त्रिवारं । परिक्रम्य प्रदक्षिणं कृत्वा । तृतीयपरिक्रमणावसरे, निजयात्रायामनुगतान् आत्मानमनुयातान् । इतरालयेभ्यः क्षेत्रान्तरेभ्यः । समागतान् प्राप्तान् । देवान्, यथोचितं यथार्हं । विविधानां नानाप्रकाराणां प्रसूनानां पुष्पाणां फलादीनां च वितरणेन प्रदानेन सफलमनोरथान् सफलकामान् । कलयन् कुर्वन् । संप्रेषयति ॥ १० ॥

सम्प्रेषितेष्विति । अमीषु देवेषु सम्प्रेषितेषु सत्सु, भगवान् श्रीपद्मनाभः । स्वयं, सौवर्णस्य ध्वजस्य अधस्तले अधोभागे । विलसन् शोभमानः सन् । ध्वजपताकायाः अवरोपणविधानस्य अवरोपणकरणस्य अनन्तरम् । निजालयान्तः निजगृहान्तर्भागे इत्यर्थः । विशति प्रविशति ॥ ११ ॥

आविष्टो निजमन्दिरान्तरनघः श्रीपद्मनाभो हरिः
पक्षीन्द्रादवरुह्य वाहनवरात् प्राप्तो विमानं तदा ।
सायं भानवमण्डलाद्धिमकरस्यामेयशोभायुतं
बिम्बं चाविशतो दधात्यथ दशां स्फीतां परं तेजसः ॥

अथ निजविमानान्तर्भागमाविष्टस्तु भगवान् समस्त-भक्तानिकायेनैवं स्तुतो विराजते ॥ १२ ॥

पुरा खलु निद्राणचतुर्मुखमुखोद्धतश्रुतिनिवहहयग्रीवाख्यासुरनिधनार्थं तटिनीसन्तर्पणपरायणसत्यव्रतभूमीपुरन्दरकराञ्जलिसम्पतितातिसूक्ष्मवैसारिणतनो ! तदनु विस्मितेन

आविष्ट इति । अथ निजमन्दिरान्तः निजगृहान्तर्भागे प्रविष्टः अनघः हरिः श्रीपद्मनाभः यदा, वाहनवरात् वाहनश्रेष्ठभूतात् पक्षीन्द्राद् गरुडात् । अवरुह्यावतीर्य । विमानं प्रासादं । प्राप्तः प्रविष्टो, भवतीति शेषः । तदा, सायं सन्ध्यासमये । भानवमण्डलात् आदित्यमण्डलात् सकाशात् । अमेयया निरवधिकयेत्यर्थः शोभया युतं सहितं । हिमकरस्य चन्द्रस्य । बिम्बं मण्डलम् । आविशतः तेजसः, परमाधिकं । स्फीतां, दशामवस्थां । दधाति च ॥ १४ ॥

अथेति । निजविमानान्तर्भागम्, आविष्टः प्रविष्टः । भगवान् श्रीपद्मनाभः तु । समस्तभक्तानां निकायेन समूहेन । एवं वक्ष्यमाणप्रकारेण । स्तुतः सन् । विराजते शोभते ॥ १२ ॥

स्तुतिप्रकारमेवाह — पुरा खलु पूर्वं हि । निद्राणस्य निद्रां कुर्वाणस्य चतुर्मुखस्य ब्रह्मणः मुखेभ्यः उद्धृतः हृतः श्रुतिनिवहः वेदसमूहो येन तादृशस्य हयग्रीवाख्यस्यासुरस्य निधनार्थं हिंसायै तटिनीसलिलेन यत्सन्तर्पणं देवादितर्पणं तत्र परायण आसक्तः सत्यव्रतः सत्यव्रताख्यश्च यः भूमीपुरन्दरः राजा तस्य कराञ्जलौ सम्पतिता अतिसूक्ष्मा च या वैसारिणतनुः मीनशरीरं यस्य तादृश ! । 'मीनो वैसारिणोऽण्डज' इत्यमरः । तदनु विस्मितेन तेन

तेन क्रमेण कूपवापीतटाकतटिनीमहाब्धिषु विक्षिप्तातिविशा-लशरीर ! स्वनिरीक्षणानन्दितनृवरयाचनया सप्तर्षिसाहिताय भूरूपनौकासमधिरूढाय तस्मै स्वशृङ्गाग्रेण नावमाकृष्य निखिलभुवनभागान् दर्शयन् तदन्ते तमसुरं स्वशृङ्गेणैव निहत्य विरिञ्चये विश्राणितश्रुतिनिवह ! भगवन्नमस्ते ॥ १३ ॥

वज्राधिकस्थिरतरकर्परभागोद्धृतमन्थानीभूतमन्दरधराधरेन्द्र ! वरत्रीभूतवासुकिकलितमथनसंक्षुभ्यत्फेनोर्मिमालासंकुलक्षीराम्भोनिधिसमुद्धृतपीयूषविश्राणनसम्प्रीणितसमस्तसुमनोनिकुरुम्ब ! कूर्मस्वरूप ! भगवन्नमस्ते ॥ १४ ॥

---

सत्यव्रतनृपेण । क्रमेण, कूपे वाप्यां तटाके तटिन्यां महाब्धौ च विक्षिप्तमतिविशालं च शरीरं यस्य तादृश ! । स्वनिरीक्षणेनानन्दितस्य नृवरस्य सत्यव्रतनृपस्य याचनया हेतुना । सप्तर्षिभिः मरीच्यादिभिः सहिताय युक्ताय । भूरूपायां नौकायां तरण्यां नौरूपमाश्रित्यागतायां भूम्यामित्यर्थः, समधिरूढाय । तस्मै सत्यव्रतनृपाय । स्वस्यात्मीयस्य मत्स्यरूपभगवत्सम्बन्धिनः शृङ्गस्याग्रेण । नावं सत्यव्रताधिरूढां तरीम् । आकृष्य निखिलभुवनभागान् दर्शयन्, तदन्ते दर्शनान्ते । तमसुरं हयग्रीवं । स्वशृङ्गेणैव निहत्य, विरिञ्चये ब्रह्मणे । विश्राणितः दत्तः श्रुतिनिवहः वेदसमूहो येन तादृश ! । भगवन् ! श्रीपद्मनाभ ! ते, नमः नमस्कारोऽस्तु ॥ १३ ॥

वज्रेति । वज्रवदधिकमत्यर्थं स्थिरतरेणातीव कठिनेन कर्परभागेण पृष्ठास्थिप्रदेशेन उद्धृतः मन्थानीभूतश्च यः मन्दरधराधरेन्द्रः मन्दराख्यपर्वतः स येन तादृश ! । वरत्रीभूतेन योक्त्रभूतेन वासुकिना कलितं कृतं यन्मथनं तेन हेतुना सम्यगधिकं क्षुभ्यद्भिः फेनैः ऊर्मिमालाभिः वीचिसमूहैः संकुलात् क्षीराम्भोनिधेः क्षीरसमुद्रात् समुद्धृतस्य उत्पन्नस्य पीयूषस्य विश्राणनेन वितरणेन सम्यक्प्रीणितं तर्पितं समस्तानां सुमनसां देवानां निकुरुम्बं समूहो येन तादृश ! । कूर्मस्वरूप ! भगवन् ! ते नमः ॥ १४ ॥

सनकमुखमुनिवरेण्यशापमूलसम्प्राप्तकठिनासुरजन्म-हिरण्याक्षकलितधरणीमज्जनविवशीभूतमनुवाक्यसदयहृदय-कमलासनयाचनाधृतमहितभूदारस्वरूप! निजदंष्ट्राग्रभागविदारितदनुजवक्षःस्थलोद्धृतधरणे! भगवन्नमस्ते ॥ १५ ॥

भक्तसत्तमप्रह्लादावनाय विपुलस्तम्भगर्भादुद्भूय तज्जनकं हिरण्यकशिपुमूरुयुगले निपात्य वक्षः सम्भिद्य तदन्तःस्थितापाटलरुधिरपानप्रमत्त! अट्टहासरावबिभ्यन्निखिलजगदन्तराल! श्रीनरसिंहमूर्ते! भगवन्नमस्ते ॥ १६ ॥

अप्रतिमतमैश्वर्यविभवमदान्धमहाबलिगाढाहङ्कारापनुत्तये तत्सवनशालायां समालम्बितबालवटुस्वरूपः प्रविश्या-

सनकेति। सनकमुखानां मुनिवरेण्यानाम् ऋषिश्रेष्ठानां शापेनैव मूलेन कारणेन सम्प्राप्तं सङ्गतं कठिनं क्रूरमसुरजन्म येन तादृशेन हिरण्याक्षेण कलितेन कृतेन धरणीमज्जनेन हेतुना विवशीभूतस्य परवशस्य मनोः वाक्यैः सदयं हृदयं यस्य तादृशस्य कमलासनस्य ब्रह्मणः याचनया हेतुना धृतं महितं पूजितं भूदारस्वरूपं वराहस्वरूपं येन तादृश! । निजेन पादाग्रभागेन विदारितं दनुजस्य हिरण्याक्षस्य कर्णमूलं येन तादृश!* । उद्धृता धरणिः भूमिः येन तादृश! । भगवन् ते नमः ॥ १५ ॥

भक्तसत्तमेति । भक्तेषु सत्तमस्यातीव श्रेष्ठस्य प्रह्लादस्य अवनाय पालनाय । विपुलस्य महतः स्तम्भस्य गर्भात् अन्तर्भागात् उद्भूय । तस्य प्रह्लादस्य जनकं । हिरण्यकशिपुम् ऊरुयुगले निपात्य वक्षः, सम्भिद्य विदार्य । तदन्तःस्थितस्य वक्षसोऽन्तर्भागस्थितस्य आपाटलस्यातीव रक्तवर्णस्य रुधिरस्य शोणितस्य पानेन प्रमत्त! । अट्टहासरावेण बिभ्यत् भीतियुक्तं निखिलजगदन्तरालं यस्य तादृश! । श्रीनरसिंहमूर्ते! श्रीनृसिंहाकार! । भगवन् ते नमः ॥

अप्रतिमेति । अप्रतिमतमेन निरुपमेन ऐश्वर्येण धनेन विभवेन विभुतया च यो मदः गर्वः तेनान्धस्य महाबलेः यो गाढाहङ्कारः अधिकाहंकृतिः तस्यापनुत्तये अपनोदनाय । समालम्बितं स्वीकृतं बालवटुस्वरूपं येन तादृशः सन् । तस्य महाबलेः सवनशालायां यागशालायां । प्रविश्य, अर्थितस्य याचि-

* एतदनुसरणे तु 'पादाग्रभागविदारितदनुजकर्णमूले' ति मूलं पाठ्यम् ।

र्थितपादत्रयमेयप्रदेशवितरणापटुतया विध्वंसिततदीयाटोप! वामनमूर्ते! भगवन्नमस्ते ॥ १७ ॥

पार्वतीवल्लभसकाशाधीतशस्त्राभ्यास! अतिशितकुठारधारानिकृत्तरिपुमण्डल! भार्गवराम! भगवन्नमस्ते ॥ १८ ॥

अतिविवशसुरमुनिपरिषदभ्यर्थनया सनाथीकृतभुवनपवित्रदिवाकरान्वय! तपोधनवतंसकुशिकनन्दनसत्रावनविध्वंसितखलमारीचसुबाहुमुखनिशाचरपुङ्गव! चरणाम्बुजपरागसुभगीकृतचिरतरपाषाणीभूतगौतमदार! महेश्वरकार्मुकविभेदनसम्प्राप्तजनकजात! स्वायोध्यापुरप्रवेशसमयसरोषसमा-

---

तस्य पादत्रयेण मेयस्य मातुं शक्यस्य प्रदेशस्य वितरणे दाने अपटुतया अशक्ततया । विध्वंसितः विनाशितः तदीयाटोपः महाबलिसम्बन्धिगर्वः येन तादृश! । वामनमूर्ते! भगवन् ते नमः ॥ १७ ॥

पार्वतीवल्लभेति । पार्वतीवल्लभस्य श्रीपरमेश्वरस्य सकाशात् अधीतः गृहीतः शस्त्राभ्यासः शस्त्रप्रयोगः येन तादृश! । अतिशितया अतीव तीक्ष्णया कुठारधारया निकृत्तं विनाशितं रिपुमण्डलं शत्रुसमूहो येन तादृश! । भार्गवराम! परशुराम! । भगवन्! ते नमः ॥ १८ ॥

अतिविवशेति । अतिविवशानां रावणोपद्रवादतीव खिन्नानामिति भावः, सुराणां देवानां मुनीनां च परिषदः सभायाः तत्समूहस्येति यावत्, अभ्यर्थनया याचनया सनाथीकृतः आत्मना नाथवत्कृतः भुवनपवित्रश्च यो दिवाकरान्वयः सूर्यवंशः स येन तादृश! सूर्यवंशे कृतावतार इति यावत् । तपोधनवतंसस्य ऋषिश्रेष्ठस्य कुशिकनन्दनस्य विश्वामित्रस्य सत्रावनाय यागरक्षणाय विध्वंसिताः हताः खला मारीचसुबाहुमुखाश्च ये निशाचरपुङ्गवाः राक्षसश्रेष्ठाः ते येन तादृश! । चरणाम्बुजयोः परागेण रेणुना सुभगीकृताः सुन्दरीकृताः चिरतरं चिरकालादारभ्य पाषाणीभूताः शिलीभूताश्च ये गौतमदाराः गौतमभार्या अहल्या येन तादृश! । 'अथ पुम्भूम्नि दाराः' इत्यमरः । महेश्वरकार्मुकस्य परमेश्वरधनुषः विभेदनेन भञ्जनेन सम्प्राप्ता लब्धा जनकजाता सीता येन तादृश! । स्वस्यात्मनः अयोध्यापुरप्रवेशसमये सरोषं यथा तथा समाग-

गतसमस्तराजन्यकुलविमतजामदग्न्याटोपतूलीकरणचणप्र -
ताप! दशरथवाक्यपरित्यक्तराष्ट्र! अनुजदारसहित! सङ्गतदण्ड-
कारण्यसमागतचण्डविराधमुखखण्डन! पञ्चवटीसमागतशूर्प-
णखाकर्णनासाच्छेदनाकर्णनसरोषागतखरदूषणत्रिशिरोमुख-
चतुर्दशसाहस्रयातुधाननिर्मूलन! कनकमृगरूपधरखलमारी-
चमर्दन! कुहनामस्करिरूपधरदशकण्ठहृतदयित! कलित-
सुग्रीवसख्य! सप्तसालच्छेदन! वालिनिधन! दयितान्वेषण-
सम्प्रेषितबहुवानरमुख्यसमीरणसुतानीतचूडामणिदर्शनहृष्ट!
कलितसेतुबन्धन! सम्प्रविष्टलङ्कानगर! निशिचरसमूहस-
हितरावणनिधन! दयितासहितागतनिजनगर! कलितपट्टा-
भिषेक! श्रीरामचन्द्र! भगवन्नमस्ते ॥ १९ ॥

---

गतस्य सम्प्राप्तस्य समस्तराजन्यकुलस्य सकलक्षत्रियसमूहस्य विमतस्य शत्रोः जामदग्न्यस्य परशुरामस्य य आटोपः गर्वस्तस्य तूलीकरणे समर्थः प्रतापः पौरुषं यस्य तादृश!। दशरथस्य वाक्येन परित्यक्तं राष्ट्रं राज्यं येन तादृश!। अनुजेन लक्ष्मणेन दारैः सीतया च सहित!। सङ्गते प्राप्ते दण्डकारण्ये समागतानां चण्डानामत्यन्तकोपनानां विराधमुखानां विराधप्रभृतीनां खण्डन! नाशकर!। पञ्चवट्यां समागतायाः शूर्पणखायाः कर्णनासाच्छेदनस्य आकर्णनेन सरोषं यथा तथा आगतानां खरदूषणत्रिशिरोमुखानां चतुर्दशसाहस्रयातुधानानां निर्मूलन! विनाशकर!। कनकमृगरूपधरः खलश्च यः मारीचः तस्य मर्दन! विनाशकर!। कुहनामस्करिरूपधरेण कपटभिक्षुस्वरूपधारिणा दशकण्ठेन रावणेन हृता दयिता यस्य तादृश!। कलितसुग्रीवसख्य! कृतसुग्रीवसख्य!। सप्तसालच्छेदन!। वालिनो निधनं यस्मात् तादृश!। दयितान्वेषणार्थं सम्प्रेषितेषु बहुषु वानरेषु मुख्येन समीरणसुतेन हनूमता आनीतस्य चूडामणेर्दर्शनेन हृष्ट!। कलितसेतुबन्धन! कृतसेतुबन्धन!। सम्प्रविष्टलङ्कानगर! प्राप्तलङ्कानगर!। निशिचरसमूहेन सहितस्य रावणस्य निधनं यस्मात् तादृश!। दयितया सहितः सन् आगतं निजनगरमयोध्या येन तादृश!। कलितपट्टाभिषेक! कृतपट्टाभिषेक!। श्रीरामचन्द्र! भगवन्! ते नमः ॥ १९ ॥

अत्युग्रधारसीराग्रभागसमाकृष्टहस्तिनपुर! प्रलम्बमुखनिर्मूलन! बलराम! भगवन्नमस्ते ॥ २० ॥

सुविमलयदुवंशसलिलनिधिसुधाकर! निजजनकवसुदेवनीतयशोदापरिसर! दारुणपूतनामारणविख्यातपौरुष! वाचंयमवरेण्यगर्गाकलितजगदघहरणचणश्रवणानन्दकरश्रीकृष्णनामविलसित! घोषयोषिदालयरचितनवनीतचौर्य! निजजनन्यै वदनान्तःसंदर्शिताखिलभुवनभाग! अघासुरविमर्दन! विरिञ्चमदभञ्जन! कुटिलतरकालियाहिफणरङ्गकलिततताण्डव! सुन्दरतरकलिन्दनन्दिनीतटाहृतवल्लवसुन्दरीवसन! गोवर्धनोद्धरणपोषितव्रजप्रदेश! निजलावण्याकलनस्मरातु-

---

अत्युग्रेति । अत्युग्रा अतितीक्ष्णा धारा यस्य तादृशस्य सीरस्य हलस्य अग्रभागेन समाकृष्टं हस्तिनपुरं येन तादृश! । प्रलम्बमुखानां प्रलम्बासुरप्रभृतीनां निर्मूलन! विनाशकर! । बलराम! बलभद्रराम! । भगवन्! ते नमः ॥ २० ॥

सुविमलेति । सुविमलः अतीव निर्मलः यदुवंश एव यः सलिलनिधिः समुद्रस्तस्य सुधाकर! चन्द्र! तद्वृद्धिकरेति भावः । निजजनकेन वसुदेवेन नीतयशोदापरिसर! प्रापितयशोदापर्यन्तभाग! । दारुणायाः पूतनायाः मारणेन निधनेन विख्यातपौरुष! विश्रुतप्रताप! । वाचंयमवरेण्येन मुनिश्रेष्ठेन गर्गेणाकलितं कृतं जगदघहरणे समर्थं श्रवणयोः आनन्दकरं च यत् श्रीकृष्णनाम तेन विलसित! शोभित! । घोषयोषितां व्रजाङ्गनानाम् आलये गृहे रचितं कृतं नवनीतचौर्यं हैयङ्गवीनमोषणं येन तादृश! । निजजनन्यै यशोदायै । वदनान्तः सम्यग्दर्शितः अखिलभुवनभागः येन तादृश! । अघासुरविमर्दन अघासुरनाशकर! । विरिञ्चमदभञ्जन ब्रह्मगर्वनाशन! । कुटिलतरः यः कालियाहिः कालियसर्पः तस्य फण एव रङ्गे कलितं कृतं ताण्डवं नृत्तं येन तादृश! । सुन्दरतरात् कलिन्दनन्दिनीतटात् कालिन्दीतीराद् आ-

राभीरमत्तकाशिनीवृन्दकलितसरसरासकेलीविलाससुखित ! वृषकेशिमुखदनुजविध्वंसनकुपितकंससम्प्रेषितभक्तसत्तमाक्रूरानुयातमथुरानगर ! चाणूरादिमल्लवरनिधनक्रुद्धतरकंसविनाशन ! सान्दीपनिमुनिसकाशाधीतसकलागमसार ! राज्याभिषिक्तोग्रसेन ! रुक्मिण्याद्यष्टमहिषीसहितषोडशसहस्रवामेक्षणासंयुत ! बन्धुवधखिन्नधनञ्जयोपदिष्टपरविद्यातत्त्व ! कुचेलमुनिदारिद्र्यविमोचन ! श्रीकृष्णमूर्ते ! भगवन्नमस्ते ॥ २१ ॥

अधर्मप्रचुरकलिसमयान्तनिबिडीभविष्यन्म्लेच्छकुलनिर्मूलनाय नष्टधर्मपरिपालनाय च भाविकल्किस्वरूप ! पद्मनाभ ! परमपूरुष ! भगवन्नमस्ते ॥ २२ ॥

हृतानि वल्लवसुन्दरीवसनानि गोपस्त्रीवस्त्राणि येन तादृश ! । गोवर्धनोद्धरणेन पोषितः व्रजप्रदेशः येन तादृश ! । निजस्य लावण्यस्य सौन्दर्यस्य आकलनेन दर्शनेन स्मरातुराणां कामपरवशानाम् आभीरमत्तकाशिनीनां गोपस्त्रीणां वृन्देन समूहेन सह कलितेन कृतेन सरसेन रससहितेन च रासकेलीविलासेन रासक्रीडानामकविलासेन सुखित ! । वृषकेशिमुखानां दनुजानां विध्वंसनेन हेतुना कुपितेन क्रुद्धेन कंसेन सम्प्रेषितः भक्तसत्तमश्च यः अक्रूरः तेन सहानुयातम् अनुप्राप्तं मथुरानगरं येन तादृश ! । चाणूरादीनां मल्लवराणां निधनेन क्रुद्धतरस्य अतीव क्रुद्धस्य कंसस्य विनाशन ! । सान्दीपनिमुनेः सकाशादधीतः सकलागमसारः येन तादृश ! । राज्ये अभिषिक्त उग्रसेनः येन तादृश ! । रुक्मिण्यादिभिः अष्टसंख्याकाभिः महिषीभिः सहिताः याः षोडशसहस्रवामेक्षणाः ताभिः संयुत ! । बन्धुवधखिन्नाय बन्धुवधं विचार्य खिन्नाय धनञ्जयाय उपदिष्टं परविद्यातत्त्वम् आत्मतत्त्वं येन तादृश ! । कुचेलमुनेः दारिद्र्यस्य विमोचन ! श्रीकृष्णमूर्ते ! भगवन् ! ते नमः ॥ २१ ॥

अधर्मेति । अधर्मेण प्रचुरे कलिसमयान्ते निबिडीभविष्यतां वर्धिष्यमाणानां म्लेच्छानां कुलस्य समूहस्य निर्मूलनाय विनाशनाय । नष्टस्य

एवं नुतस्तु भगवानरविन्दनाभो
भक्तैर्द्विजातिभिरसीमतमप्रमोदैः ।
लक्ष्मीमहीनयनपङ्कजवासरेशो
ह्यक्षीणदिव्यमहिमा विलसत्यनन्तः ॥ १५ ॥

इति स्यानन्दूरपुरवर्णनप्रबन्धे तीर्थाभिषेको नाम
नवमः स्तबकः ।

---

धर्मस्य परिपालनाय च । भाविकल्किस्वरूप ! पद्मनाभ ! परमपूरुष ! ते नमः ॥ २२ ॥

एवमिति । लक्ष्म्याः मह्या भूमेश्च नयनानामेव पङ्कजानां वासरेशः सूर्यः, तयोर्नयनानन्दकर इति यावत् । अक्षीणः अनल्पः दिव्यश्च महिमा यस्य तादृशः । अनन्तः अन्तरहितः । भगवानरविन्दनाभः श्रीपद्मनाभः तु । असीमतमः निरवधिकः प्रमोदो हर्षो येषां तादृशैः । भक्तैः, द्विजातिभिः ब्राह्मणैः । एवमुक्तप्रकारेण । नुतः स्तुतः सन् । विलसति शोभते ॥ १५ ॥

इति स्यानन्दूरपुरवर्णनप्रबन्धव्याख्यायां
नवमः स्तबकः ।

## अथ दशमः स्तबकः ।

अथास्यैव भगवतः सरसिजनाभस्य मन्दिरे प्रतिषष्ठाब्दं तन्तन्यमानः समस्तजगदानन्दकरः षट्पञ्चाशद्दिवसपरिमितो लक्षदीपाख्यो महोत्सवो विराजते ॥ १ ॥

यस्मिन्नथोत्सववरे शमदमतपस्तितिक्षाध्ययनसम्पन्नाः स्ववर्चसा हुताशनकल्पाः चिरप्राप्ताग्निहोत्रा बहवो महीसुरतिलकाः सोपाध्यायाः समलङ्कुर्वन्त्येतत् स्यानन्दूरपुरम् ॥ २ ॥

आयाता धरणीसुराः पुनरमी स्नाताः प्रभातेऽखिला
राजन्तः खलु मन्दिरे भगवतो लक्ष्मीपतेरञ्जसा ।

---

अथ लक्षदीपोत्सवं वर्णयति — अथेति । अथ भगवतः अस्य, सरसिजनाभस्य श्रीपद्मनाभस्य । मन्दिरे, प्रतिषष्ठाब्दं षष्ठवत्सरं प्रति । तन्तन्यमानः अतिशयेन क्रियमाणः । समस्तानां जगतामानन्दकरः । षट्पञ्चाशत्संख्याकैः दिवसैः परिमितः । लक्षदीपाख्यः महोत्सवः, विराजते शोभते ॥ १ ॥

यस्मिन्निति । अथ यस्मिन्, उत्सववरे उत्सवश्रेष्ठे । शमेन अन्तरिन्द्रियनिग्रहेण दमेन बहिरिन्द्रियनिग्रहेण तपसा स्वधर्मानुष्ठानेन तितिक्षया क्षान्त्या अध्ययनेन वेदेन च सम्पन्ना एतदभिन्नसम्पद्वन्त इत्यर्थः । स्ववर्चसा स्वतेजसा । हुताशनकल्पाः अग्नितुल्याः । चिरप्राप्तं चिरकालादारभ्य कृतम् अग्निहोत्रं यैस्तादृशाः । बहवः, महीसुरतिलकाः ब्राह्मणश्रेष्ठाः । सोपाध्यायाः अध्यापकसहिताः सन्तः । एतत् स्यानन्दूरपुरं । सम्यगलङ्कुर्वन्ति स्यानन्दूरपुरे आगच्छन्तीति भावः ॥ २ ॥

आयाता इति । आयाता आगताः । अखिला अमी, धरणीसुराः ब्राह्मणाः । प्रभाते स्नाताः पुनः, अञ्जसा वेगेन । लक्ष्मीपतेः, भगवतः श्रीपद्मनाभस्य । मन्दिरे क्षेत्रे । राजन्तः शोभमानाः सन्तः खलु । अम्बुराशिनिनदेन समुद्रशब्देन सह प्रस्पर्धी प्रकर्षेण मत्सरवान् तत्सदृश इत्यर्थः संरावः

विश्वस्येह जनस्य वै श्रुतिपथं कुर्वन्ति मोदान्वितं
श्रुत्यैव स्फुटमम्बुराशिनिनदप्रस्पर्धिसंरावया ॥ १ ॥

तदन्ते भूदेवाः कुतुकभरसम्पूर्णमनसो
ह्यमी पद्माभर्तुश्चरणयुगसेवाप्रमुदिताः ।
यता भोक्तुं सर्वे जरठवरबालैश्च सहिता
लसन्ति प्रेमोद्यत्सरसवचनास्तावदधिकम् ॥ २ ॥

अथामी महीसुरपरिवृढाः परमानन्दसान्द्रमनसो यदा खलु निरुपमशोभासान्द्रं श्रीबलिमण्डपं प्राप्नुवन्ति, तदा चतुरतरविविधपाचकजनैरेकाग्रचित्तैर्निर्मितानि बहुविधामृतकल्पतेमनसहितानि जेमनानि च सुमहत्सु भाजनवरेषु निक्षिप्तानि तत्र तत्र सन्निहितानि विराजन्ते ॥ ३ ॥

---

शब्दो यस्याः तादृश्या । श्रुत्या वेदेनैव । इह, विश्वस्य सर्वस्य । जनस्य, श्रुतिपथं श्रोत्रमार्गं । 'वेदे श्रवसि च श्रुति'रित्यमरः । स्फुटं, मोदान्वितं सन्तोषविशिष्टं । कुर्वन्ति ॥ १ ॥

तदन्ते इति । कुतुकभरेण कौतुकातिशयेन सम्पूर्णं मनो येषां तादृशाः । पद्माभर्तुः श्रीपद्मनाभस्य । चरणयुगस्य सेवया प्रमुदिताः सन्तुष्टाः । जरठवरैः अतीव वृद्धैः बालैश्च । सहिता युक्ताः । सर्वे अमी, भूदेवाः ब्राह्मणा हि । तदन्ते श्रुतिपठनान्ते । तावद् भोक्तुं, यता उद्यताः । अधिकं, प्रेम्णा स्नेहेन उद्यन्ति उद्गच्छन्ति सरसानि च वचनानि येभ्यः तादृशाः सन्तः । लसन्ति शोभन्ते ॥ २ ॥

अथेति । अथ अमी, महीसुरपरिवृढाः ब्राह्मणश्रेष्ठाः । परमानन्देन सान्द्रं मनो येषां तादृशाः सन्तः । यदा खलु यस्मिन् काले हि । निरुपमया शोभया सान्द्रं निबिडितं । श्रीबलिमण्डपं प्राप्नुवन्ति, तदा, एकाग्रचित्तैः नियुक्तस्वस्वकर्मकरणतत्परैः । चतुरतरैरतीव समर्थैः विविधैश्च पाचकजनैः । निर्मितानि, सुमहत्सु अतीव विशालेषु । भाजनवरेषु पात्रश्रेष्ठेषु । निक्षिप्तानि

आस्थितेषु धरणीसुरेषु खलु तत्र तत्र च यथोचितं
नीलनीलकदलीदलेष्वपि च विस्तृतेष्वपि च तत्पुरः ।
पाण्डराभपरमौदनं तदनु तत्र चाशु विततं दशां
सन्दधात्यमृतदीधितेर्जलदबृन्दमध्यलसतः पराम् ॥ ३ ॥

तथाच निस्तुलामोदावहप्राज्यतराज्यसुवर्णसवर्णसूपघनदध्युपदंशपर्पटरम्भाफलसितापायसमुखैरनेकखाद्यपेयचूष्यलेह्यैः सुतृप्ताशयास्ते महीसुरवरास्त्वलमलमिति वदन्तोऽपि तदनाकर्ण्यैव पुनरपि परिवेषकजनैर्नीतान् पीयूषसदृक्षान् बहून् पदार्थानालक्ष्य परमानन्दसान्द्रतां दधते ॥ ४ ॥

---

निहितानि । बहुविधानि अमृतकल्पानि अमृततुल्यानि तेमनसहितानि उपदंशसमेतानि । जेमनान्यन्नानि च तत्रतत्र प्रदेशे । सन्निहितानि सम्यक् निक्षिप्तानि । विराजन्ते शोभन्ते ॥ ३ ॥

**आस्थितेष्विति** । अपिच धरणीसुरेषु, यथोचितं यथायोग्यं । तत्र तत्र च प्रदेशे । आस्थितेषु आ समन्तात् स्थितेषु सत्सु । तत्पुरः तेषां पुरोभागे किल । नीलनीलेष्वतीव नीलवर्णेषु कदलीदलेषु रम्भापत्रेषु । विस्तृतेषु विततेषु सत्सु । तदनु, तत्र च कदलीदलेषु च । आशु, विततं परिवेषितमित्यर्थः । पाण्डराभं धवलवर्णं च परमौदनमुत्कृष्टान्नं । जलदवृन्दस्य मेघसमूहस्य मध्ये लसतः शोभमानस्य । अमृतदीधितेश्चन्द्रस्य । परामुत्कृष्टां । दशामवस्थां । सन्दधाति वहति, तत्सदृशं भवतीत्यर्थः ॥ ३ ॥

**तथाचेति** । तथाच निस्तुलामोदावहम् अनुपमसन्तोषसम्पादकं प्राज्यतरमतीव प्रचुरं, 'प्रभूतं प्रचुरं प्राज्यमि'त्यमरः, आज्यं घृतं सुवर्णसवर्णः सूपः घनं सान्द्रं दधि उपदंशाः पर्पटः रम्भाफलं कदलीफलं सिता शर्करा पायसं च एतन्मुखैः । अनेकैः बहुभिः खाद्यैः खादितुं योग्यैः पेयैः पातुं योग्यैः चूष्यैः चूषितुं योग्यैः लेह्यैः लेढुं योग्यैश्च पदार्थैः । सुतृप्ताशयाः सन्तृप्तचित्ताः । ते महीसुरवराः ब्राह्मणश्रेष्ठाः तु । अलमलमिति वदन्तः अपि, तत् अलमलमिति वादम् । अनाकर्ण्याश्रुत्वेव । पुनरपि, परिवेषकजनैः परिवेषण-

एवमेते भूसुरतल्लजा भुक्ताः सुखिताः परमसुगन्धिमलयजालिप्ततनवो निजनिजालयेषु सरसकेलिसल्लाँपनिरता विलसन्ति ॥ ५ ॥

अपराह्णे तु पुनरप्यमी द्विजातिकुलावतंसाः कमलनाभस्य भगवतो मन्दिरस्थितश्रीबलिमण्डपमध्यासीनाः सहस्रनामपारायणपरायणा भवन्ति ॥ ६ ॥

एवमनन्तधरणीसुरकलितमनन्तस्य कीर्तनमिदं श्रवणपुटेन सकृदास्वादयितुमप्यल्पपुण्याः कथं पर्याप्ता भवन्ति ॥७॥

---

कारिजनैः । नीतान्, पीयूषसदृक्षान् अमृतसदृशान् । बहून् पदार्थान्, आलक्ष्य दृष्ट्वा । परमानन्देन सान्द्रतां निबिडतां । दधते परमानन्दसान्द्रा भवन्तीति भावः ॥ ४ ॥

**एवमिति** । एवमेते, भूसुरतल्लजाः ब्राह्मणश्रेष्ठाः । भुक्ताः सुखिताः सुखं प्राप्ताः । परमसुगन्धिना उत्कृष्टसौरभ्यवता मलयजेन चन्दनेन आलिप्ता रूषिताः तनवः शरीराणि येषां तादृशाः । निजनिजालयेषु, सरसः यः केलिसल्लाँपः लीलया मिथोभाषणं तस्मिन् निरता आसक्ताश्च सन्तः । विलसन्ति शोभन्ते ॥ ५ ॥

**अपराह्णे त्विति** । अपराह्णे तु पुनरप्यमी, द्विजातिकुलावतंसाः ब्राह्मणश्रेष्ठाः । कमलनाभस्य, भगवतः श्रीपद्मनाभस्य । मन्दिरस्थितं श्रीबलिमण्डपमध्यासीनाः बलिमण्डपे आसीना इत्यर्थः । सहस्रनाम्नां विष्णुनामसहस्रकस्य पारायणे पठने परायणाः आसक्ताः । भवन्ति ॥ ६ ॥

**एवमिति** । एवम् अनन्तैः धरणीसुरैः ब्राह्मणैः कलितं कृतम् । इदम् अनन्तस्य श्रीपद्मनाभस्य । कीर्तनं नामसहस्रकीर्तनं । श्रवणपुटेन सकृद् एकवारम् । आस्वादयितुं श्रोतुमित्यर्थः । अपि । अल्पपुण्याः कथं, पर्याप्ताः समर्थाः । भवन्ति, न कथमपीत्यर्थः । अधिकपुण्यवतामेवैतच्छ्रवणं सम्भवतीति भावः ॥ ७ ॥

सायं तथाखिलमलापहपद्मतीर्थे
विप्रास्त्वमी जलजपं रचयन्ति सर्वे ।
भक्तिप्रकर्षमुकुलीकृतलोचनाश्चा-
प्येकाग्रभूतमनसो विजितेन्द्रियाश्च ॥ ४ ॥

अथास्य तु जलजपस्यान्ते पुनरप्येते द्विजातयो निखिलजगदीश्वरस्य भगवतो मन्दिरे सुधाकल्पानोदनादिविविधपदार्थानास्वादितुं सकुतुका माधवसमयसमलङ्कृतमुद्यानं द्विजा इव च पलायमानाः प्राप्नुवन्ति ॥ ८ ॥

एवं षट्पञ्चाशद्दिनपरिमितोऽयं लक्षदीपोत्सवः प्रतिदिनमेधते ॥ ९ ॥

तत्र च मध्ये मध्ये भगवानम्भोजनाभस्त्वदृष्टातीतम-

---

**सायमिति** । विजितेन्द्रियाः सर्वे अमी विप्राः तु तथा, सायं सन्ध्यासमये । भक्तिप्रकर्षेण मुकुलीकृतानि लोचनानि येषां तादृशाः । एकाग्रभूतमनसः एकाग्रचित्ताश्चापि सन्तः । अखिलमलापहे सर्वपापनिवारके । पद्मतीर्थे, जलजपं जले स्थित्वा मन्त्रजपं । रचयन्ति कुर्वन्ति ॥ ४ ॥

**अथेति** । अथास्य जलजपस्य, अन्ते अवसाने । एते द्विजातयः ब्राह्मणाः । पुनरपि निखिलजगदीश्वरस्य, भगवतः श्रीपद्मनाभस्य । मन्दिरे, सुधाकल्पान् अमृततुल्यान् । ओदनादीन् अन्नप्रभृतीन् विविधांश्च पदार्थान् आस्वादितुं भक्षितुं सकुतुकाः । माधवसमयेन वसन्तकालेन सम्यगलङ्कृतमुद्यानं द्विजाः पक्षिण इव च पलायमाना धावन्तः सन्तः प्राप्नुवन्ति समागच्छन्ति ॥ ८ ॥

**एवमिति** । षट्पञ्चाशद्दिनैः परिमितः अयं लक्षदीपोत्सवः एवं प्रतिदिनम् एधते वर्धते ॥ ९ ॥

**तत्र चेति** । भगवानम्भोजनाभः श्रीपद्मनाभस्तु । अदृष्टाः अतीताः महोत्सवा यैस्तादृशानाम् । एतेषां धरणीसुरवरेण्यानां ब्राह्मणश्रेष्ठानां । हृदयान्याह्लादयितुम् आनन्दयितुं । तत्र च लक्षदीपोत्सवे च । मध्ये मध्ये प्रत्यहम-

होत्सवानामेतेषां धरणीसुरवरेण्यानां हृदयान्याह्लादयितुं विविधवाहनवरेषु विलसति ॥ १० ॥

अथ तदानीं कुवलयस्थितसमस्तसुजनसमूहकुवलयसुधामयूखायितं भगवन्तं सरसीरुहनाभमवलोक्यामी भूदेवावतंसाः स्वकीयदेशेष्वेव चिरेणाकर्णितभगवद्विभवत्वान्नेत्रकर्णयोश्चिरोपार्जितं कलहं परिहरन्ति ॥ ११ ॥

एवमस्योत्सवस्य प्रतिदिनशोभावत्सु बहुषु वासरेषु व्यतीतेषु प्रतिषष्ठमासं या वा भद्रदीपपूजेति विश्रुता श्रीपद्मनाभालयदक्षिणपार्श्वविलसितभद्रदीपमण्डपे क्रियमाणा भगवतः साक्षात्परमात्मनो वासुदेवस्य सपर्या सैवास्मिन्नुत्सवे लक्षदीपोत्सवत्वेन परिणमति ॥ १२ ॥

---

दिनमित्यर्थः । विविधेषु वाहनवरेषु वाहनश्रेष्ठेषु । विलसति शोभते । विविधवाहनान्यारुह्य घोषयात्रां तनोतीति भावः ॥ १० ॥

**अथेति** । अथ तदानीं घोषयात्राकाले । कुवलये भूवलये स्थितानां समस्तानां सुजनानां सज्जनानां समूहस्यैव कुवलयस्य कुसुमस्य सुधामयूखायितं चन्द्रायितं, सुजनसमूहाह्लादकरमिति यावत् । भगवन्तं सरसीरुहनाभं श्रीपद्मनाभम् । अवलोक्यामी, भूदेवावतंसाः ब्राह्मणश्रेष्ठाः । स्वकीयदेशेषु एव चिरेण, आकर्णितः श्रुतः भगवतः श्रीपद्मनाभस्य विभवः येन तादृशत्वाद्धेतोः श्रवणस्येति शेषः । चिरकालादारभ्योपार्जितं तं कलहं स्पर्धां । परिहरन्ति विनाशयन्तीत्यर्थः । चिरकालादारभ्य भगवद्विभवानुभवसुखसम्पादनेन सन्तोषं कुर्वन्तीत्यर्थः । पूर्वं श्रुतं भगवद्विभवं साक्षात् पश्यन्तीति भावः ॥ ११ ॥

**एवमिति** । अस्योत्सवस्य लक्षदीपोत्सवस्य । प्रतिदिनं शोभावत्सु बहुषु, वासरेषु दिवसेषु । व्यतीतेषु अतिक्रान्तेषु सत्सु । भद्रदीपपूजेति, विश्रुता प्रसिद्धा । भगवतः साक्षात्परमात्मनः वासुदेवस्य या वा, सपर्या पूजा । श्रीपद्मनाभालयस्य दक्षिणपार्श्वे विलसिते शोभिते भद्रदीपमण्डपे

यस्यामिह वरिवस्यायां पूर्वमुक्तास्तपोधनकल्पा द्विजातिकुलोत्तंसा एव परममङ्गलं होमादिकर्म समारभन्ते॥ १३ ॥

अथामीभिर्द्विजपरिवृढैर्हवनादिकर्मणि समारब्धे विविधमन्त्रतन्त्रसाहितहविःप्रदानप्रसन्नाशये समेधमाने हिरण्यरेतासि क्वचिद्रुचिरतरदीपावाहिते भगवति त्विषामीशे सम्पूज्यमाने क्वचिद्रामायणभारतभागवतादिपुराणपारायणप्रवणेषु धरणीसुरोत्तंसेषु क्वचिदन्यमहीसुरेषु निगमपारायणपरेषु तत्र भद्रदीपमण्डपान्तर्गतानां पापीयसामपि मतिर्धर्मपरायणा भवत्येव ॥ १४ ॥

किञ्चास्याः पूजाया निरीक्षणेनानन्दिता देवाश्च मनुजत्वं कामयन्ते ॥ १५ ॥

---

भद्रदीपपूजार्थं निर्मितमण्डपविशेषे । प्रतिषष्ठमासं प्रत्ययनं । क्रियमाणा भवतीति शेषः । सा सपर्यैवास्मिन् उत्सवे लक्षदीपोत्सवत्वेन परिणमति लक्षदीपोत्सवो भवतीत्यर्थः ॥ १२ ॥

यस्यामिति । पूर्वमुक्ताः तपोधनकल्पाः ऋषितुल्याः । द्विजातिकुलोत्तंसाः ब्राह्मणश्रेष्ठा एव । इह यस्यां, वरिवस्यायां पूजायां । परममङ्गलम् अतीव मङ्गलतरं । होमादिकर्म सम्यगारभन्ते ॥ १३ ॥

अथेति । अथ अमीभिः, द्विजपरिवृढैः ब्राह्मणश्रेष्ठैः । हवनादिकर्मणि होमादिकर्मणि । समारब्धे सति, हिरण्यरेतासि अग्नौ । विविधैः मन्त्रैः तन्त्रैश्च सहितं यथा तथा यद् हविःप्रदानं तेन प्रसन्नाशये सन्तुष्टचित्ते । समेधमाने सम्यग्वर्धमाने सति । क्वचित्, त्विषामीशे भगवति सूर्ये । रुचिरतरे दीपे आवाहिते सम्पूज्यमाने सति, क्वचिद्, धरणीसुरोत्तंसेषु ब्राह्मणश्रेष्ठेषु । रामायणभारतभागवतादीनां पुराणानां पारायणे पठने प्रवणेषु आसक्तेषु सत्सु । तत्र, भद्रदीपमण्डपस्य अन्तर्गतानामन्तःस्थितानां । पापीयसां पापिष्ठानामपि । मतिः, धर्मपरायणा धर्मेषु आसक्ता । भवति एव ॥ १४ ॥

किञ्चेति । किञ्चास्याः पूजायाः भद्रदीपपूजायाः । निरीक्षणेन आन-

तस्मिन् दिने निशि समस्तजगत्यधीशः
पद्मापतिः पतगराजगलाधिरूढः ।
लोकं चतुर्दशजगन्निलयान्तरस्थं
संमोदयन्नथ समं विलसत्यतीव ॥ ५ ॥

अथ तदानीमस्य भगवतः पङ्कजनाभस्यालये समागच्छतां जनानां संख्याकथने भगवानादिशेषोऽप्यपर्याप्तो भवति ॥ १६ ॥

किञ्चास्य भगवन्मन्दिरस्य द्वारचतुष्टयमार्गेण प्रभातादारभ्यानिशीथं निरर्गलं प्रविशन्ती बालवृद्धतरुणतरुणीनिबिडजनता त्वसंख्येयैव ॥ १७ ॥

---

न्दिताः देवाश्च मनुजत्वं मनुष्यत्वं कामयन्ते । मनुष्याणामेव एतत्क्रियायामृत्विक्त्वादिसम्भवादिति भावः ॥ १५ ॥

तस्मिन्निति । अथ, समस्तजगत्यधीशः सकलभुवननाथः । पद्मापतिः श्रीपद्मनाभः । तस्मिन् दिने, निशि रात्रौ । पतगराजस्य गरुडस्य गले अधिरूढः सन् । चतुर्दशजगद्रूपस्य निलयस्यान्तरे अवकाशे तिष्ठतीति तथा तादृशम् । लोकं जनं । समं युगपत् । सम्मोदयन् हर्षयन् सन् । अतीव, विलसति शोभते ॥ ५ ॥

अथेति । अथ तदानीं भगवतः अस्य, पङ्कजनाभस्य श्रीपद्मनाभस्य । आलये, समागच्छतां सम्प्राप्नुवतां । जनानां, संख्याकथने भगवान् आदिशेषः अनन्तः अपि । अपर्याप्तः असमर्थ एव । भवति ॥ १६ ॥

किञ्चेति । किञ्चास्य भगवन्मन्दिरस्य । द्वारचतुष्टयमार्गेण गोपुरचतुष्टयद्वारा । प्रभातादारभ्य, आनिशीथम् अर्धरात्रपर्यन्तं । निरर्गलं निष्प्रतिबन्धं यथा तथा । प्रविशन्ती, बालैः वृद्धैस्तरुणैः युवभिस्तरुणीभिश्च निबिडा सान्द्रा जनता जनसमूहस्तु । असंख्येया संख्यातुमशक्यैव ॥ १७ ॥

चित्रमस्य भगवतः पद्मनाभस्य सेवार्थं समस्तभुवनभागवर्तिषु जनेषु सम्प्राप्तेष्वपि स मन्दिरप्रदेशस्तु भगवत्करुणाविलासवत् पुनरपि विततः परिलसति ॥ १८ ॥

अथ तदानीं मन्दिररथ्यावर्तनीचतुष्पथापणादिसकलप्रदेशा अप्यसंख्यया दीपमालिकया विराजमानास्त्वनिर्वाच्यां कामपि तेजःस्फूर्तिं दधते ॥ १९ ॥

दीपानां प्रभया नभोविततया श्रीलक्षदीपोत्सवे
तेजोरुद्धदृशः सुरासुरगणा विद्याधराः किन्नराः ।
यक्षाः किम्पुरुषाश्च चारणगणा गन्धर्वमुख्यास्तदा
निश्चेष्टाः खलु विस्मयेन तु भवन्त्येते नराः किं पुनः ॥

---

चित्रमिति । समस्तभुवनभागवर्तिषु सर्वलोकस्थितेषु । जनेषु, भगवतोऽस्य पद्मनाभस्य । सेवार्थं सम्प्राप्तेष्वपि स मन्दिरप्रदेशस्तु भगवत्करुणाविलासवत् पुनरपि, विततः विस्तृतः । परिलसति शोभते । चित्रमाश्चर्यम् ॥ १८ ॥

अथेति । तदानीं मन्दिरमालयान्तर्भागः रथ्या वर्तनी मार्गः चतुष्पथम् आपणः वाणिज्यस्थानम् एतदादयः सकलाः प्रदेशा अपि । असंख्यया, दीपमालिकया दीपपङ्क्त्या । विराजमानाः सन्तः तु, अनिर्वाच्यां निर्वक्तुमशक्यां । कामपि, तेजःस्फूर्तिं तेजस्फुरणं । दधते ॥ १९ ॥

दीपानामिति । सुरासुरगणा विद्याधराः किन्नराः यक्षाः किम्पुरुषाः चारणगणा गन्धर्वमुख्याश्च, नभसि आकाशे । विततया विस्तृतया दीपानां प्रभयोपलक्षिते श्रीमति लक्षदीपोत्सवे, तेजसा दीपतेजसा । रुद्धदृशोऽभिहतदृष्टयः । तदा विस्मयेन, निश्चेष्टाः निर्व्यापाराः खलु निर्व्यापारा एवेत्यर्थः । भवन्ति । एते नराः मानुषाः पुनः. किं । तैजसशरीराणां देवानामपि दृग्रोधे सति पार्थिवशरीराणां मानुषाणां का कथेति भावः ॥ ६ ॥

कल्पान्तोदितभानुकोटिसुषमानिर्मूलनोद्युक्तया
कान्त्या दीपततेश्चतुर्दशजगद्भागेष्वलं व्याप्तया ।
तावद्विष्णुपदाश्रयोत्सुकधियः स्वर्वासिनः सर्वतो
निःसीमाद्भुतसम्भृताः खलु मिथस्त्वेवं वदन्ति स्म ते ॥

किमयं मिहिरोदयस्त्वपूर्वो निशि जातो भुवि मन्दिरे मुरारेः ।
निरवद्यरुचिच्छटाभिरुच्चैरलमाक्रान्तजगत्त्रयो नितान्तम् ॥

अन्यस्तत्र सुरेषु वक्ति कुतुकस्मेरास्यपङ्केरुहः
प्रायो राशिरसौ त्विषां हि मिहिरः संव्याप्तलोकत्रयः ।

---

कल्पान्तेति । तावत् विष्णुपदयोः आश्रये सेवायां पद्मनाभपदसेवायामित्यर्थः आकाशस्थिताविति च । 'वियद्विष्णुपदमि'त्यमरः । उत्सुकधियः आसक्तचित्ताः । ते स्वर्वासिनः देवास्तु । कल्पान्ते प्रलये उदिता या भानुकोटिः कोटिसंख्याका भानवः तस्या या सुषमा तस्या निर्मूलने विनाशने उद्युक्तया उद्योगविशिष्टया, अपरिमितयेति यावत् । चतुर्दशजगद्भागेषु, सर्वतः सर्वत्रापि । अलमधिकं । व्याप्तया, दीपततेः दीपसमूहस्य । कान्त्या हेतुना । निःसीमेन निरवधिकेन अद्भुतेन सम्भृताः सम्पूर्णचित्ताः सन्तः । एवं वक्ष्यमाणप्रकारेण । मिथः अन्योन्यं । वदन्ति, स्मेति पादपूरणे ॥ ७ ॥

किमयमिति । उच्चैरुत्कृष्टाभिरित्यर्थः । निरवद्याभिः निर्दोषाभिः रुचिच्छटाभिः तेजस्समूहैः । अलं नितान्तम् । अतीवाधिकमित्यर्थः । आक्रान्तं जगत्त्रयम् अधोलोकमध्यलोकोपरिलोकरूपलोकत्रयं येन तादृशः । अपूर्वः पूर्वमननुभूतः अयं, मिहिरोदयः सूर्योदयः । भुवि, मुरारेः श्रीपद्मनाभस्य । मन्दिरे स्यानन्दूरपुर इत्यर्थः । निशि रात्रौ । जातः किमिति वितर्के । वसन्तमालिकावृत्तम् । 'विषमे ससजा गुरू समे चेत् सभरा यश्च वसन्तमालिका से'ति लक्षणात् ॥ ८ ॥

अन्य इति । कुतुकेन स्मेरं स्मितसहितम् आस्यपङ्केरुहं मुखाम्बुजं यस्य तादृशः । तत्र तेषु, सुरेषु मध्ये, अन्यः अपरः । वक्ति वदति । वच-

सन्देहो यदि तेऽस्ति तत्र कथयाम्येतां हि युक्तिं सखे!
स्नेहौघने विजृम्भितामितरुचेर्न स्यात् कथं मित्रता ॥ ९ ॥

एकस्तु तत्र दीपान् गणयितुं प्रवृत्तः पार्श्वस्थितैरन्यै-र्दिविषद्भिररे मन्दमते! भगवद्गुणगणवदपरिमितानामेतेषां दीपानां गणनां कथं करोषीति सहस्ततालमुपहसितो लज्जयावाङ्मुखो भवति ॥ २० ॥

अमीषां दीपानाममितसुषमारूपतटिनी-
प्रवाहे गम्भीरे मुहुरपि चलन्तौ च गगने ।
निरालम्बे सम्प्रत्युडुपतरणी हन्त भवतो
यथार्थाभिख्यौ ताविति वदति कश्चित् सुरगणे ॥ १० ॥

---

नप्रकारमाह — संव्याप्तं लोकत्रयं येन तादृशः । असौ अग्रे परिदृश्यमानः । त्विषां तेजसां । राशिः समूहः । प्रायः, मिहिरः सूर्यः हि । सूर्य एव हीत्यर्थः । हे सखे! ते तव । रुचिराशेर्मिहिरत्वे सन्देहः अस्ति यदि, एतां वक्ष्यमाणां । युक्तिं हेतुं । कथयामि, संशयनिवृत्त्यर्थमिति शेषः । युक्तिमेवाह — स्नेहौघेनेति । स्नेहौघेन तैलप्रवाहेण सौहृदातिशयेनेति च । विजृम्भिता वर्धिता अमिता अनल्पा च या रुचिः अभिषङ्गः राग इत्यर्थः किरण इति च सा यस्मिन् तादृशस्य । 'अभिषङ्गे स्पृहायां च गभस्तौ च रुचिः स्त्रियामि'त्यमरः । मित्रता सूर्यत्वं सुहृत्त्वमिति च । कथं न स्यात् स्यादेवेत्यर्थः ॥ ९ ॥

एकस्त्विति । तत्र तेषु मध्ये । एकः तु दीपान्, गणयितुं संख्यातुम् । आरब्धः प्रवृत्तः सन् । पार्श्वस्थितैरन्यैः, दिविषद्भिः देवैः । अरे मन्दमते! अल्पबुद्धे! । भगवद्गुणगणवत्, अपरिमितानाम् असंख्येयानाम् । एतेषां दीपानां गणनां कथं करोषि इति, सहस्ततालं हस्ततालसहितं यथा तथा । उपहासितः परिहसितश्च सन् । लज्जया, अवाङ्मुखः अधोमुखः भवति ॥ २० ॥

अमीषामिति । निरालम्बे निराधारे । गगने आकाशे । गम्भीरे अमीषां दीपानाम्, अमिता अनल्पा या सुषमा परमशोभा तद्रूपिण्याः तटिन्याः

अपरस्तु दिवि वितताास्तारा निरीक्ष्य किमेता दीपपङ्क्तयः स्वर्गङ्गायामपि बिम्बिता इति भणति ॥ २१ ॥

अस्माकं त्वनिमीलदक्षियुगता दत्ता पुरा वेधसा
व्यर्थैवेति विचिन्त्य हन्त बहवो नीता मुधा वासराः ।
शोभामस्य महोत्सवस्य परमामेतादृशीं पश्यतां
तत्सृष्टेः फलमत्र जातमधुनेत्येको वदत्यादरात् ॥ ११ ॥

सौवर्णाचलमूर्धसु द्युतिरियं दीपोदिता बिम्बिता
सद्यो हि द्विगुणीकरोति सुषमां तस्याचलस्य ध्रुवम् ।

---

प्रवाहे । मुहुः पुनः पुनरपि । चलन्तौ वलमानौ । तौ प्रसिद्धौ । उडुपः नक्षत्रेशः चन्द्रः । 'तारकाप्युडु वास्त्रियामि'त्यमरः । तरणिः सूर्यः । 'द्युमणिस्तरणिरि'त्यमरः । सोमसूर्यावित्यर्थः । प्लवनौके इति च । 'उडुपं तु प्लवः', 'स्त्रियां नौस्तरणिस्तरिरि'ति चामरः । सम्प्रति यथार्थाभिख्यौ अन्वर्थसंज्ञौ । भवतः, हन्तेति हर्षे । सोमसूर्ययोः पूर्वमुडुपतरणिरूपसंज्ञे अयुक्ते अभवताम् । इदानीं तु तटिनीप्रवाहरूपप्लवनौकाक्रियावत्त्वात् तयोस्तत्संज्ञे युक्ततरे भवत इति भावः । इति सुरगणे देवसमूहे कश्चिद् वदति ॥ १० ॥

**अपरस्त्विति** । अपरः अन्यः तु । दिवि आकाशे । वितताः विस्तृताः । ताराः नक्षत्राणि । निरीक्ष्य एता अपि स्वर्गङ्गायां, बिम्बिताः प्रतिफलिताः । दीपपङ्क्तयः दीपसमूहाः । किमिति वितर्के । इति, भणति वदति ॥

**अस्माकमिति** । पुरा, वेधसा ब्रह्मणा । दत्ता अस्माकम्, अनिमीलत् निर्निमेषमित्यर्थः, अक्षियुगं नेत्रयुग्मं येषां ते तादृशाः तेषां भावः अनिमीलदक्षियुगता सा । व्यर्था निष्प्रयोजनैव । इति विचिन्त्य बहवः, वासराः दिवसानि । मुधा वृथा । नीताः प्रापिताः । अधुना अत्र स्यानन्दूरपुरे । एतादृशीं परमामुत्कृष्टाम् । अस्य महोत्सवस्य लक्षदीपोत्सवस्य । शोभां पश्यताम् अस्माकं, तस्या अनिमीलदक्षियुगतायाः सृष्टेः । फलं जातमिति एकः आदराद् वदति ॥ ११ ॥

**सौवर्णाचलेति** । दीपेभ्य उदिता उद्भूता । इयं रुचिः कान्तिः । सौवर्णाचलस्य महामेरोः मूर्धसु शिखरप्रदेशेषु । बिम्बिता सती, तस्याचलस्य

पर्यन्तभ्रमदंशुमालिकिरणप्रद्योतितार्धाकृते-
रन्यार्धेऽपि निराकृतान्धतमसे शोभास्य किं कथ्यते ॥

स्रस्ताद् दिवो भुवि दिवाकरकान्तिबीज-
जालाद् रमेशसुषमामृतसेकहृद्ये ।
क्षेत्रेऽङ्कुरावलिरियं प्रविभाति जाता
नो दीपपङ्क्तिरिति तत्र वदत्यथान्यः ॥ १३ ॥

हरिं जित्वा कान्त्या हरिमपि हरेर्मन्दिरगता
हरेर्लीलां ध्वान्तप्रकरकरियूथे विदधती ।

---

महामेरोः । सुषमां परमशोभां । सद्यः द्विगुणीकरोति । ध्रुवं निश्चयः । पर्यन्तेषु पार्श्वभागेषु भ्रमन् यः अंशुमाली सूर्यः तस्य किरणैः प्रद्योतिता प्रकर्षेण द्योतिता अर्धाकृतिः अर्धस्वरूपं यस्य तादृशस्य । अस्य महामेरोः । अन्यार्धेऽपि, निराकृतमन्धतमसं यत्र तादृशे सति । शोभा किं कथ्यते इत्येको वदतीत्यनुषज्यते ॥ १२ ॥

**स्रस्तादि**ति । अथ तत्रान्यः इयं भुवि, रमेशस्य श्रीपद्मनाभस्य सुषमयैवामृतेन यः सेकः सेचनं तेन हृद्ये मनोहरे । क्षेत्रे केदारे । 'क्षेत्रं व्रैहेयशालेयमि'त्यमरः । देवालय इति च । दिवः आकाशात् । स्रस्तात् गलितात् । दिवाकरस्य सूर्यस्य कान्तिरूपाणां बीजानां जालात् समूहात् । जाता-उत्पन्ना । अङ्कुरावलिः अङ्कुरसमूहः । प्रविभाति शोभते । दीपपङ्क्तिः दीपावलिः नो नैवेत्यर्थः । इति वदति । अपह्नवालङ्कारः ॥ १३ ॥

**हरिमि**ति । हरेः श्रीपद्मनाभस्य । मन्दिरगताः क्षेत्रस्थिताः । ध्वान्तप्रकरे अन्धकारसमूहे एव करियूथे गजसमूहे । हरेः सिंहस्य । लीलां विलासं । विदधती कुर्वाणा । सिंहो गजयूथमिव ध्वान्तप्रकरं विनाशयन्तीत्यर्थः । हरेरिन्द्रस्य । नेत्रौघेन नेत्रसहस्रेणापि । अपरिकलनीया अनिरूप्येत्यर्थः अमिता अनल्पा रुचिः कान्तिर्यस्यास्तादृशी । हरिद्रावत् गौरा आभा शोभा यस्या-

हरेर्नेत्रौघेनाप्यपरिकलनीयामितरुचि-
हरिद्रागौराभा लसति बत दीपावलिरियम् ॥ १४ ॥

एवं स भगवान् दिवि समुपागतैरसीमतरानन्दसम्पूर्णमानसैरमर्त्यपुरस्सरैर्भुवि मनुजैश्च नुतः सानन्दं वीक्षितश्च तदीयनेत्रनीलोत्पलनिबिडीभूतेन पथा मन्दं मन्दं निजविमानवरं व्रजति ॥ २२ ॥

तदनूत्सवे समाप्ते स्वकीयसदनान्युद्दिश्य जिगमिषवोऽपि भगवत्पादसेवां क्षणमपि विहाय गन्तुमनिच्छन्तः समस्तनिगमागमपारदृश्वानोऽमी महीसुरतिलकास्त्वेवं संस्तुवन्ति भगवन्तं श्रीपद्मनाभम् ॥ २३ ॥

---

स्तादृशी । इयं दीपावलिः, कान्त्या रुच्या । हरिं सूर्यं । हरिं चन्द्रमपि । जित्वा, लसति शोभते । बत आश्चर्यम् । इत्यन्यः वदतीत्यनुषज्यते । 'यमानिलेन्द्रचन्द्रार्कविष्णुसिंहांशुवाजिषु । शुकाहिकपिभेकेषु हरिर्ना कपिले त्रिष्वि'-त्यमरः ॥ १४ ॥

एवमिति । स भगवान् श्रीपद्मनाभः । दिवि आकाशे । समुपागतैः, असीमतरेणातीव निरवधिकेन आनन्देन सम्पूर्णं मानसं मनो येषां तादृशैः । अमर्त्यपुरस्सरैः देवश्रेष्ठैः । भुवि, समुपागतैरित्यनुषज्यते । मनुजैश्च, एवमुक्तप्रकारेण । नुतः स्तुतः । सानन्दं वीक्षितश्च, तदीयैः नेत्रैरेव नीलोत्पलैः निबिडीभूतेन । पथा मार्गेण । मन्दं मन्दं निजविमानवरं, व्रजति प्रविशति ॥ २२ ॥

तदन्विति । तदनु, उत्सवे लक्षदीपोत्सवे । समाप्ते, स्वकीयसदनानि स्वस्वगृहाणि । उद्दिश्य, जिगमिषवो गन्तुमिच्छवोऽपि । भगवत्पादसेवां, क्षणं क्षणकालमपि । विहाय त्यक्त्वा । गन्तुम् अनिच्छन्तः, समस्तानां निगमानां वेदानामागमानाम् आगमशास्त्राणां च पारदृश्वानः पारंगताः । अमी, महीसुरतिलकाः ब्राह्मणश्रेष्ठास्तु । भगवन्तं श्रीपद्मनाभम्, एवं वक्ष्यमाणप्रकारेण । सम्यक् स्तुवन्ति । निगमागमपारदृश्वान इति विशेषणसा-

विश्वं दृश्यमिदं यतः समभवद् यस्मिन् य एतत् पुन-
भासा यस्य विराजतेऽथ सकलं येनेह वा निर्मितम्।
यो वाचां मनसोऽप्यगोचरपदं मायातिगो भासते
तस्मै देव! नमोऽस्तु विश्वगुरवे श्रीपद्मनाभाय ते ॥ १५ ॥

मर्थ्याद् वक्ष्यमाणस्तुतेः निगमान्तार्थप्रतिपादकत्वमस्तीति सूचितं भवति ॥ २३ ॥

नन्वीश्वरे सति स्तुतिः स्यात्, तत्रैव किं मानमित्याशङ्कां जगत्कारणत्वेनेश्वरसाधनेन परिजिहीर्षवः प्रथमं भगवतः स्वरूपतटस्थलक्षणद्वयं प्रतिपाद्य निखिलनिगमान्तार्थसारमितरानपि बोधयन्तो भगवन्तं नमस्कुर्वन्ति— **विश्वं दृश्यमित्यादिभिर्दशभिः श्लोकैः**। दृश्यं ज्ञानविषयीभूतं। विश्वं समस्तम्। इदं जगत्। यतः उपादानकारणभूताद् यस्माद् भगवतः समभवत् सञ्जातं। येन कर्त्रा। यः यदभिन्नम्। एतत् जगत्। यस्मिन्, इह अधिष्ठाने भगवति। निर्मितं वा रचितं चेत्यर्थः। अयमत्र प्रयोगः— दृश्यमानं जगत् किञ्चिदुपादानकं किञ्चित्कर्तृकं किञ्चिद्रूपं किञ्चिदधिष्ठानकं च भवेत् जन्यत्वाद् घटादिवदिति। जगदुपादानत्वादिना कस्मिंश्चित् सिद्धे अन्येषां बाधाद् ईश्वर एव तादृश इति प्रमाणं सूचितम्। नचैवमुपादानकर्त्रधिष्ठानादिभेदेनेश्वरनानात्वम्। ऊर्णनाभवदेकस्यैव कर्तृत्वोपादानत्वादिसम्भवे बाधकाभावाद् जगतोऽभिन्ननिमित्तोपादानकत्वस्य एकविज्ञानेन सर्वविज्ञानप्रतिज्ञया सिद्धान्तितत्वाच्च। नन्वीश्वरस्यापि ज्ञेयतया जगत इव मिथ्यात्वं स्यादित्यत आह— यो वाचामिति। यः, वाचां लौकिकवैदिकवचसां। मनसोऽप्यगोचरपदम् अविषयवस्तु। परब्रह्मणि जातिगुणक्रियादिप्रवृत्तिनिमित्ताभावेन केनापि निमित्तेन न कोऽपि शब्द ईश्वरं प्रतिपादयति। अत एव मनोऽपि न विषयीकरोतीत्यर्थः। नन्वीश्वरस्य जगदभिन्नत्वे विकारित्वं स्यादित्यत आह— मायातिग इति। मायामतिक्रम्य गतः, स्वस्मिन्नध्यस्तमायिकप्रपञ्चातीत इत्यर्थः। जगतो भगवत्यध्यस्ततया भगवद्रूपता, अध्यस्तस्य अधिष्ठानसत्तातिरिक्तसत्ताभावात्। नहि भवति शुक्तिरूप्यं शुक्तिसत्ताव्यतिरिक्तसत्ताकम्। तथाच मिथ्याभूताद् जगतः पारमार्थिकस्वरूपस्य भगवतः अतिरिक्तत्वं सि-

लोके स्थावरजङ्गमात्मनि तु यः सर्वेषु जन्तुष्वलं
चैतन्यात्मतया विशन् विलसति ज्ञानस्वरूपोऽमलः ।
नो लिप्तः पयसेव पङ्कजदलं मायाश्रयस्तद्गुणै-
स्तस्मै देव! नमोऽस्तु विश्वगुरवे श्रीपद्मनाभाय ते ॥

यस्येशस्य निषेवयानवमया त्वाचार्यवर्याननाा-
दुद्भूताप्रतिमोपदेशविकसत्सद्वर्त्मनावाप्तया ।

---

द्धमेवेति न विकारित्वशङ्केति भावः । अवाङ्मनसगोचरत्वे हेतुमाह — पुनर्भासेति । अथ पुनः यस्य, भासा चिच्छक्त्या । सकलं जगत्, विराजते भाति । यत्प्रकाशेन लब्धसत्ताकं भवतीत्यर्थः । वागादिना तत्प्रकाशनमशक्यमेवेति भावः । हे देव! अखण्डसच्चिदानन्दात्मना प्रकाशमान!, स्वरूपलक्षणमेतत् । विश्वगुरवे विश्वेषां ज्ञानप्रदाय । श्रीपद्मनाभाय तस्मै, ते तुभ्यं । नमोऽस्तु ॥ १९ ॥

**लोक** इति । मायाश्रयः प्रपञ्चसृष्ट्यर्थं गृहीतमाय इत्यर्थः । मायाप्रतिबिम्बित इति यावत् । मायाश्रयत्वेऽपि मायागुणलेपप्रसङ्गो भगवति नास्तीत्याह — पयसा पङ्कजदलमिव, तद्गुणैः सत्त्वरजस्तमोरूपैः मायागुणैः । नो लिप्तः सत्त्वादिगुणलेपरहित इत्यर्थः । यथा वा पङ्कजदलं जलाश्रितमपि जलालिप्तं भवति, तथा भगवानपि निर्लेप एवेत्यर्थः । ज्ञानस्वरूपः, अमलः निर्मलः । भगवतः ज्ञानस्वरूपत्वेऽपि तदात्मकज्ञानस्य विषयो नास्तीति भावः । निर्विषयज्ञानस्वरूप इति यावत् । यः तु, स्थावरजङ्गमात्मनि स्थावरजङ्गमस्वरूपे । लोके भुवने । सर्वेषु जन्तुषु सकलप्राणिषु । चैतन्यात्मतया ज्ञानात्मना । विशन् व्याप्तः सन्नित्यर्थः । विलसति सकलप्राणिनामप्यन्तश्चैतन्यरूपेणानुस्यूतो विराजत इत्यर्थः । हे देव! विश्वगुरवे श्रीपद्मनाभाय तस्मै ते नमोऽस्तु ॥ २० ॥

**यस्येति** । आचार्यवर्यस्य श्रोत्रियब्रह्मनिष्ठत्वादिगुणविशिष्टस्य गुरोः आननात् सकाशात् । उद्भूतः सम्भूतः अप्रतिमः साक्षात्कारहेतुत्वेन निरुपमश्चेत्यर्थः यः उपदेशः अध्यारोपापवादपूर्वकमहावाक्यार्थबोधनं तेन विकसत्

मिथ्यात्वं जगतः स्फुटं हृदि भवेद् रज्जौ यथाहेस्तथा
तस्मै देव! नमोऽस्तु विश्वगुरवे श्रीपद्मनाभाय ते ॥१७॥

रूपं यस्य मृगं न चेह मनुजं नो कर्म जातिं च नो
न द्रव्यं न गुणं स्त्रियं न पुरुषं नैवासुरं नो सुरम् ।
नैवासच्च सदित्यनन्तधिषणाः प्राहुर्महान्तो बुधा-
स्तस्मै देव! नमोऽस्तु विश्वगुरवे श्रीपद्मनाभाय ते ॥१८॥

---

प्रकाशमानं सत् समीचीनं च यत् वर्त्म मार्गः मननिदिध्यासनादिरूपः तेन । अवाप्तया प्राप्तया । अनवमया सर्वोत्कृष्टया । यस्येशस्य श्रीपद्मनाभस्य । निषेवया नितरां सेवया, साक्षात्काररूपयेत्यर्थः । तुरवधारणे । निषेवयैवेत्यर्थः। जगतः यस्मिन् अध्यस्तस्य प्रपञ्चस्य । तथा मिथ्यात्वं पारमार्थिकत्वाभावः । हृदि, स्फुटं निःसंशयं । भवेत् । तत्र दृष्टान्तमाह — रज्जाविति । रज्जौ गुणे । अहेः सर्पस्य । यथा मिथ्यात्वम्, अधिष्ठानभूतरज्जुज्ञानाभावेन अध्यस्तस्य सर्पस्य प्रतिभाने सत्यप्यधिष्ठानभूतरज्जुज्ञानेन सर्पे यथाधिष्ठानभूतसत्ताव्यतिरिक्तसत्ताभावो ज्ञायते, तथा जगदधिष्ठानेश्वरज्ञानेन ईश्वरसत्ताव्यतिरिक्तसत्ताभावो जगति ज्ञायत इति भावः । हे देव! विश्वगुरवे श्रीपद्मनाभाय तस्मै ते नमोऽस्तु ॥ १७ ॥

रूपमिति । अनन्तधिषणाः अनन्ते परब्रह्मणि धिषणा धीर्येषां तादृशाः। महान्तः, बुधाः विद्वांसः । यस्य परब्रह्मरूपिणः श्रीपद्मनाभस्य । रूपं स्वरूपम् । इह लोके । मृगं च नाहुः । अनेन तिर्यङ्निषेधः । मनुजं मनुष्यं । न चाहुः । सुरं देवं । नो आहुः । असुरं नैवाहुः । स्त्रियं नाहुः । पुरुषं नाहुः । एतन्नपुंसकस्याप्युपलक्षणम् । द्रव्यं पृथिव्यादि । नाहुः । गुणं रूपरसादि । नाहुः । कर्म क्रियां । नो आहुः । जातिं सामान्यं च । नो आहुः । विशेषसमवायाभावानां कैश्चिदनङ्गीकाराद् विशिष्य तन्निषेधो न कृत इति ध्येयम् । असत् कारणरूपमव्यक्तं । सत् दृश्यमानं कार्यम् । इति च नैवाहुः । अपरिच्छिन्नचिदात्मनः परिच्छिन्नजडरूपतासम्भवादिति भावः । हे देव! विश्वगुरवे श्रीपद्मनाभाय ते तस्मै नमोऽस्तु ॥ १८ ॥

मार्तण्डो गगनोदितस्तु तिमिरं यद्वत् पिनष्टि क्षणा-
च्छीतं चानुपमं यथा च हुतभुग् रोगान् यथैवौषधम् ।
अज्ञानं किल तद्वदेव कृपया योऽसौ विधत्ते हतं
तस्मै देव! नमोऽस्तु विश्वगुरवे श्रीपद्मनाभाय ते ॥ १९ ॥
कल्पान्ते तु चराचरेऽथ भुवने नष्टे समस्ते पुन-
र्गम्भीरेण तथामितेन तमसा व्याप्ते च दिङ्मण्डले ।
योऽसौ भाति तदा विभुर्वितिमिरस्तेजःस्वरूपोऽनिशं
तस्मै देव! नमोऽस्तु विश्वगुरवे श्रीपद्मनाभाय ते ॥२०॥
लोके चात्र शमादिषट्कविकसद्दिव्यप्रबोधोज्ज्वल-
स्वान्ताः शान्ततमा जितेन्द्रियगणा धन्यास्तु सन्न्यासिनः ।

---

**मार्तण्ड** इति । मार्तण्डः सूर्यः । गगनोदितः सन्, तिमिरं तमः । क्षणात् यद्वत्, पिनष्टि विनाशयति । हुतभुगग्निः । अनुपमम् अधिकं शीतं शैत्यं । यथा च पिनष्टि । औषधं यथैव रोगान् पिनष्टि । यः असौ पद्मनाभः । कृपया तद्वदेव अज्ञानं संसारहेतुभूतामविद्यां । हतं नष्टं । विधत्ते करोति किल । हे देव! विश्वगुरवे श्रीपद्मनाभाय तस्मै ते नमोऽस्तु ॥ १९ ॥

**कल्पान्त** इति । चराचरे स्थावरजङ्गमात्मके । समस्ते भुवने नष्टे सति, अथ पुनस्तथा, गम्भीरेण सान्द्रेण । अमितेनानल्पेन । तमसा सुषुप्त्या । दिङ्मण्डले च दिङ्मण्डलशब्देन समष्टिशरीराभिमानी हिरण्यगर्भ उच्यते, तस्मिन् व्याप्ते सति । तदा, विभुः व्यापकः । तेजःस्वरूपः चैतन्यप्रकाशात्मा । यः असौ श्रीपद्मनाभः । वितिमिरः तिमिरशब्देन अज्ञानकार्यं दृश्यमुच्यते । सुषुप्तावन्तःकरणस्यापि लयेनान्तःकरणोपहितचैतन्यरूपद्रष्टुरभावेन दृश्यरहितः सन्नित्यर्थः । भाति प्रकाशते । सर्वसंहारे प्रस्वापे सति सकलजगन्निदानभूतमज्ञानं तमश्शब्दवाच्यं न लयं गच्छति । अन्यथा जगतः पुनरुत्पत्त्यभावप्रसङ्गात् । एवञ्च नित्योदितानस्तमयप्रकाशरूपतया अज्ञानमात्रसाक्षित्वेन वर्तत इति भावः । हे देव! विश्वगुरवे श्रीपद्मनाभाय तस्मै ते नमोऽस्तु ॥ २० ॥

**लोके चे**ति । अत्र लोके जितेन्द्रियगणाः, शान्ततमाः अत्यन्तमुपशान्ताः । शमादीनां शमदमोपरतितितिक्षासमाधित्यागानां षट्केन विकसन्

मुक्तिं यत्करुणालवेन सरसं सम्प्राप्नुवन्तीह ते
तस्मै देव! नमोऽस्तु विश्वगुरवे श्रीपद्मनाभाय ते ॥ २१ ॥

कृत्वा हन्त मखान् यथाविधि पुमान् स्वर्गेच्छया भूतले
तेषां तत्र फलं च पुण्यसदृशं भुङ्क्ते च नातोऽधिकम् ।
सेवा यस्य ददाति मुक्तिममलामानन्दसान्द्रां स्थिरां
तस्मै देव! नमोऽस्तु विश्वगुरवे श्रीपद्मनाभाय ते ॥२२॥

स्वेनैवेह विनिर्मितं खलु जगत् कृत्स्नं स्वतो लीलया
स्वेनेदं परिपालितं पुनरिह स्वेनैव सन्नाशितम् ।

---

उद्भूतः दिव्यः उत्तमश्च यः प्रबोधः ब्रह्मज्ञानं तेनोज्ज्वलं स्वान्तं मनो येषां तादृशाः । धन्याः सुकृतिनश्च । ते प्रसिद्धाः । संन्यासिनः, यस्य श्रीपद्मनाभस्य करुणावशेन । मुक्तिं, सरसम् अनायासेनेति यावत् । इहात्रैव । ब्रह्मलोकादिप्राप्तिं विनैवेत्यर्थः । प्राप्नुवन्ति लभन्ते । हे देव! विश्वगुरवे श्रीपद्मनाभाय तस्मै ते नमोऽस्तु ॥ २१ ॥

कृत्वेति । पुमान् पुरुषः । भूतले स्वर्गेच्छया, मखान् क्रतून् । यथाविधि विध्यनुसारेण । कृत्वा, तत्र स्वर्गे । पुण्यसदृशं तत्तत्कर्मजन्यादृष्टानुरूपं । तेषां मखानां । फलं सुखम् । अनुभुङ्क्ते अनुभवति । अतः पुण्यादधिकं । नानुभुङ्क्ते । हन्त कष्टम् । अपरिमितक्लेशं कुर्वन्नपि जनः स्वल्पं फलं भुङ्क्ते । अतः शोच्य इति भावः । यस्य श्रीपद्मनाभस्य । सेवा, अमलां निर्मलां, विशुद्धज्ञानस्वरूपामित्यर्थः । आनन्दसान्द्रां सान्द्रानन्दस्वरूपामित्यर्थः । स्थिरां नित्यां । मुक्तिं मोक्षं । ददाति । हे देव! विश्वगुरवे श्रीपद्मनाभाय तस्मै ते नमोऽस्तु ॥ २२ ॥

स्वेनैवेति । सात्त्वतां सत्त्वगुणप्रधानानां । श्रेयोयनं श्रेयसामयनं वर्त्म, श्रेयःसम्पादकमित्यर्थः । प्रकर्षेण प्रपञ्चात्मना भवतीति प्रभुः । यः श्रीपद्मनाभः । स्वेनैव कर्तृभूतेन । स्वतः स्वरूपादानभूतात् स्वस्मादेव । इहाधिकरणभूते । स्वस्मिन्निति शेषः । लीलया अनायासेनेत्यर्थः । एतदुत्तरत्रापि योज्यम् । विनिर्मितं विरचितं । स्वेन, परिपालितं रक्षितं । पुनः स्वेनैव इह

पश्यन् यो मुदितः प्रभुर्विलसति श्रेयोयनं सास्वतां
तस्मै देव! नमोऽस्तु विश्वगुरवे श्रीपद्मनाभाय ते ॥२३॥

चित्ते यस्य तु यादृशी प्रभवति श्रद्धा निजाराधने
तद्वत् तत्परिपालनाय विहितश्रद्धाय विश्वात्मने ।
सच्चित्पूर्णसुखैकवारिधिलसत्कल्लोलरूपाय वै
तस्मै देव! नमोऽस्तु विश्वगुरवे श्रीपद्मनाभाय ते ॥२४॥

एवममेयभक्तिभारपुरस्सरं तं भगवन्तं निखिलवेदान्तार्थसारभूतं संस्तुत्यामी महीसुराः परमानन्दभरिताः स्वकीयसदनान्युद्दिश्य यथागतं गच्छन्ति ॥ २४ ॥

स्वस्मिन्, सन्नाशितं विलयं प्रापितम् । इदं, कृत्स्नं समस्तं । जगत् पश्यन्, मुदितः योगनिद्रास्वरूपानन्दं प्राप्तः । विलसति शोभते । प्रलयकाल इति शेषः । हे देव! विश्वगुरवे श्रीपद्मनाभाय तस्मै ते नमोऽस्तु ॥ २३ ॥

चित्त इति । यस्य पुरुषस्य तु । चित्ते निजाराधने यादृशी, श्रद्धा तात्पर्यं । प्रभवति सम्भवति । तत्परिपालनाय तस्य रक्षणाय । तद्वत् तच्छ्रद्धानुरूपं । विहिता कल्पिता श्रद्धा तात्पर्यं येन तस्मै । विश्वात्मने विश्वेषां प्राणिनाम् आत्मने जीवस्वरूपाय । सत् सद्रूपं चित् ज्ञानस्वरूपं पूर्णसुखम् अखण्डानन्दरूपं च यत् एकमद्वितीयं ब्रह्म तद्रूपे वारिधौ समुद्रे लसन् यः कल्लोलस्तरङ्गः तद्रूपाय । यथा वा निष्कम्पपरिपूर्णसमुद्रादुद्भूतः क्रियाविशिष्टस्तरङ्गः समुद्रान्नातिरिच्यते, तथा निष्कम्पाखण्डसच्चिदानन्दात्मके परब्रह्मण्युद्भूतव्यापनाद्यनेकक्रियाशक्तिविशिष्टविष्णुस्वरूपो भगवानपि परब्रह्मणो नातिरिक्त एवेति तत्त्वम् । हे देव! विश्वगुरवे श्रीपद्मनाभाय तस्मै तच्छब्दार्थाय ते नमोऽस्तु ॥ २४ ॥

एवमिति । अमी महीसुराः, निखिलानां वेदान्तानामर्थसारभूतं सारार्थभूतं, तात्पर्यविषयार्थभूतमित्यर्थः । तं भगवन्तं श्रीपद्मनाभम् । एवमुक्तप्रकारेण । अमेयभक्तिभारपुरःसरम् अपरिमितभक्तिसहितं यथा तथा । संस्तुत्य

जयतु जयतु सोऽयं पद्मनाभो मुकुन्दो
निजचरणरतानां पालने बद्धदीक्षः ।
अविकलमपि चायुः श्रीसुखारोग्यकीर्त्तीः
प्रतिदिनमपि पुष्णन् स्वानुकम्पासुधाभिः ॥ २५ ॥

एवं जगत्त्रयगुरोः कमलावरस्य
सङ्कीर्तनं गुणगणाब्धिलवस्य किञ्चित् ।
देवस्य तस्य कृपयैव कृतं मयेदं
सन्तो गृणन्तु रसिकाः किल सप्रमोदम् ॥ २६ ॥

नाभीजाताब्जसंस्थद्रुहिणमुखगणोद्गीतवेदश्रुतौ वै
नित्यं संसक्तचित्तोऽप्यमरवरमुनिश्रेष्ठसङ्कीर्तनेऽपि ।

---

सम्यक् स्तुत्वा । परमानन्दभरिताः सन्तः, स्वकीयसदनानि आत्मीयगृहानुद्दिश्य यथागतं गच्छन्ति ॥ २४ ॥

जयत्विति । निजचरणरतानां निजचरणयोः रतानां रतिं भक्तिं कुर्वतां । पालने रक्षणे । बद्धा दीक्षा नियमो येन तादृशः । मुकुन्दः मुक्तिप्रदः । सः अयं श्रीपद्मनाभः, अविकलं पूर्णम् । आयुः श्रियं सम्पदं सुखमारोग्यं नीरोगतां कीर्त्तिं यशश्च । अर्थाद्वक्तृश्रोतॄणाम् । स्वस्यानुकम्पा दया तद्रूपाभिः सुधाभिः । पुष्णन् वर्धयन् । जयतु जयतु सर्वोत्कर्षेण वर्तताम् ॥ २५ ॥

एवमिति । जगत्त्रयगुरोः, कमलावरस्य श्रीपद्मनाभस्य । गुणगणाब्धिलवस्य गुणगणार्णवलेशस्य । किञ्चित् संकीर्तनं तस्य देवस्य कृपयैव मया एवं कृतं, रसिकाः सहृदयाः । सन्तः साधवः किल । इदं काव्यं । सप्रमोदं यथा तथा । गृणन्तु पठन्तु ॥ २६ ॥

नाभीजातेति । नाभ्यां जाते अब्जे संस्थस्य स्थितस्य द्रुहिणस्य ब्रह्मणः मुखानां गणेन समूहेन उद्गीतस्य वेदस्य श्रुतौ श्रवणे । अमरवराणां मुनिश्रेष्ठानां च संकीर्तने स्तुतावपि । नित्यं संसक्तचित्तोऽपि असौ पद्मनाभः स्वामी, रहसि

लक्ष्म्या साकं विहारे रहसि कृतिमिमां यद्यसौ पद्मनाभः
स्वामी कर्णे दधाति क्षणमपि कृतकृत्योऽस्मि तेनैव लोके ॥

स्वातीजातेन चूडाधृतसरसिजनाभाङ्घ्रियुग्मेन लक्ष्मी-
राज्ञीपुत्रेण वञ्चीश्वरकुलजनुषा रामवर्माभिधेन ।
भक्त्युद्रेकेण शश्वद् गुरुवरकृपया निर्मितं चम्पुकाव्यं
स्यानन्दूरेश्वरस्य प्रमितमुपहृतं शं सदालं निदध्यात् ॥ २८ ॥

इति स्वातिश्रीरामवर्मकुलशेखरवञ्चिमहाराजप्रणीते
स्यानन्दूरपुरवर्णनप्रबन्धे लक्षदीपश्लाघा नाम
दशमः स्तबकः ।

समाप्तश्चायं ग्रन्थः ।

विजने । लक्ष्म्या साकं विहारे इमां कृतिं क्षणमपि कर्णे दधाति यदि शृणोति चेदित्यर्थः । तेन मदीयकृतिश्रवणेन । अहमिह लोके कृतकृत्योऽस्मि ॥ २७ ॥

स्वातीति । स्वातीनक्षत्रे जातेन । चूडायां धृतं सरसिजनाभस्य अङ्घ्रियुग्मं येन तादृशेन । लक्ष्मीनाम्न्याः राज्ञ्याः पुत्रेण । वञ्चीश्वरकुले जनुर्जननं यस्य तादृशेन । रामवर्माभिधेन, शश्वदनवरतं । भक्त्युद्रेकेण भक्त्यतिशयेन । गुरुवरकृपया च निर्मितं, प्रमितं संक्षिप्तं । स्यानन्दूरेश्वरस्य श्रीपद्मनाभायेत्यर्थः । उपहृतम् उपहारत्वेन समर्पितं च चम्पुकाव्यं, शं सुखं । सदा, अलं नितरां । निदध्यात् कुर्यादित्यर्थः । अत्र शं सदालं निदध्यादित्यनेन कलियुगारम्भात् प्रभृति त्रिसहस्राष्टशतपञ्चसप्तत्यधिकाष्टादशलक्षदिवसेषु गतेष्वेतत्प्रबन्धसमाप्तिरिति सूचनाद् मुद्रालङ्कारः । "सूच्यार्थसूचनं मुद्रा प्रकृतार्थपरैः पदैः" इति लक्षणात् ॥ २८ ॥

इति स्यानन्दूरपुरवर्णनप्रबन्धव्याख्यायां श्रीराजराजवर्मदेवप्रणीतायां
सुन्दर्याख्यायां दशमः स्तबकः ।

शुभं भूयात् ।

# READY FOR SALE.

| | RS. | AS. | P. |
|---|---|---|---|
| भक्तिमंजरी (Stuti) by H. H. Svâti Srî Râma Varma Mahârâjah. | 1 | 0 | 0 |
| स्यानन्दूरपुरवर्णनप्रबन्धः (Kavya) Syânandûrapuravarnanaprabandha by H. H. Swâti Sri Râma Varma Mahârâja, with the commentary Sundari of Râjarâja Varma Koil Tampurân. | 2 | 0 | 0 |

## Trivandrum Sanskrit Series.

| | RS. | AS. | P. |
|---|---|---|---|
| No. 1—दैवम् (Vyâkarana) by Deva with Purushakâra of Krishnalîlâsukamuni. | 1 | 0 | 0 |
| No. 2—अभिनवकौस्तुभमाला-दक्षिणामूर्तिस्तवौ by Krishnalîlâsukamuni. | 0 | 2 | 0 |
| No. 3—नलाभ्युदयः (Kâvya) by Vâmana Bhatta Bâna (Second Edition). | 0 | 4 | 0 |
| No. 4—शिवलीलार्णवः (Kâvya) by Nîlakantha Dîkshita. | 2 | 0 | 0 |
| No. 5—व्यक्तिविवेकः (Alankâra) by Mahima Bhatta with commentary. | 2 | 12 | 0 |
| No. 6—दुर्घटवृत्तिः (Vyâkarana) by Saranadeva. | 2 | 0 | 0 |
| No. 7—ब्रह्मतत्त्वप्रकाशिका (Vedânta) by Sadâsivendra Sarasvatî | 2 | 4 | 0 |
| No. 8—प्रद्युम्नाभ्युदयम् (Nâtaka) by Ravi Varma Bhûpa. | 1 | 0 | 0 |
| No. 9—विरूपाक्षपञ्चाशिका (Vedânta) by Virûpâkshanâtha with the commentary of Vidyâchakravartin. | 0 | 8 | 0 |
| No. 10—मातङ्गलीला (Gajalakshana) by Nîlakantha. | 0 | 8 | 0 |
| No. 11—तपतीसंवरणम् (Nâtaka) by Kulasekhara Varma with the commentary of Sivarâma. | 2 | 4 | 0 |
| No. 12—परमार्थसारम् (Vedânta) by Bhagavad Âdisesha with the commentary of Râghavânanda. | 0 | 8 | 0 |
| No. 13—सुभद्राधनञ्जयम् (Nâtaka) by Kulasekhara Varma with the commentary of Sivarâma | 2 | 0 | 0 |

| | RS. | AS. | P |
|---|---|---|---|
| No. 14—नीतिसारः (Nîti) by Kâmandaka, with the commentary of Sankarârya. | 3 | 8 | 0 |
| No. 15—स्वप्नवासवदत्तम् (Nâtaka) by Bhâsa. (Second Edition) | 1 | 8 | 0 |
| No. 16—प्रतिज्ञायौगन्धरायणम् (Nâtaka) by Bhâsa. | 1 | 8 | 0 |
| No. 17—पञ्चरात्रम् Do. Do. | 1 | 0 | 0 |
| No. 18—नारायणीयम् (Stuti) by Nârâyana Bhatta with the commentary of Desamangala Vârya. | 4 | 0 | 0 |
| No. 19—मानमेयोदयः (Mîmâmsâ) by Nârâyana Bhatta and Nârâyana Pandita. | 1 | 4 | 0 |
| No. 20—अविमारकम् (Nâtaka) by Bhâsa. | 1 | 8 | 0 |
| No. 21—बालचरितम् Do. Do. | 1 | 0 | 0 |
| No. 22—मध्यमव्यायोग-दूतवाक्य-दूतघटोत्कच-कर्णभारोरुभङ्गानि (Nâtaka) by Bhâsa. | 1 | 8 | 0 |
| No. 23—नानार्थार्णवसंक्षेपः (Kosa) by Kesavaswâmin (Part I. 1st & 2nd Kândas) | 1 | 12 | 0 |
| No. 24—जानकीपरिणयः (Kâvya) by Chakrakavi. | 1 | 0 | 0 |
| No. 25—काणादसिद्धान्तचन्द्रिका (Nyâya) by Gangâdharasûri. | 0 | 12 | 0 |
| No. 26—अभिषेकनाटकम् (Nâtaka) by Bhâsa. | 0 | 12 | 0 |
| No. 27—कुमारसम्भवः (Kâvya) by Kâlidâsa with the two commentaries, Prakâsikâ of Arunagirinâtha and Vivarana of Nârâyana Pandita (Part I. 1st & 2nd Sargas). | 1 | 12 | 0 |
| No. 28—वैखानसधर्मप्रश्नः (Dharmasûtra) by Vikhanas. | 0 | 8 | 0 |
| No. 29—नानार्थार्णवसंक्षेपः (Kosa) by Kesavaswâmin (Part II. 3rd Kânda). | 2 | 4 | 0 |
| No. 30—वास्तुविद्या (Silpa). | 0 | 12 | 0 |
| No 31—नानार्थार्णवसंक्षेपः (Kosa) by Kesavaswâmin (Part III. 4th, 5th & 6th Kândas). | 1 | 0 | 0 |

| | RS. | AS. | P. |
|---|---|---|---|
| No. 32—कुमारसम्भवः (Kâvya) by Kâlidâsa with the two commentaries, Prakâsikâ of Arunagirinâtha and Vivarana of Nârâyana Pandita (Part II. 3rd, 4th & 5th Sargas) | 2 | 8 | 0 |
| No. 33—वाररुचसंग्रहः (Vyâkarana) with the commentary Dîpaprabhâ of Nârâyana. | 0 | 8 | 0 |
| No. 34—मणिदर्पणः (शब्दपरिच्छेदः) (Nyâya) by Râjachûdâmanimakhin. | 1 | 4 | 0 |
| No. 35—मणिसारः (अनुमानखण्डः) (Nyâya) by Gopînâtha. | 1 | 8 | 0 |
| No. 36—कुमारसम्भवः (Kâvya) by Kâlidâsa with the two commentaries, Prakâsikâ of Arunagirinâtha and Vivarana of Nârâyana Pandita (Part III. 6th, 7th & 8th Sargas). | 3 | 0 | 0 |
| No. 37—आशौचाष्टकम् (Smriti) by Vararuchi with commentary. | 0 | 4 | 0 |
| No. 38—नामलिङ्गानुशासनम् (Kosa) by Amarasimha with the commentary Tîkâsarvasva of Vandyaghatîya Sarvânanda (Part I. 1st Kânda). | 2 | 0 | 0 |
| No. 39—चारुदत्तम् (Nâtaka) by Bhâsa. | 0 | 12 | 0 |
| No. 40—अलङ्कारसूत्रम् (Alankâra) by Râjânaka Srî Ruyyaka with the Alankârasarvaswa of Sri Mankhuka and its commentary by Samudrabandha. | 2 | 8 | 0 |
| No. 41—अध्यात्मपटलम् (Kalpa) by Âpastamba with Vivarana of Srî Sankara Bhagavat Pâda. | 0 | 4 | 0 |
| No. 42—प्रतिमानाटकम् (Nâtaka) by Bhâsa. | 1 | 8 | 0 |
| No. 43—नामलिङ्गानुशासनम् (Kosa) by Amarasimha with the two commentaries, Amarakosodghâtana of Kshîraswamin and Tîkâsarvaswa of Vandyaghatîya Sarvânanda (Part II. 2nd Kânda 1—6 Vargas). | 2 | 8 | 0 |

| | RS. | AS. | P. |
|---|---|---|---|
| No. 44—तन्त्रशुद्धम् (Tantra) by Bhattâraka Srî Vedottama. | 0 | 4 | 0 |
| No. 45—प्रपञ्चहृदयम् (Prapanchahridaya). | 1 | 0 | 0 |
| No. 46—परिभाषावृत्तिः (Vyâkarana) by Nîlakantha Dîkshita. | 0 | 8 | 0 |
| No. 47—सिद्धान्तसिद्धाञ्जनम् (Vedânta) by Srî Krishnânanda Sarasvatî. (Part I.) | 1 | 12 | 0 |
| No. 48— Do. Do. (Part II.) | 2 | 0 | C |
| No. 49—गोलदीपिका (Jyotisha) by Parameswara. | 0 | 4 | 0 |
| No. 50—रसार्णवसुधाकरः (Alankâra) by Singa Bhûpâla. | 3 | 0 | 0 |
| No. 51—नामलिङ्गानुशासनम् (Kosa) by Amarasimha with the two commentaries, Amarakosodghâtana of Kshîraswâmin and Tîkâsarvaswa of Vandyaghatîya Sarvânanda (Part III. 2nd Kânda 7—10 Vargas) | 2 | 0 | 0 |
| No. 52—नामलिङ्गानुशासनम् (Kosa) by Amarasimha with the commentary Tîkâsarvaswa of Vandyaghatîya Sarvânanda (Part IV. 3rd Kânda) | 1 | 8 | 0 |
| No. 53—शाब्दनिर्णयः (Vedânta) by Prakâsâtmayatîndra | 0 | 12 | 0 |
| No. 54—स्फोटसिद्धिन्यायविचारः (Vyâkarana) | 0 | 4 | 0 |
| No. 55—मत्तविलासप्रहसनम् (Nâtaka) by Srî Mahendravikramavarman. | 0 | 8 | 0 |
| No. 56—मनुष्यालयचन्द्रिका (Silpa). | 0 | 8 | 0 |
| No. 57—रघुवीरचरितम् (Kâvya). | 1 | 4 | C |
| No. 58—सिद्धान्तसिद्धाञ्जनम् (Vedânta) by Srî Krishnânanda Saraswatî (Part III.) | 2 | 0 | 0 |
| No. 59—नागानन्दम् (Nâtaka) by Srîharshadeva with the commentary Nâgânandavimarsinî of Sivarâma. | 3 | 4 | 0 |
| No. 60—लघुस्तुतिः (Stuti) by Srî Laghubhattâraka with the commentary of Srî Râghavânanda. | 0 | 8 | 0 |

| | RS. | AS. | P. |
|---|---|---|---|
| No. 61—सिद्धान्तसिद्धाञ्जनम् (Vedanta) by Srî Krishnânanda Sarasvati (Part IV.) | 1 | 8 | 0 |
| No. 62—सर्वमतसंग्रहः (Sarvamatasangraha). | 0 | 8 | 0 |
| No. 63—किरातार्जुनीयम् (Kâvya) by Bharavi with the commentary Sabdârthadipika of Chitrabhanu (1, 2 and 3 Sargas). | 2 | 8 | 0 |
| No. 64—मेघसन्देशः (Kâvya) by Kâlidasa with the commentary Pradîpa of Dakshinâvartanatha. | 1 | 0 | 0 |
| No. 65—मयमतम् (Silpa) by Mayamuni. | 3 | 8 | 0 |
| No. 66—महार्थमञ्जरी (Darsana) with the commentary Parimala of Maheswarânanda. | 2 | 8 | 0 |
| No. 67—तन्त्रसमुच्चयः (Tantra) by Nârâyana with the commentary Vimarsini of Sankara. (Part I. 1–6 Patalas) | 3 | 4 | 0 |
| No. 68—तत्त्वप्रकाशः (Agama) by Srî Bhojadeva with the Commentary Tâtparyadîpikâ of Srî Kumara. | 2 | 0 | 0 |
| No. 69—ईशानशिवगुरुदेवपद्धतिः (Tantra) by Isânasivagurudevamisra (Part I. Sâmanyapâda). | 1 | 8 | 0 |
| No. 70—आर्यमञ्जुश्रीमूलकल्पः (Part I). | 2 | 8 | 0 |

***Apply to:—***

*The Agent for the sale of*

*Government Sanskrit Publications,*

*Trivandrum.*

S,80-28 R14 ST2

DATE OF ISSUE

This book must be returned within 3, 7, 14 days of its issue. A fine of ONE ANNA per day will be charged if the book is overdue.

S8r 8 R144ST
SRI RAM VERMA.
Syanandurpurvarnan

16554